# ॥ वेदान्तपञ्चप्रकरणी ॥

१५०

अस्यां हि

श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीमत्परमशिवेन्द्रसरस्वती

श्रीचरणशिष्येण विदितवेदितव्येन परोरजसा

श्रीसदाशिवब्रह्मेन्द्रेण

कृताः

बोधार्या गुरुरत्नमालिका आत्मविद्याविलासः

शिवमानसिकपूजा सपर्यापर्यायस्तव इति पञ्चकृतीः

संकलय्य संशोध्य

ब्रह्मदेशं श्रीस्वामिनाथश्रौतिना

कुम्भघोणस्थापित"श्रीविद्या"मुद्राक्षरशालायां

मुद्रापिता विजयतेतराम् ।

शकाब्दाः १८१३

A.D. 1891

BRITISH MUSEUM

शिवाभ्यां नमः ।

श्रीमज्जगद्गुरुश्रीशङ्कराचार्यविरचितम्

# बोधार्याप्रकरणम्

श्रीगुरुचरणद्वन्द्वं वन्देऽहं मथितदुस्सहद्वन्द्वम् ।
भ्रान्तिग्रहोपशान्तिं पांसुमयं यस्य भसितमातनुते ॥ १ ॥
देशिकवरं दयालुं वन्देऽहं निहतसकलसन्देहम् ।
यच्चरणद्वयमद्वयमनुभवमुपदिशति तत्पदस्यार्थम् ॥ २ ॥
संसारदावपावकसन्तप्तः सकलसाधनोपेतः ।
स्वात्मनिरूपणनिपुणैर्वाक्यैः शिष्यः प्रबोध्यते गुरुणा ॥ ३ ॥
अस्ति स्वयमित्यस्मिन्नर्थे कस्यास्ति संशयः पुंसः ।
अत्रापि संशयश्चेत् संशयिता यस्स एव भवसि त्वम् ॥ ४ ॥
नाहमिति वेत्ति योऽसौ सत्यं ब्रह्मैव वेत्ति नास्तीति ।
अहमस्मीति विजानन् ब्रह्मैवासौ स्वयं विजानाति ॥ ५ ॥
ब्रह्म त्वमेव तस्मात् नाहं ब्रह्मेति मोहमात्रमिदम् ।
मोहेन भवति भेदः क्लेशास्सर्वे भवन्ति तन्मूलाः ॥ ६ ॥
न क्लेशपञ्चकमिदं भजते कृतकोशपञ्चकविवेकः ।
अत एव पञ्चकोशान्कुशलधियस्सन्ततं विचिन्वन्ति ॥ ७ ॥
अन्नप्राणमनोमयविज्ञानानन्दपञ्चकोशानाम् ।
एकैकान्तरभाजां भजति विवेकात् प्रकाशतामात्मा ॥ ८ ॥
वपुरिदमन्नमयाख्यः कोशो नात्मा जडो घटप्रायः ।
प्रागुत्पत्तेः पश्चात् तदभावस्यापि दृश्यमानत्वात् ॥ ९ ॥
कोशः प्राणमयोऽयं वायुविशेषो वपुष्यवच्छिन्नः ।
अस्य कथमात्मता स्यात् क्षुत्तृष्णाभ्यामुपेयुषः पीडाम् ॥ १० ॥
कुरुते वपुष्यहन्तां गेहादौ यः करोति ममतां च ।
रागद्वेषविधेयो नासावात्मा मनोमयः कोशः ॥ ११ ॥

सुप्तौ स्वयं विलीना बोधे व्याप्ता कलेवरं सकलम् ।
विज्ञानशब्दवाच्या चित्प्रतिबिम्बा न बुद्धिरप्यात्मा ॥ १२ ॥
सुप्तिगतैस्सुखलेशैरभिमनुते यस्सुखीभवामीति ।
आनन्दकोशनामा सोऽहङ्कारः कथं भवेदात्मा ॥ १३ ॥
यस्स्फुरति बिम्बभूतस्स भवेदानन्द एव सकलात्मा ।
प्राग्दृष्टभावे च सत्त्वादविकारित्वादबाध्यमानत्वात् ॥ १४ ॥
अन्नमयादेरस्मादपरं यदि नानुभूयते किञ्चित् ।
अनुभवितान्नमयादेरस्तीत्यस्मिन्न कश्चिदपलापः ॥ १५ ॥
स्वयमेवानुभवत्वाद्यद्यप्येतस्य नानुभाव्यत्वम् ।
सकृदप्यभावशङ्का न भवेद्बोधस्वरूपसत्तायाः ॥ १६ ॥
अनुभवति विश्वमात्मा वि वेनासौ न चानुभूयेत ।
न खलु प्रकाश्यतेऽसौ विश्वमशेषं प्रकाशयन् भानुः ॥ १७ ॥
तदिदं तादृशमीदृशमेतादृशमिति च यन्न भवेत् ।
ब्रह्म तदित्यवधेयं नो चेद्विषयो भवेत्परोक्षं च ॥ १८ ॥
इदमिदमिति प्रतीते वस्तुनि सर्वत्र बाध्यमानेऽपि ।
अनिदमबाध्यं तत्त्वं सत्त्वादेतस्य न च परोक्षत्वम् ॥ १९ ॥
नावेद्यमपि परोक्षं भवति ब्रह्म स्वयंप्रकाशत्वात् ।
सत्यं ज्ञानमनन्तं ब्रह्मेत्येतस्य लक्षणं ब्रूते ॥ २० ॥
सति कोशशक्त्युपाधौ सम्भवतस्तस्य जीवतेश्वरते ।
नो चेत्तयोरभावाद्विगतविशेषं विभाति निजरूपम् ॥ २१ ॥
सति सकलदृश्यबाधे न किमप्यस्तीति लोकसिद्धं चेत् ।
यन्न किमपीति सिद्धं ब्रह्म तदेवेति वेदतः सिद्धम् ॥ २२ ॥
एवमपि विरहितानां तत्त्वमसीति वाक्यचिन्तनया ।
प्रतिभात्येव परोक्षवदात्मा प्रत्यक्प्रकाशमानोऽपि ॥ २३ ॥
तस्मात्पदार्थशोधनपूर्वकवाक्यस्य चिन्तयन्नर्थम् ।
देशिकदयाप्रभावादपरोक्षयति क्षणेन चात्मानम् ॥ २४ ॥



देहेन्द्रियादिधर्मानात्मन्यारोपयन्नभेदेन ।
कर्तृत्वाद्यभिमानी बोधस्स्यात् त्वंपदस्य वाच्योऽर्थः ॥ २५ ॥
वेदावसानवाचा द्वैतं सकलजगदुपादानम् ।
सर्वज्ञताद्युपेतं चैतन्यं तत्पदस्य वाच्योऽर्थः ॥ २६ ॥
विविधोपाधिविमुक्तं विश्वातीतं विशुद्धमद्वैतम् ।
अक्षरमनुभववेद्यं चैतन्यं तत्पदस्य लक्ष्योऽर्थः ॥ २७ ॥
सामानाधिकरण्यं तदनु विशेषणविशेष्यता चेति ।
अथ लक्ष्यलक्षणत्वं भवति पदार्थात्मनां च सम्बद्धम् ॥ २८ ॥
एकत्र वृत्तिरेव शब्दानां भिन्नवृत्तिहेतूनाम् ।
सामानाधिकरण्यं भवतीत्येवं वदन्ति लाक्षणिकाः ॥ २९ ॥
प्रत्यक्षपरोक्षत्वं परिपूर्णत्वं च सद्वितीयत्वम् ।
इतरेतरं विरुद्धं तत इह भवितव्यमेव लक्षणया ॥ ३० ॥
मानान्तरोपरोधे मुख्यार्थस्यापरिग्रहे जाते ।
मुख्याविनाकृतेऽर्थे या वृत्तिस्सैव लक्षणा प्रोक्ता ॥ ३१ ॥
निखिलमपि वाच्यमर्थं त्यक्त्वा वृत्तिस्तदन्वितेऽन्यार्थे ।
जहतीति लक्षणा स्यात् गङ्गायां घोषवन्न या ग्राह्या ॥ ३२ ॥
वाच्यार्थमत्यजन्त्या यस्या वृत्तेः प्रवृत्तिरन्यार्थे ।
इयमजहतीति कथिता शोणो धावतिवदत्र न ग्राह्या ॥ ३३ ॥
जहदजहतीति सा स्यात् या वाच्यार्थैकदेशमापन्ना ।
बोधयति चैकदेशं सोऽयं द्विज इतिवदाश्रयेदेनाम् ॥ ३४ ॥
सोऽयं द्विज इति वाक्यं त्यक्त्वा पूर्वं परोक्षताद्यर्थम् ।
द्विजमात्रलक्षकत्वात् कथयत्यैक्यं पदार्थयोरुभयोः ॥ ३५ ॥
तद्वत्तत्त्वमसीति त्यक्त्वा प्रत्यक्परोक्षतादीनि ।
चिद्वस्तु लक्षयित्वा बोधयति स्पष्टमसिपदेनैक्यम् ॥ ३६ ॥
इत्थं बोधितमर्थं महता वाक्येन दर्शितैक्येन ।
अहमित्यपरोक्षयतां वेदो वेदयति वीतशोकत्वम् ॥ ३७ ॥

प्रायः प्रवर्तकत्वं विधिवचसां लोकवेदयोर्दृष्टम् ।
सिद्धं बोधयतोऽर्थं कथमेतद्भवति तत्त्वमस्यादेः ॥ ३८ ॥
विधिरेव न प्रवृत्तिं जनयत्यभिलषितवस्तुबोधेऽपि ।
राजा भवति सुतोऽभूदिति बोधेन प्रवर्तते लोकः ॥ ३९ ॥
ऐक्यपरैश्श्रुतिवाक्यैरात्मा शश्वत्प्रकाशमानोऽपि ।
देशिकदयाविहीनैरपरोक्षयितुं न शक्यते पुरुषैः ॥ ४० ॥
विरहितकाम्यनिषिद्धो विहितानुष्ठानविमलितस्वान्तः ।
स्वयमेव भजति बोधं गुरुणा किमिति त्वया न मन्तव्यम् ॥ ४१ ॥
कर्मभिरेव न बोधः प्रभवति गुरुणा विना दयानिधिना ।
आचार्यवान् हि पुरुषो वेदेत्यर्थस्य वेदसिद्धत्वात् ॥ ४२ ॥
वेदोऽनादितया वा यद्वा परमेश्वरप्रणीततया ।
भवति परमं प्रमाणं बाधो नास्ति स्वतश्च परतो वा ॥ ४३ ॥
नापेक्षते यदन्यद्यदपेक्षन्तेऽखिलानि मानानि ।
वाक्यं तन्निगमानां मानं ब्रह्माद्यतीन्द्रियावगतौ ॥ ४४ ॥
मानं प्रबोधयन्तं मानेन विना बुभुत्सन्ते ।
एधोभिरेव दहनं दग्धुं वाञ्छन्ति ते महात्मानः ॥ ४५ ॥
वेदोऽनादिरमुष्य व्यञ्जक ईशस्स्वयंप्रकाशात्मा ।
तदभिव्यक्तमुदीक्ष्य प्रोक्तोऽसौ सूरिभिः प्रमाणमिति ॥ ४६ ॥
रूपाणामवलोके चक्षुरिवान्यन्न कारणं दृष्टम् ।
तद्वददृष्टावगतौ वेदवदन्ये न वेद को हेतुः ॥ ४७ ॥
निगमेषु निश्चितार्थं तन्त्रे कश्चिद्यदि प्रकाशयति ।
तदिदमनुवादमात्रं प्रामाण्यं तस्य सिध्यति न किञ्चित् ॥ ४८ ॥
अंशद्वयवति निगमे साधयति द्वैतमेव कोऽप्यंशः ।
अद्वैतमेव वस्तु प्रतिपादयति प्रसिद्धमपरोंऽशः ॥ ४९ ॥
अद्वैतमेव सत्यं तस्मिन् द्वैतं न सत्यमध्यस्तम् ।
रजतमिव शुक्तिकायां मृगतृष्णायामिवोदकस्फुरणम् ॥ ५० ॥



आरोपितं यदि स्याददद्वैतं वस्तु वस्तुनि द्वैते ।
युक्तं नैव तदा स्यात् सत्येऽध्यासो भवत्यसत्यानाम् ॥ ५१ ॥
यद्यारोपणयुगयोस्तद्व्यतिरिक्तस्य कस्यचिदभावः ।
आरोपणं न शून्ये तस्माददद्वैतसत्यता ग्राह्या ॥ ५२ ॥
प्रत्यक्षाधनवगतं श्रुत्या प्रतिपादनीयमद्वैतम् ।
द्वैतं न प्रतिपाद्यं तस्य स्वयमेव लोकसिद्धत्वात् ॥ ५३ ॥
अद्वैतं सुखरूपं दुस्सहदुःखं सदा भवेद्द्वैतम् ।
यत्र प्रयोजनं स्यात् प्रतिपादयति श्रुतिस्तदेवासौ ॥ ५४ ॥
निगमगिरा प्रतिपाद्यं वस्तु यदानन्दरूपमद्वैतम् ।
स्वाभाविकं स्वरूपं जीवत्वं तस्य केचन ब्रुवते ॥ ५५ ॥
यद्वदयो रसविद्धं काञ्चनतां याति तद्वदेवासौ ।
जीवस्साधनशक्त्या परतां यातीति केचिदिच्छन्ति ॥ ५६ ॥
तदिदं भवति न युक्तं गतवति तस्मिन् चिरेण रसवीर्ये ।
प्रतिपद्यते प्रणाशं हैमो वर्णोऽप्ययस्समारूढः ॥ ५७ ॥
जीवत्वमपि तथेदं बहुविधसुखदुःखलक्षणोपेतम् ।
धृतमिव साधनशक्त्या प्रविभात्येव प्रयाति न विनाशम् ॥ ५८ ॥
तस्मात्स्वतो यदि स्याज्जीवस्सततं स एव जीवस्स्यात् ।
एवं यदि परमात्मा परमात्मैवायमिति भवेद्युक्तम् ॥ ५९ ॥
यदि वा परेण साम्यं जीवश्चेद्भजति साधनबलेन ।
कालेन तदपि कियता नश्यत्येवेति निश्चितं सकलैः ॥ ६० ॥
तस्मात्परं स्वकीयं मोहं मोहात्मकं च संसारम् ।
स्वज्ञानेन च हित्वा पूर्णस्स्वयमेव शिष्यते नान्यत् ॥ ६१ ॥
सत्यं ज्ञानमनन्तं प्रकृतेः परमात्मरूपमद्वैतम् ।
अवबोधयन्ति निखिलाः श्रुतयः स्मृतिभिस्समस्ताभिः ॥ ६२ ॥
एकत्वबोधकानां निखिलानां निगमवाक्यजालानाम् ।
वाक्यान्तराणि सकलान्यभिधीयन्ते स्म शेषभूतानि ॥ ६३ ॥

यस्मिन् मिहिरवदुदिते तिमिरवदपयान्ति कर्तृतादीनि ।
ज्ञानं विरहितभेदं कथमेतद्भवति तत्त्वमस्यादेः ॥ ६४ ॥
कर्मप्रकरणनिष्ठं ज्ञानं कर्माङ्गमिष्यते प्राज्ञैः ।
भिन्नप्रकरणभाजः कर्माङ्गत्वं कथं भवेद् ज्ञप्तेः ॥ ६५ ॥
अधिकारिभेदविषयौ कर्मज्ञानात्मकावुभौ काण्डौ ।
एवं सति कथमनयोरङ्गाङ्गित्वं परस्परं घटते ॥ ६६ ॥
ज्ञानं कर्मणि न स्यात् ज्ञाने कर्मेदमपि तथा न स्यात् ।
कथमनयोरप्युभयोस्तपनतमोवत् समुच्चयो घटते ॥ ६७ ॥
तस्मान्मोहनिवृत्तौ ज्ञानान्न सहायमन्यदर्थ्यते ।
यद्वद् घनतरतिमिरप्रकरपरिध्वंसने सहस्रांशुः ॥ ६८ ॥
ज्ञानं तदेवममलं साक्षी विश्वस्य भवति परमात्मा ।
सम्बध्यते न धर्मैः साक्षी विभुरेव सच्चिदानन्दः ॥ ६९ ॥
रज्ज्वादेरुरगाद्यैस्सम्बन्धे तस्य दृश्यसम्बन्धः ।
सततमसङ्गस्सोऽयं श्रुतिरप्येवमुमर्थमेव साधयति ॥ ७० ॥
कर्तृ च कर्म च यस्य स्फुरति ब्रह्मैव तन्न जानाति ।
यस्य न कर्तृ न कर्म स्फुटतरमयमेव वेदितुं क्षमते ॥ ७१ ॥
कर्तृत्वादिकमेतन्मायाशक्त्या प्रतीयते निखिलम् ।
इति केचिदाहुरेषा भ्रान्तिर्ब्रह्मादि नान्यतः केचित् ॥ ७२ ॥
तस्मिन् ब्रह्मणि विदिते विश्वमशेषं भवेदिदं विदितम् ।
कारणमृदि विदितायां घटकरकाद्या यथावगम्यन्ते ॥ ७३ ॥
तदिदं कारणमेकं विगतविशेषं विशुद्धचिद्रूपम् ।
तस्मात्सदेकरूपात् मायोपहितादशेषमिदम् ॥ ७४ ॥
कारणमसदिति केचित्कथयन्त्यसतो भवेन्न कारणता ।
अङ्कुरजननी शक्तिः सति खलु बीजे समीक्ष्यते सकलैः ॥ ७५ ॥
कारणमसदिति कथयन् वन्ध्यापुत्रेण निर्वहेत्कार्यम् ।
किं च मृगतृष्णिकाम्भः पीत्वोदन्यां महीयसीं शमयेत् ॥ ७६ ॥



यस्मान्न सोऽयमसतो वादस्सम्भवति शास्त्रयुक्तिभ्याम् ।
तस्मात्सदेव तत्त्वं सर्वेषां कारणं जगताम् ॥ ७७ ॥
जगदाकारतयापि प्रथते गुरुशिष्यविग्रहतयापि ।
ब्रह्माकारतयापि प्रतिभातीदं परात्परं तत्त्वम् ॥ ७८ ॥
सत्यं जगदिति भानं संसृतये स्यादपक्वचित्तानाम् ।
तस्मादसत्यमेतत् निखिलं प्रतिपादयन्ति निगमान्ताः ॥ ७९ ॥
परिपक्वमानसानां पुरुषवराणां पुरातनैस्सुकृतैः ।
ब्रह्मैवेदं सर्वं जगदिति भूयः प्रबोधयत्येषः ॥ ८० ॥
अनवगतकाञ्चनानां भूषणधीरेव भूषणे हैमे ।
एवमविवेकभाजां जगति जनानां न तात्त्विकी धिषणा ॥ ८१ ॥
अहमालम्बनसिद्धं कस्य परोक्षं भवेदिदं ब्रह्म ।
तदपि विचारविहीनैरपरोक्षयितुं न शक्यते मुग्धैः ॥ ८२ ॥
अहमिदमिति च मतिभ्यां सततं व्यवहरति सर्वलोकोऽपि ।
प्रथमा प्रतीचि चरमा निवसति वपुरिन्द्रियादिबाह्यार्थे ॥ ८३ ॥
वपुरिन्द्रियादिविषया याऽहंबुद्धिर्भवत्यसौ भ्रान्तिः ।
तद्बुद्धिरतस्मिन्नित्यध्यासत्वेन भासमानत्वात् ॥ ८४ ॥
तस्मादशेषसाक्षी परमात्मैवायमर्थ इत्युचितम् ।
अजडवदेव जडोऽयं सत्यं बन्धाद्भवत्यहङ्कारः ॥ ८५ ॥
तस्मात्सर्वशरीरेष्वहमहमित्येव भासते स्पष्टः ।
यः प्रत्ययो विशुद्धः तस्य ब्रह्मैव भवति मुख्योऽर्थः ॥ ८६ ॥
गोशब्दादिव गोत्वं तदपि विविक्तौ प्रतीयतेऽर्थतया ।
अहमर्थः परमात्मा तद्भ्रान्त्या भवत्यहङ्कारः ॥ ८७ ॥
दग्धृत्वादिकमयसः पावकसङ्गेन भासते यद्वत् ।
तद्वच्चेतनसङ्गादहमिति प्रतिभान्ति कर्तृतादीनि ॥ ८८ ॥
देहेन्द्रियादिविषयव्यतिरिक्तं विमलममलमद्वैतम् ।
अहमर्थमिति विदित्वा तद्व्यतिरिक्तं न कल्पयेत्किञ्चित् ॥ ८९ ॥

यद्वत् सुखदुःखानामवयवभेदादनेकता देहे ।
तद्वदिह सत्यभेदेऽप्यनुभववैचित्र्यमात्मनामेषाम् ॥ ९० ॥

किमिदं किमस्य रूपं कथमेतदभूदमुष्य को हेतुः ।
इति न कदापि विचिन्त्यं चिन्त्यं मायेति धीमता विश्वम् ॥ ९१ ॥

दन्तिनि दारुविकारे दारु तिरोभवति सोऽपि तत्रैव ।
जगति तथा परमात्मा परमात्मन्यपि जगत्तिरोधत्ते ॥ ९२ ॥

आत्ममये महति पटे विविधजगच्चित्रमात्मना लिखितम् ।
स्वयमेव केवलमसौ पश्यन् प्रमुदं प्रयाति परमात्मा ॥ ९३ ॥

चिन्मात्रममलमक्षयमद्वयमानन्दमनुभवारूढम् ।
ब्रह्मैवास्ति तदन्यन्न किञ्चिदस्तीति निश्चयो विदुषाम् ॥ ९४ ॥

व्यवहारस्य दशेयं विद्याऽविद्येति भेदपरिभाषा ।
नास्त्येव तत्त्वदृष्ट्या तत्त्वं ब्रह्मैव नान्यदस्त्यस्मात् ॥ ९५ ॥

अस्त्यन्यदिति मतं चेत् ब्रह्मैव तदस्तितारूपम् ।
व्यतिरिक्तमस्तितायाः नास्तितया शून्यमेव तत्सिद्धम् ॥ ९६ ॥

तत्त्वावबोधयुक्त्या स्थिरा तया बाधिताऽपि सा माया ।
आदेहपातमेषामाभात्यात्मा निजा विदुषाम् ॥ ९७ ॥

एष विशेषो विदुषां पश्यन्तो न प्रपञ्चसंसारम् ।
पृथगात्मनो न किञ्चित् पश्येयुस्सकलनिगमनिर्णीतात् ॥ ९८ ॥

किं चिन्त्यं किमचिन्त्यं किं कथनीयं किमप्यकथनीयम् ।
किं कृत्यं किमकृत्यं निखिलमिदं तदिति जानतां विदुषाम्॥ ९९ ॥

निखिलं दृश्यविशेषं दृग्रूपत्वेन पश्यतां तेषाम् ।
बन्धो नापि विमुक्तिर्न च परमात्मत्वमपि न जीवत्वम्॥ १०० ॥

असकृदनुचिन्तितानामध्याहर्तव्यनिजनिदेशानाम् ।
प्रामाण्यपरमसीम्नां निगमनामिदमेव निखिलनिगमानाम् ॥ १०१ ॥

इति बोधितस्स्वगुरुणा शिष्यो हृष्यन् प्रणम्य तत्पदयोः ।
स्वानुभवासिद्धमर्थं स्वयमेवान्तर्विचिन्तयामास ॥ १०२ ॥



अजरोऽहमक्षरोऽहं प्राज्ञोऽहं प्रत्यगात्मबोधोऽहम् ।
परमानन्दमयोऽहं परमशिवोऽहं भवामि परिपूर्णः ॥ १०३ ॥

आद्योऽहमात्मभाजामात्मानन्दानुभूतिरसिकोऽहम् ।
आबालगोपमखिलैरहमित्यनुभूयमानमहिमाऽहम् ॥ १०४ ॥

इहपरसुखविमुखोऽहं निजसुखभोगानुभूतिभरितोऽहम् ।
ईशोऽहमीश्वराणामीर्ष्यादोषानुषङ्गरहितोऽहम् ॥ १०५ ॥

ईक्षणविषयमतीनामीप्सितपुरुषार्थसाधनपरोऽहम् ।
उदयोऽहमेव जगतामुपनिषदुद्यानकृतविहारोऽहम् ॥ १०६ ॥

उद्वेलशोकसागरवाडवमुखहव्यवाहनार्चिरहम् ।
ऊर्जस्वलनिजविभवैरूर्ध्वमधस्तिर्यगश्नुवानोऽहम् ॥ १०७ ॥

ऊहापोहविचारैरुररीकृतवत्प्रतीयमानोऽहम् ।
ऋषिभिरहमृषिगणोऽहं स्रष्टिरहं सृज्यमानमहमेव ॥ १०८ ॥

ऋद्धिरहं वृद्धिरहं तृप्तिरहं देवदीप्तिरहमेव ।
एकोऽहमेतदीदृश एवमिति स्फुरितभेदरहितोऽहम् ॥ १०९ ॥

एष च सोऽहमनीहैरेनस्सुकृतानुभूतिरहितोऽहम् ।
ऐक्यावबोधकोऽहं वाक्योऽहं ज्ञानपावनमतीनाम् ॥ ११० ॥

ऐशमहमेव तत्त्वं नैशतमःप्रायशोकरहितोऽहम् ।
ओजोऽहमोषधीनामोतप्रोतायमानभुवनोऽहम् ॥ १११ ॥

ओङ्काररसोल्लसदात्ममुदामोदमत्तभृङ्गोऽहम् ।
औषधमहमशुभानामौपाधिकभेदजालरहितोऽहम् ॥ ११२ ॥

औदार्यातिशयोचितविविधचतुर्वर्गवितरणपरोऽहम् ।
अङ्कुशमहमखिलानामहंश्रयमत्तवारणेन्द्राणाम् ॥ ११३ ॥

अम्बरवदविरलोऽहं शम्बरारिपुजातविकृतिरहितोऽहम् ।
अस्मि विकल्पमतीनामस्खलदुपदेशगम्यमानोऽहम् ॥ ११४ ॥

अस्थिरसुखविमुखोऽहं सुस्थिरसुखबोधसम्पदुचितोऽहम् ।
करुणारसभरितोऽहं कबलितकमलासनादिलोकोऽहम् ॥ ११५ ॥

कलुषहरवीक्षणोऽहं कल्मषमुक्तोपदेशरहितोऽहम् ।
खानामगोचरोऽहं खातीतोऽहं खपुष्पभवनोऽहम् ॥ ११६ ॥
खलजनदुरासदोऽहं खण्डज्ञानापनोदनपरोऽहम् ।
गन्तव्योऽहमनीहैर्गत्यागतिरहितपूर्णबोधोऽहम् ॥ ११७ ॥
घनतरमोहतमिस्रप्रकरपरिध्वंसभानुनिकरोऽहम् ।
घटिकावासररजनीवत्सरयुगकल्पकालभेदोऽहम् ॥ ११८ ॥
चरदचरदात्मकोऽहं चतुरामितिश्लाघ्यचारचरितोऽहम् ।
चपलजनदुर्गमोऽहं चञ्चलभवजलधिपारदेशोऽहम् ॥ ११९ ॥
जलजासनादिगोचरपञ्चमहाभूतमूलभूतोऽहम् ।
जगदानन्दकरोऽहं जन्मजरामरणरोगरहितोऽहम् ॥ १२० ॥
झंकृतिहुंकृतिशिञ्जितबृंहितमुखविविधनादभेदोऽहम् ।
झटिति घटितात्मवेदे तदनु परिस्फुरितहृदयभवनोऽहम् ॥ १२१ ॥
ज्ञानमहं ज्ञेयमहं ज्ञाताहं ज्ञेयसाधनगणोऽहम् ।
ज्ञानाज्ञानाविकृतकमकृतकमस्तित्वमात्रमेवाहम् ॥ १२२ ॥
तत्त्वातीतपदोऽहं तनुरहमस्मीति भानरहितोऽहम् ।
तामसदुरधिगमोऽहं तत्त्वंपदबोधबोध्यहृदयोऽहम् ॥ १२३ ॥
दैवतदैत्यनिशाचरमानवतिर्यङ्महीधरादिरहम् ।
देहेन्द्रियरहितोऽहं दक्षिणपूर्वादिभागरहितोऽहम् ॥ १२४ ॥
धर्माधर्ममयोऽहं धर्माधर्मादिबोधरहितोऽहम् ।
धार्मिकजनसुलभोऽहं धन्योऽहं धातुरादिभूतोऽहम् ॥ १२५ ॥
नामादिविरहितोऽहं नानाविधनिखिलनिगमसारोऽहम् ।
नादान्तवेदितोऽहं नानाविधशोकमोहरहितोऽहम् ॥ १२६ ॥
परजीवभेदबाधकपरमार्थज्ञानभरिताचित्तोऽहम् ।
प्रकृतिरहं विकृतिरहं विपरीतं चास्मि भागधेयानाम् ॥ १२७ ॥
फणधरभूधरवारणविग्रहविधृतप्रपञ्चसारोऽहम् ।
फालतलोदितलोचनपावकपरिभूतपञ्चबाणोऽहम् ॥ १२८ ॥



बद्धो भवामि नाहं बन्धान्मुक्तस्तथापि नैवाहम् ।
बाध्या भवामि नाहं बाध्योऽहं नैव बाधको नाहम् ॥ १२९ ॥
भक्तिरहं भजनमहं भुक्तिरहं मुक्तियुक्तिरहमेव ।
भूतानुभावनोऽहं भूतभवद्भव्यमूलभूतोऽहम् ॥ १३० ॥
मान्योऽहमस्मि महतां मन्दमतीनां च माननीयोऽहम् ।
मदरागमानमोहितमानसदुर्वासनादुरापोऽहम् ॥ १३१ ॥
यजनयजमानयाजकयागमयोऽहं यमादिरहितोऽहम् ।
यमवरुणयक्षराक्षसवासवमरुदीशवह्निरूपोऽहम् ॥ १३२ ॥
रक्षाविधानशिक्षादीक्षितलीलादिलोकमहिमाहम् ।
रजनीदिवसाविरामस्फुरदनुभूतिप्रमाणसिद्धोऽहम् ॥ १३३ ॥
लक्षणलक्ष्यमयोऽहं लाक्षणिकोऽहं लयादिरहितोऽहम् ।
लाभालाभमयोऽहं लब्धव्यानामलभ्यमानोऽहम् ॥ १३४ ॥
वर्णाश्रमरहितोऽहं वर्णमयोऽहं वरेण्यगण्योऽहम् ।
वाचामगोचरोऽहं मानसमर्पितैर्निरूप्यमाणोऽहम् ॥ १३५ ॥
शमदमसंहितमनसां शास्त्रशतैरप्यगम्यमानोऽहम् ।
शरणमहमेव विदुषां शकलीकृतविविधसंशयगणोऽहम् ॥ १३६ ॥
षड्भावविरहितोऽहं षड्गुणरहितोऽहमहितरहितोऽहम् ।
षट्कोशविरहितोऽहं षट्त्रिंशत्तत्त्वजालरहितोऽहम् ॥ १३७ ॥
सच्चित्सुखात्मकोऽहं समधिकसङ्कल्पकल्पवृक्षोऽहम् ।
संसारविरहितोऽहं साक्षात्कारोऽहमेव विद्यायाः ॥ १३८ ॥
हव्यमहं कव्यमहं हेयोपादेयभावशून्योऽहम् ।
हरिरहमस्मि हरोऽहं विधिरहमेवेति कारणं तेषाम् ॥ १३९ ॥
क्षालितकलुषभयोऽहं क्षपितभवक्लेशजालहृदयोऽहम् ।
शान्त्याद्यक्षरनिहितं विनिहतसंसारहारमहमेव ॥ १४० ॥
बहुभिः कर्मभिरुक्तैरहमेवेदं चराचरं विश्वम् ।
शीकरफेनतरङ्गाः सिन्धोरपराणि न खलु वस्तूनि ॥ १४१ ॥

शरणं न भवति जननी न पिता न सुताश्च सोदरा नान्ये ।
परमं शरणमिदं मे चरणं मम शिरसि देशिकन्यस्तम् ॥१४२॥
आस्ते देशिकचरणं निरवधिरास्ते तदीक्षणं करुणा ।
आस्ते किमपि तदुक्तं किमतः परमस्ति जन्मसाफल्यम् ॥ १४३॥
कारुण्यसारसान्द्राः काङ्क्षितवरदानकल्पकविशेषाः ।
श्रीगुरुकटाक्षपाताः शिवशिव शमयन्ति चित्तसन्तापम् ॥ १४४ ॥
कबलितचञ्चलचेतोगुरुतरमण्डूकजातपरितोषा ।
शेते चित्तगुहायां चिरतरमेकैव चिन्मयी भुजगी ॥ १४५ ॥
मयि सुखबोधपयोधौ महति ब्रह्माण्डबुद्बुदसहस्रम् ।
मायामयेन मरुता भूत्वा भूत्वा मुहुस्तिरोधत्ते ॥ १४६ ॥
गुरुकरुणयैव नावा प्राक्तनभाग्यानुकूलमारुतया ।
दुस्सहदुःखतरङ्गः चिरतरसंसारसागरस्तीर्णः ॥ १४७ ॥
सति तमसि मोहरूपे विश्वमपश्यं तदेतदित्यखिलम् ।
उदितवति बोधभानौ किमपि न पश्यामि किंन्विदं चित्रम् ।१४८।
नाहं नमामि देवान् देवा मय्येव शेरते दैवम् ।
तन्न करोति विधानं तदपि मदीयं ततो नमो मह्यम् ॥ १४९ ॥
इत्यात्मबोधलाभं मुहुरनुचिन्त्य प्रमोदमानेन ।
प्रारब्धकर्मणोऽन्ते तेन परं प्राप्यतेऽस्य कैवल्यम् ॥ १५० ॥
मोहान्धकारहरणं संसारोद्वेलसागरोत्तरणम् ।
स्वात्मनिरूपणमेतत् प्रकरणवरमेतदर्हणीयमतः ॥ १५१ ॥
अज्ञानतिमिरहन्ता विरचितविज्ञानपङ्कजोल्लासः ।
मानसगगनतलं मे भासयति श्रीमहेशगुरुभानुः ॥ १५२ ॥
स्वात्मावबोधहीनाः कुणपशरीराभिमानसन्तुष्टाः ।
वारिजबुद्बुदरक्षां मूढाः कुर्वन्ति मोहबन्धेन ॥ १५३ ॥
जलमिव मृगतृष्णायां शुक्तौ रजतं यथा ह्यहीरज्ज्वाम् ।
सत्यमिवासत्यमतत्कल्पितमाभाति मयि परानन्दे ॥ १५४ ॥



अखिलनिगमान्तलक्ष्यं हानोपादानहीनचिन्मात्रम् ।
अनुभूतिमानगम्यं ब्रह्मैवानन्दमस्मि परिपूर्णः ॥१५५॥
तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहम् ।
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः ॥१५६॥
हयमेधसहस्राण्यथ वा कुरुतां ब्रह्ममेधलक्षाणि ।
परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते विमलः ॥१५७॥
विदितं वेदरहस्यं विदितो देहो ह्यनात्मेति ।
विदितः पर इति चात्मा किमतः परमस्ति जन्मसाफल्यम् ॥१५८॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीमज्जगद्गुरुश्रीशङ्करभगवत्पादविरुद-
श्रीसदाशिवबोधेन्द्रसरस्वतीप्रणीतं बोधार्यप्रकरणम् ।

---

शिवाभ्यां नमः ।

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसदाशिवब्रह्मेन्द्रकृतः

# जगद्गुरुरत्नमालास्तवः ।

श्रीगुरुभ्योनमः ॥ ॐम् ॥ यो बन्धुः सहभूः सखा च सविता माता धनं दैवतं त्राताऽपीति च सर्वमीश्वरमतिकुद्धञ्च यः सौम्ययेत् । यत्सेवाविधुरा स्थितिः स्रवति हि ब्रह्मादराधीतमप्याचार्यं तमहं पुनर्भवगदोल्लाघाय लब्धाश्रये ॥ १ ॥ समुद्धृतैस्साधुकथामहाकरात् प्रबन्धकृष्टैर्मणिभिर्महागुणैः । सदाशिवब्रह्मकृता सुहृद्धृता स्फुटं समिन्धां गुरुरत्नमालिका ॥२॥ क्व गम्भीरा अम्भोनिधय इव विद्वद्वरसदाशिवब्रह्मेन्द्राणां पटुफणितयः क्वाहमपि तु । तदीयांघ्रिद्वन्द्वस्मरणतरणीसाह्यवशतो विशन्व्याख्यामासां सपदि सुषुमाख्यां तितनिषे ॥३॥ सदाशिवब्रह्मपदनिध्यानपरचेतसा । रत्नमालालघुव्याख्या सुषुमाख्या विलिख्यते ॥४॥ आत्मप्रकाशेन्द्रसरस्वतीनामाराध्कोनांघ्रियुगस्य नित्यम् । व्याख्याऽऽत्मबोधेन गुरुस्तवस्य वितन्यते विश्वविवेकहेतोः ॥ ५ ॥ श्रीचन्द्रमौलीश्वराय नमः ॥

यदबोधवशादहं ममेदं तदिहेत्यादिरुदेति भूरिभेदः ।
तदखण्डमनन्तमद्वितीयं परमानन्दमयं पदं श्रयेयम् ॥ १ ॥

इह खलु तत्रभवान् पदवाक्यप्रमाणपारावारपारीणधीरधिषणावधूतनिखिलविषयवैषमीकः परमेष्ठिगुरुश्रीपरमशिवेन्द्रसरस्वतीप्रसादलब्धनिरुपधिब्रह्मविद्यः सब्रह्मचारिश्रीविश्वाधिकेन्द्रसरस्वतीचरणसमनुजिघृक्षया साक्षात्कृतसकलसंसारवृत्तान्तः सर्वस्य "पण्डितो मेधावी गन्धारानेवोपपद्येतैवमेवेहाचार्यवान् पुरुषो वेद" इत्यादिश्रुतिभ्यस्सर्वसंसारतरणतरणीयमानस्य गुरोरुपसदनस्यावश्यकतया तस्याप्यविच्छिन्नपरम्परागततया महत्तमतां प्रकाशयितुं "सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम् । अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥" इत्यभियुक्तोक्तिमवलम्ब्यासर्वजगद्गुरोरखिलसुरासुरसेव्यमानचरणसरसिजान्महेश्वरात् आ च निजगुरोः श्रीमत्प-



रमहंसपरिव्राजकाचार्यादिबिरुदाङ्कितश्रीमज्जगद्गुरुश्रीमच्छङ्करभगवत्पादश्रीमत्परमशिवेन्द्रसरस्वतीस्वामिनः स्वस्य सर्वस्य च जीवजातस्य समुपकाराय सर्वार्थसाधनीमभिष्टुतिमाचार्यपारम्पर्यां प्रारिप्सुरादौ निखिलभूतयोनिं नित्यशुद्धचैतन्यस्वभावं निर्धर्मिकं परं ब्रह्मैवाध्यारोपापवादाभ्यां प्रदर्शयन्नभिष्टवीति—यदबोधेत्यादिना ॥ यस्य निरस्तभेदत्रयस्य ब्रह्मणः निरुपाधिकस्य अबोधवशादनवगतेरपरोक्षसाक्षात्कारायोगादिति यावत् । अहं अहंवृत्तिव्यङ्ग्यस्फुरणवान् प्रत्यगात्मा विषयी शुद्धचिद्धातुत्वेन सजातीयः । ममेदं तदिहेति आरोपितात्मीयभावमात्मेन्द्रियमनोबुद्ध्यादयनात्मतत्त्वं विषयः परागात्मा विजातीयः । इत्यादिः इतिशब्देनैवं स्वगतभेदोऽप्यूह्यइत्यर्थः सूच्यते । एवंविधाः भूरिभेदः अनन्ताभेदाः यद्वा भूरिभेद इति बहुव्रीहिः अर्थात्संसार इत्याक्षिप्यते । नानारूपस्संसार इत्यर्थः । उदेति जायते । वस्तुतस्तु निर्विक्रियमेकमेवेदमित्यर्थः । तत् तच्छब्दलक्ष्यं अखण्डं अपरिच्छिन्नं अनन्तमोदं अनन्तं अविनाशि अन्तशब्दोऽत्रादिमध्ययोरप्युपलक्षणम् । एतेनादिमध्यान्तवर्जितमित्यर्थः । मोदोऽस्यास्तीति मोदम् । अर्शआदित्वादच् । अनन्तं च मोदं चेति विग्रहः । आनन्दस्वरूपस्यानन्दवत्त्वोक्तिस्तु तादात्म्येन घटवान् घट इतिवदौपचारिकी । आद्यं "सदेव सौम्येदमग्र आसीदि"ति श्रुतिप्रतिपादितं जगत्कारणम् । आनन्दमयमानन्दमात्रम् । सर्वोपप्लवरहितमित्यर्थः । प्राचुर्यार्थे मयट् । "तत्र को मोहः कश्शोक एकत्वमनुपश्यतः" इति श्रुतेः । परं सर्वोत्तरं पदं पुरुषसंज्ञं अवगन्तव्यं वस्तु श्रयेयं सेवेय सर्वानर्थप्रहाणाय शरणं व्रजेयमिति भावः । अनन्तमद्वितीयमिति पाठ एव साधीयान् अस्मिन्ननन्तमोदमानन्दमयमिति पौनरुक्त्यशङ्कोन्मेषप्रसङ्गात् । तस्मिन् पाठे अनन्तमादिमध्यान्तहीनं अद्वितीयं अनन्यं एकं सजातीयविजातीयस्वगतभेदरहितमिति यावत् ॥ १ ॥

वटपादपमूलपट्टभद्रं स्फुटचिन्मुद्रमुदूढमौनमुद्रम् ।
कलितेन्दुकलं कृपासमुद्रं कलये कञ्चन देशिकं विनिद्रम् ॥२॥

तदेवं निर्गुणं ब्रह्म निध्याय तदेव सगुणमुपक्रान्तगुरुस्तवानुगुण्येन गुरुराजसंज्ञितं "पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षम्" इति "उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठ" मित्यादिभिर्लिङ्गैरनितरसाधारणैः श्रुत्या प्रकटितमादिदेशिकमखिलविद्याधीश्वरं प्रज्ञानघनं प्रभुं भगवन्तमुपश्लोकयति । वटेति । वटो न्यग्रोध इति पादपः वृक्षः तस्य मूलं बुध्नः गङ्गायां घोष इतिवत्तत्परिसरे लक्षणा । तस्मिन् सिंहासन इति ध्वन्यते पट्टपद्रं नित्यमूर्धाभिषिक्तं तन्निष्ठं सम्राजमखिलभुवननाथमित्यर्थः । स्फुटा प्रकटा चिन्मुद्रा बोधमुद्रा यस्य तं तन्मुद्रावहमिति यावत् उद्गूढा स्वीकृता मुनेर्वाचंयमस्येदं मौनं वाग्यमनमित्यर्थः । तदेव मुद्रा मर्यादा व्यवस्था सा येन तं वाग्यतमिति यावत् । कलितेन्दुकलं धृतचन्द्रलेखं कृपासमुद्रं निरवधिकरुणाशालिनमित्यर्थः । विनिद्रं जागरूकमाश्रितरक्षण इति बोध्यम् । कल्पकं अनिर्वचनीयविभवं देशिकं गुरुं श्रीदक्षिणामूर्तिं कलये ध्यायामि । कलिः कामधेनुः ॥ २ ॥

कमलाकुचकुम्भकुंकुमश्रीकलितोरस्स्थलमप्यरागयोगम् ।
करवै मुरवैरिणं महान्तं करुणार्द्रं हृदये कविं पुराणम् ॥ ३ ॥

एवं सर्वविद्यासम्प्रदायप्रथमाचार्यं भगवन्तमुपश्लोक्य प्रातिस्विक्येन वेदान्तविद्यागुरून् 'नारायणं पद्मभुवं वसिष्ठ''मित्यादिक्रमानुरोधेन तुष्टूषुरादौ हरिं प्रस्तौति । कमलेति । कमलाकुचकुम्भकुंकुमश्रीकलितोरःस्थलमपि लक्ष्मीवक्षोजकलशघुसृणरञ्जितवक्षस्तटमपि अरागयोगं रागानुबन्धरहितमिति विरोधः । वीतविषयतृष्णानुषङ्गं सहजशक्तिमन्तं विरक्तमिति परिहारः । करुणार्द्रं दयासरसं महान्तं बृहन्तं विश्वरूपतयेत्यर्थः । पुराणं चिरन्तनं कविमात्मविदं प्राज्ञमिति यावत् । "कविं पुराणमनुशासितार" मिति स्मृतेः । मुरवैरिणं विष्णुं हृदये मनसि करवै निःश्रेयससाधनब्रह्मविद्याप्राप्त्यै ध्यायानीत्यर्थः । स्वरितञितः इत्यात्मनेपदम् ॥ ३ ॥

गरुडाङ्कगभीरनाभिपद्मोदरभूगह्वरनिष्ठनैष्ठिकाग्र्यम् ।
चतुराननमाश्रयामि कामं चतुराम्नायवदावदं सदाऽपि ॥ ४ ॥



इत्थमतिचिराराधितमहेश्वरमहाप्रसादलब्धसर्वविद्यावैशारद्यस्य अनवरतप्रणिधानपराभूतविषयतृष्णस्य चिरन्तनमुनेरविशेषेण शुद्धाद्वैतशैवपाशुपतपाञ्चरात्रजैनबौद्धादिसर्वतन्त्रगुरोर्भगवतः कमलासनस्य विधातृध्यानमनुपविकब्रह्मविद्यैकप्रवचनमाम्नायरत्नरत्नाकरमानन्दपरमावधिमशेषभुवननिर्माणकर्मालङ्कर्माणमखिलविद्यास्वरूपसरस्वतीसहचरितधर्माणमद्वैतविद्यागुरुं ब्रह्माणमभिध्यायति—गरुडाङ्केति । गरुडो गरुत्मान् अङ्कः चिह्नं यस्य तस्य गरुडाङ्कस्य श्रियः पतेरित्यर्थः । गभीरा निम्ना या नाभिः प्रतारिका तस्यां यत् पद्मं गभीरनाभिपद्मं सप्तमीति योगविभागात् सुप्सुपेति वा समासः । तस्योदरभूरेव गह्वरं गुहा तन्निष्ठं नैष्ठिकानां समाहितानां अग्र्यमग्रेसरं पद्मनाभनाभिपद्ममध्यनिष्ठमहातपस्विनामित्यर्थः । सदापि अजस्रमपि कामं यथेष्टं चतुराम्नायवदावदं चतुर्वेदीप्रवचनधुरीणं "वदो वदावदो वक्ता" इत्यमरः । चतुराननं चतुर्मुखं आश्रयामि उपतिष्ठे ॥ ४ ॥

कुशिकप्रभवास्त्रशस्त्रपालीप्रशमाचार्यकसिद्धहस्तदण्डम् ।
शमवन्तमरुन्धतीसहायं शरणं यामि वसिष्ठमप्रमेयम् ॥ ५ ॥

सकलविद्यास्वरूपिण्या वाण्याः पतिं वाङ्मयस्य धातारं विधातारमुपश्लोक्य तदात्मजमात्मविदामग्रेसरं अनुशिष्टदाशरथिमरुन्धतीसहचरितधर्माणं भगवन्तं वसिष्ठमभिष्टौति—कुशिकेति । कुशिकप्रभवस्य विश्वामित्रस्य अस्त्राणां ब्राह्मनारायणादीनां शस्त्राणां शक्तिकुन्तप्रासादीनां पाल्याः आरभट्याः प्रशमाय विरामाय तादर्थ्ये चतुर्थी । आचार्यके आचार्यकरणे सिद्धः कृतहस्तः निपुणइतियावत् । हस्तदण्डः 'धारयेद्वैणवं दण्डं दर्भमुष्टिं कमण्डलुम् ।' इति स्मृतेः करगृहीतो लगुडः । यस्य तथोक्तं शमवन्तं शान्तं अत्र शमइत्यनेन दमविवेकविरागमुमुक्षातितिक्षोपरतिश्रद्धासमाधानादयोऽन्येऽपि ब्रह्मनिष्ठधर्मा उपलक्ष्यन्ते । अरुन्धतीसहायं अरुन्धतीसहचरमित्यर्थः । अप्रमेयं प्रमाणागोचरं वैभवइति बोध्यम् । ब्रह्मवर्चसे वा । वसिष्ठं मैत्रावरुणिं शरणं यामि गोप्तृत्वेन समुपैमि । 'श्रोत्रियं ब्रह्मनिष्ठं' इति श्रुतेः । विश्वामित्रास्त्रशस्त्रप्रशमनकथा तु रामायणादिभ्यो ज्ञेया ॥ ५ ॥

बहुमित्रसहक्षितीशपापापहसान्निध्यमरोध्यसत्प्रतापम् ।
महदाश्रितमन्त्रयन्त्रशक्तिं मनसा शक्तिमुपैमि सद्विरक्तिम् ॥ ६ ॥

अथ तत्पुत्रं शक्तिमभि स्तौति—बह्विति । बहूनि मित्रसहक्षितीशपापानि मित्रसहाख्यराजकल्मषाणि अपहन्ति विनाशयतीति अपहं सान्निध्यं सन्निधानं यस्य तं । दर्शनादेव मित्रसहभूपालपापापनोदनमित्यर्थः । अत्रेयं कथाऽनुसन्धेया । भगवान् वसिष्ठो रविवंश्येन मित्रसहभूपालेन निमन्त्रितस्तद्द्वेषिणा सूदव्यपदेशिना पुरुषादेन कमपि पुरुषं मिथो व्यापाद्य पक्के मानुषे पललै परिवेषिते पुरुषमांसेन पैतृकविधिमसहमानः शशाप तम् । स च मित्रसहः मदित्सया प्रतिशापस्य गृहीतशापोदकोऽपि सानुनयं साभ्यर्थनं च निवर्तितोऽमात्यैस्तदुदकं स्वस्यैव चरणयोर्विससर्ज । यदनेन कल्मापितावस्य चरणौ तदेष कल्मापपादस्मथः कोऽपि पुरुषादो भूत्वा शप्तुस्सुतमेव कदाचन हन्तुमुद्यतः । तेन समुपदिष्टसकलभुवनतत्त्वस्तत्याजाऽस्य वधोद्यमं सहैव विषयवाञ्छया शापादिव संसारादपि मुमुचइति । अरोध्यसत्प्रतापम् अनिवार्यसाध्वनुभावम् । महता वसिष्ठेनेत्यर्थः । आश्रिता प्रापिता मन्त्रयन्त्रशक्तिः यस्य तम् । वासिष्ठोपदिष्टश्रीविद्याश्रीचक्रादिपर्युपासनाप्रवृद्धासिध्यष्टकमिति यावत् । सद्विरक्तिं विरक्तं शक्तिन्तदाख्यं मुनिम्मनसा उपैमि आश्रयामि ॥६॥

पवनाकुलकाशलेशकल्पं प्रभवादेव पराहताशराशम् ।
प्रणमामि पराशरं मुनीशं प्रचरद्वैष्णवसंहितामकाशम्॥७॥

तत्सूनुं पराशरं स्तौति—पवनेति । प्रभवादेव जातमात्रइति यावत् । पवनाकुलकाशलेशकल्पं वायुविशीर्णजीर्णशरलवसदृशं यथा । पराहता शराशं तिरस्कृतराक्षसाभीष्टम् । अन्तर्वर्तिमात्ममातरमाक्रम्य जिघांसोः कल्मापपदस्य हुङ्कारेणैव परावृत्तिप्रयोजकतयाऽस्य पराशरइति नामापीति पौराणिकाः । प्रचरन्त्याः अद्यापि पठ्यमानायाइति यावत् । वैष्णव्याः संहितायाः विष्णुपुराणस्य प्रकाशः यस्मात्तम् । मुनीशं पराशरं प्रणमामि नमस्करोमि ॥७॥



निगमानपि योऽन्वशाच्चतुर्धा व्यधिताष्टादशधापि यः पुराणम् ।
स च सात्यवतेय ईप्सितं मे सकलाम्नायशिरोगुरुर्विधत्ताम् ॥८॥

एवमा चन्द्रशेखरादा च पराशरादाचार्याननुपस्तुत्य साम्प्रतमद्वैतविद्याचार्यमतीतपराशरात्मजमखिलब्रह्मसूत्रकर्तारं कृष्णद्वैपायनमुपतिष्ठते—निगमानिति । यः निगमानपि 'अनन्ता वै वेदा' इति दुरधिगमसङ्ख्यानपीत्यर्थः । वेदान् चतुर्धा ऋग्यजुस्सामाथर्वणामिति चतुर्भिः प्रकारैरन्वशात् अनुशिष्टवान् शास्तेरनुपूर्वाल्लुङ् । अपि च यः पुराणं तत्संज्ञं वाङ्मयमेकवचनस्वारस्यादादावखण्डमेकमेव स्थितमिति गम्यते । अष्टादशधा ब्राह्माद्यष्टादशप्रकारं । व्यधित विहितवान् । "अष्टादश पुराणानि कृत्वा सत्यवतीसुतः । भारताख्यानमखिलं चक्रे तदुपबृंहणम् ॥" इत्याद्यनुशासनात् । आदावेकत्वेन स्थितं पुराणमष्टादशधा विभक्तवानिति यावत् । दधातेर्विपूर्वकादात्मनेपदे लुङ् । सकलाम्नायशिरोगुरुः सर्ववेदान्तदेशिकः सः प्रसिद्धः सात्यवतेयः वासवीसुतो व्यास इत्यर्थः । मे ईप्सितमिष्टं विधत्तां पुष्णातु पूरयत्वित्यर्थः । चो वाक्यालङ्कारे ॥ ८ ॥

जननीजठरादिव च्यवन्यो जगतो नाद्रवदात्मनिद्विषद्भ्यः ।
अनहन्तमहन्तमात्मवन्तं भगवन्तं शुकमाश्रये प्रशान्तम् ॥ ९ ॥

एवमखिलवेदान्तगुरुमच्युतज्ञानशक्त्यवतारमनुकीर्त्य पाराशर्यमखिलभूतभावनं भूतहृदयं 'शुको मुक्त' इति श्रुतेरात्मविदामग्रेसरं व्यासात्मजत्वेन प्रसक्तं भगवन्तं शुकमुपतिष्ठते—जननीति । जननीजठरादिव मातृगर्भादिव जगतस्सर्वोपद्रवनिदानात्संसारात् आत्मयाथात्म्यानवगतिनिबन्धनात् च्यवन् निष्क्रामन् यः आत्मवित् आत्मानमेवाखिलं पश्यन्निति यावत् । विपद्भ्यः प्रमातृत्वाद्यनर्थराजिभ्यः नाद्रवत् नामुह्यत, न शोकमोहाद्यभिभूतोऽभवदित्यर्थः । तथा च श्रुतिः—'यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥' इति । अत्रेवशब्दः समुच्चयार्थकः । तथाह हेमचन्द्रः शब्दानुशासने—'समुच्चयेऽप्ययमिवकारः यथा 'चैत्र इव मैत्रो गच्छती'ति । अत्र चैत्रमैत्रौ गच्छत इति

समुच्चयार्थकोऽयमिवशब्दः' इति । अहं ब्रह्मविद्यामधिजिगांसमानः शिष्य इत्यर्थः । अनहन्तमहङ्कारविरहितम् । आत्मवन्तं धीरं 'श्रेयो हि धीरो अभिप्रेयसो वृणीते' 'मत्वा धीरो हर्षशोकौ जहाति' 'तस्य धीराः परिजानन्ति योनिम्' इत्यादिश्रुतिभ्यो धीरस्यैव मोक्षलाभौचित्यात् । प्रशान्तं प्रक्षीणविषयतृष्णं भगवन्तं 'उत्पत्तिं च विनाशं च भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च यो वै स भगवान् स्मृतः ॥' इत्युक्तलक्षणं तं शुकं बादरायणिमाश्रये आत्मयाथात्म्यावगमाय शरणं यामीत्यर्थः ॥ ९ ॥

अभियुञ्जदयाचर्यपूज्यपादानपलून्यादिनिपाकसिद्धनेतॄन् ।
अथ गौडपदान् फणीशभाष्यप्रथमाचार्यकपण्डितान् प्रपद्ये ॥ १० ॥

इत्थमाचन्द्रशेखरादा च शुकब्रह्मर्षेः वंशर्षिपरम्परामद्वैताचार्यपारंपर्यां प्रतिपाद्य परं तच्छिष्यपरम्परामप्याचिख्यासुर्विदितवेदितव्यान् परापरविदः परमाचार्यान् गौडपदान् प्रस्तौति—अभियुञ्जदिति । अथ अविच्छिन्नपरम्परानुकीर्तनसमनन्तरमिति यावत् । अभियुञ्जता विद्यायात्मानमुपनिरुन्धता अयाचर्येण तदभिधेन हिमालयशृङ्गवृत्तिशुद्धसिद्धसमानायकेन पूज्यौ सेव्यमानौ पादौ येषां तान् । अपलून्यः तदाख्यः कश्चित् । आदिः मुखं येषां तेषां निपाकसिद्धानां अपरान्त्ययोगिनां प्रावृतिप्रभृतीनामित्यर्थः । नेतॄन् अनुशासितॄन् अध्यात्मविद्याध्यापनेनेति यावत् । फणीशभाष्यस्य पतञ्जलिकृतमहाभाष्यस्य प्रथमाचार्यके आद्यप्रवचने चन्द्रशर्मण इति शेषः । पण्डितान् समर्थान् गौडपदान् तदभिधान् आचार्यान् मर्यादायां बहुवचनम् । प्रपद्ये शरणं व्रजामीत्यर्थः । अयं किल गौडपदः पुरा स्वयमेव शेषरूपमवतिष्ठमानेन भगवता पतञ्जलिना प्रोच्यमाने स्वकृतौ महाभाष्ये तच्छात्रेष्वन्यतमः प्रथमकृते परापतितः प्रवचनस्थलान्निवृत्य निर्दश्येष्ववगणिताचार्यनिर्देशमपनीतजवनिकेष्वतितिग्मविषानलेन निरवशेषेषु सब्रह्मचारिषु भक्तिमापन्नस्य पश्चात्तापिनो गुरोः शापाद्ब्रह्मराक्षसीभावः परं तस्यैव प्रणिपातप्रसन्नमनसः 'सदृशाधिकारिसम्प्रवेशितस्वभाष्यसंपूर्णप्रवचनावधिरस्त्वसौ शाप' इत्यनुगृहीतः समुचिता-



धिकारिणे प्रणिगद्य चन्द्रशर्मणे पातञ्जलं महाभाष्यमवमुक्तस्वशापादारुह्य हिमालयाद्रिशृङ्गमवलोकितशुकर्षिप्रसादसमासादितसंयममाचरन्ननवरतमनुसन्धानमात्मयाथात्म्यस्य सकाश एव क्वचन दुर्गे समाकलितसंस्थानानां तक्षशिलाधीशशाक्यप्रावृतिप्रमुखैरपलून्यदाधीशाद्यपरान्त्ययोगिसंघैश्च समुपसेव्यमानानामयाचर्यप्रमुखानामनुगतशौद्धोदनिकदर्शनामभियोगतः प्रविनष्टदुर्मतदुरभिनिवेशानां पुनरापतितस्य प्राच्यशिष्यस्य चन्द्रशर्मणः स्वस्मादेव गृहीतसंयमस्य समाश्लिष्टगोविन्दनाम्नश्च प्रत्यहमुपादिश्यमानपरमाद्वैतविद्यासम्प्रदायश्चिरं सुखमुवासेति हरिमिश्रीयगौडपदोल्लासपतञ्जलिविजयादिषु निरूप्यमाणा कथाऽत्रानुसन्धेया ॥ १० ॥

हरितल्पहरांघ्रिनूपुरक्ष्माधरसौमित्रिबलात्रिपुत्रलक्ष्मा ।
जयतादुपरेवमात्तधामा जयगोविन्दमुनिस्स चन्द्रनामा ॥ ११ ॥

अथ तदन्तेवासिनं चन्द्रमनुसंयममागृहीतगोविन्दनामानं तदुत्तराचार्यतया प्रस्तौति—हरीति । हरितल्पं विष्णुशय्या हरांघ्रिनूपुरं शिवचरणमञ्जीरः क्ष्माधरः भूमण्डलीवहः सौमित्रिः लक्ष्मणः बलः बलरामः अत्रिपुत्रः आत्रेयः पतञ्जलिरिति यावत् । इति लक्ष्म लक्षणम् उपाधय इत्यर्थः । यस्य तथोक्तः । अनेनास्य शेषावतारत्वमुक्तम् । तदुक्तं प्राचीनशङ्करविजये—"गोविन्दमाश्रयदहीन्द्रमहावतारमारात्तुपास्करदेहभुवस्तटिन्याः । अध्यात्मजेन गलितात्मभवाभिमानेनाराधितं च हरिणा नियमं श्रितेन ॥' इति उपरेवं नर्मदानदीसमीपे आत्तधामा सम्पादितोटजः । चन्द्रनामा तदभिधः पूर्वाश्रम इति यावत् । सः जयगोविन्दमाचष्टे इति जयगोविन्दः स चासौ मुनिश्च जयगोविन्दमुनिः श्रीगोविन्दभगवत्पादापरपर्यायः संयमी जयतात् सर्वोत्कर्षेण वर्तताम् । अद्वैतपरमात्मार्थित्वेनेत्यर्थः । तदुक्तं प्राचीनशङ्करविजये--"सततं निगदन्नपि योऽसौ 'जयगोविन्द जये'ति सूक्तिमेकाम् । श्रितमौनमभूयदन्यवादे जयगोविन्दमुनिं तदाहुरेनम् ॥ ११ ॥

प्रभवात्परमार्थसंग्रहाच्च प्रणयस्थानमवाप्य सिद्धशिष्यः ।
विरतक्षितिरक्षणो विरक्त्या हरिरंहो मम वृंहतां स्वशक्त्या ॥ १२

आचार्यपरम्पराऽपरिगणितत्वेऽप्यपरोक्षसाक्षात्कारवतः आमुक्तकुस्यसामान्यस्यात्मयाथात्म्यविदः आत्मसदृशमभेददर्शिनो भर्तृहरेः प्रसक्तानुप्रसक्त्या प्रणिध्यानमाह—प्रभवादिति । अमुष्य प्रागुक्तस्य श्रीगोविन्दमुनेः प्रभवाज्जननात् चन्द्रशर्मण एव सुताः भर्तृहरिविक्रमभट्टिवररुचय इति वृद्धाः । परमार्थसङ्ग्रहाच्च सर्वोत्तरब्रह्मविद्यापरिग्रहाच्च सिद्धशिष्यः नित्यान्तेवासी । यद्वा सिद्धः कायकल्पादिना निरस्तजरामरण इति यावत् । अत एव प्रणयस्थानं प्रेमपात्रं विरक्त्या विषयोपभोगवैतृष्ण्येन विरतक्षितिरक्षणः निरस्तराज्यचिन्ताभारनिर्वृत इति यावत् । हरिर्भर्तृप्रपञ्चः वाक्यपदीयादिमहाप्रबन्धनिर्मातेति यावत् । स्वशक्त्या स्वात्मयाथात्म्यभावनया मम अंहः दुरितं तूंहतां हिनस्तु दूरीकरोत्वित्यर्थः ॥ १२ ॥

कलिना बलिनाऽखिले खिलेऽपि स्खलिते श्रौत्रपथेऽपथे प्रवृद्धे ।
जपहोमतपस्सु नामशेषेष्वपि यातेषु सुभाषितेषु शोषम् ॥ १३ ॥

इत्यादिमान् सर्वाद्वैतविद्याचार्याननुपसंवर्ण्य साम्प्रतमद्वैतविद्याचार्यान् भाष्यकृतः प्रवृत्तिमतिविस्तरात् प्रस्तोतुमुपक्रमते कलिनेत्यादिभिः षड्भिः कुलकेन—कलिनेति । बलिना बलवता विश्रृङ्खलप्रसरेणेत्यर्थः । कलिना युगेन अखिले समस्ते श्रौत्रपथे वैदिकमार्गे खिले असमग्रे स्खलितेऽपि गलिते च सत्यपथे अवैदिकमार्गे प्रवृद्धे प्रचिते जपेषु गायत्र्याद्यजपान्तेषु होमेषु दर्विहोमादिषु तपस्सु पाराकादिषु च नामशेषेषु अभिख्यामात्रवृत्तिषु विलुप्तेष्विति यावत् । सुभाषितेष्वप्याचार्योपदेशादिषु च शोषं प्रलयं यातेषु गतेषु ॥ १३ ॥

जिनबुद्धकपालिशक्तिवह्नीन्दिनसेवासु समन्ततः श्रितासु ।
शिथिले द्विजवेदवेदिवादे प्रथिते चाद्वयवेदबाह्यमोदे ॥ १४ ॥

जिनेति । जिनः समन्तभद्रः बुद्धः गौतमः शौद्धोदनिरित्यर्थः । कपाली संहारभैरवः शक्तिः कुलाङ्गना वामरीत्योपासितेति यावत् । वह्निः धारणादिना सेवित इति ज्ञेयः । इन्दुश्चन्द्रमाः इनस्सूर्यः एषां सेवासु वेदबाह्यतन्त्रानुसारेण वरिवस्यासु । समन्ततः सर्वत्र श्रितासु सेवितासु जनैरिति शेषः । द्विजवेदवेदिवादे द्विजा एव वेदवेदिनः आम्नायविदः तेषां वादे विचार इति यावत् । शिथिले श्लथे अद्वयः उपरोधदुःखाद्यसंभिन्न इत्यर्थः । वेदबाह्यमोदः बौद्धाद्यवैदिकजनानन्दः तस्मिन् प्रथिते च प्रसिद्धे च । तथा चोक्तमाचार्यविजये—"श्रुत्याचारं परित्यज्य मिथ्याचारं समाश्रिताः । विप्रादयो विचित्रैस्तु लिङ्गैस्सन्तप्तदेहिनः । हुतं नैव यथाकालमग्नौ हव्यं स्वमन्त्रतः । लिङ्गिनो वयमित्युच्चैरभिमानान्नराधमाः ॥ न दत्तं पर्वणि प्राप्ते कव्यं पित्रादितृप्तये । नाध्यापनं नाग्रयणं न सन्यासं कदाचन ॥ करोति मनुजः कश्चित् सर्वे पाषण्डतां श्रिताः । विष्णुदासा वयञ्चेति वयमीशानलिङ्गिनः ॥ भैरवार्कगणेशानां देव्या भक्ताश्च केचन । केचित्कापालिकाचारा मद्यमांसाशिनस्तथा ॥ एकस्यैव मतस्यापि भेदषट्कं समाश्रिताः ॥'इत्यादि ॥ १४ ॥



जगदीक्षणविह्वलामृतान्धोनिगदव्यक्तकृपारसानुबन्धम् ।
प्रणिदिश्य गुहं पुरैव गन्तुं प्रणिबन्धुं च मखान् द्विषश्च यन्तुम् ॥

जगदिति । जगतः अनन्तरोदीरितविविधवैरूप्यभृतः प्रपञ्चस्य ईक्षणादवलोकनात् विह्वलाः वैक्लव्यं प्राप्ताः हव्यकव्याद्यभावादित्यर्थः । ये अमृतान्धसः सुराः ब्रह्मेन्द्रादयस्तेषां निगदैः स्तुतिसम्बन्धिभिः पाठैरित्यर्थः । व्यक्तः स्पष्टीकृत इति यावत् । कृपारसस्य करुणाख्यभावस्य अनुबन्धः अनुषङ्गः यस्मिन् कर्मणि तद्यथा भवति तथा पुरैव स्वावतारात्प्रागेवेत्यर्थः । गन्तुं यातुं महीमिति शेषः । मखान् सोमादिक्रतून् प्रणिबन्धुं च पुनराचारे स्थापयितुञ्च द्विषः तत्प्रतिबन्धिनो बौद्धादीन् यन्तुञ्च प्रशमयितुञ्च गुहं सुब्रह्मण्यं प्रणिदिश्य आज्ञाप्य ॥ १५ ॥

अवतार्य सुरान्परांश्च पूर्वं विधिविष्ण्विन्द्रमुखान् विनोदपूर्वम् ।
स्वयमप्यवतीर्य सत्युसार्यामितुः श्रीशिवशर्मणो विचार्य ॥ १६ ॥

अवतार्येति । परान् तदितरान् विधिविष्ण्विन्द्रमुखान् ब्रह्मभाववासवप्रभृतीन् सुरांश्च देवानपि पूर्वं प्रथममवतार्य भुवं प्रापय्य आज्ञया न त्वनुनयैरिति गम्यते । विचार्य आलोच्य विनोदपूर्वं लीलयैवेत्यर्थः । स्वयमपि अ-

वेतीर्थे भुवं प्राप्य सुत्युः सुतमात्मन इच्छतः सुतार्थं तपस्यत इत्यर्थः । आ-
र्यकमितुस्तदाख्यायाः ब्राह्मण्याः पत्युः श्रीशिवशर्मणः श्रीमतः शिवना-
म्नो विप्रस्य ॥ १६ ॥

उदभूत्सदने निटालदृग्यो मदभाजां सुधियां प्रमाथयोग्ये ।
शिशुरर्पयतान्मुमुक्षुभाग्यं सशिवं शङ्करदेशिकस्सुभोग्यम् ॥ १७ ॥

उदभूदिति । मदभाजां दुर्गृहीतविद्यावलेपानामित्यर्थः । सुधियां मे-
धाविनां प्रमाथयोग्ये विलोडनार्हे विद्यावलेपविलोपनोचित इत्यर्थः । सदने
गेहे शिवशर्मणइति पूर्वेणान्वयः । यो निटालदृक् फालेक्षणः उदभूदुत्पन्नः ।
मुमुक्षूणां मोक्षेच्छूनां भाग्यं भागधेयमिव स्थितइत्यर्थः । शिशुः उत्तानशा-
यिसमवस्थः सः शङ्करदेशिकः तदाख्यो गुरुश्शङ्कराचार्यइति यावत् । सु-
भोग्यमविच्छिन्नानुभवार्हं नित्यमित्यर्थः । शुभमात्मबोधरूपं निश्श्रेयसमर्पय-
तात् वितरतु । ममेति शेषः । उक्तमिदं सर्वं प्राचीनशङ्करविजये—'श्री-
शोऽभूत्ससनन्दनः कमलभूर्जज्ञे तथा मण्डनः सन् हस्तामलको बभूव पव-
नोऽप्यासीदुदङ्कोऽनलः । सोऽप्यानन्दगिरित्वमाप धिषणो भेजे गुहो भट्ट-
तामीशादेशवशात् सचित्सुखवपुर्जातः प्रचेता अपि ॥ मृत्युः पृथ्वीधव इति
धर्मोऽप्यात्रभो विश्वरूपो दध्रे येनाखिलजिनजिता तत्प्रतापाख्यदाम । लै-
खाश्चान्ये निगमपदवीमिन्दुसूर्येन्द्रशेषप्रख्याः प्रख्यापयितुमुदिताः खण्डनै-
र्मण्डनैश्च ॥' इत्युपक्रम्य । कालटीविषयवर्णनानन्तरं कुमारिलोद्यमान् य-
थाक्रमान्निरूप्य ॥' 'अत्रान्तर इत्यादिना । "ईशोऽप्यभूत्समदविद्वदभेद्य-
दर्पसर्पाहितुण्डिकविदग्धसहस्रसेव्ये । विद्याधिपत्यपरनाम्नि कुले शिवा-
ख्यादार्यापते रविसहस्ररुचिः कुमारः ॥ तिष्ये प्रयात्यनलशेवधिबाणनेत्रे
(२५९३) यो नन्दने दिनमणावुदगध्वभाजि । राधेऽदितेरुडुनि निर्गतम-
स्तलग्नेऽप्याहूतवाञ्छिवगुरुस्स च शङ्करेति ॥' इत्यन्तेन ॥ अस्मिन्नेव प्रक-
रणेऽन्योन्यं नामसाम्यादन्यूनानधिकविभवत्वादमानुषाशेषकृत्यवत्त्वाच्च 'नि-
जतातमृतेः परं प्रकाशे गजगर्भे त्रिशरद्विपच्यकोशे ॥ ' इत्यादिना मूल-
कारेणैव प्रपञ्चयिष्यमाणेभ्यो नवशङ्करेन्द्रादिभ्योऽस्य भेदाग्रहेण जन्मदि-



ग्विजयनिर्याणप्रमुखेषु स्थलेषु तयोर्द्वयोरपि वृत्तजातमेकतस्संकुलीकृत्य नि-
बन्धुरस्य किमपि किमप्यर्वाचीनाः अविदितभुवनवृत्तान्ताः कतिपये कव-
य इत्यवगन्तव्यम् ॥१७॥

उपनीय दिवं गते स्वताते व्यपदिश्यागमसंग्रहेऽप्यतीते ।
निजमातरमन्वमीमनद्यो नियमाप्तिं स मुदे ममास्तु सद्यः ॥१८॥

इत्यवतारकथावर्णनात्परमस्य संयमप्राप्तिमाह—उपनीयेति ॥ यः
स्वताते शिवगुरौ उपनीय आत्मानमिति शेषः । दिवं गते स्वर्गं प्राप्ते आ-
गमसङ्ग्रहेऽपि विद्याग्रहणेऽपि गुरुकुलवासादिति शेषः । अतीते अतिक्रान्ते
परिसमापितइति यावत् । तथोक्तं प्राचीनशङ्करविजये—'चौलं कर्म समाप्य
चोपनयनं ताते दिवं प्रस्थिते मात्राज्ञां शिरसा प्रगृह्य समगात्तूर्णं गुरूणां
कुलम् । तत्राध्यायपरो यथाविधिचरन् भिक्षां जटी मेखली दण्डी सर्वकलासु
शास्त्रगहनेष्वप्यप्रधृष्यो बभौ ॥' इत्युपक्रम्य सर्गमध्ये—'इत्याचार्यकुलं
विसृज्य जननीमाप्ताष्टमाब्दः स्वयं प्राप्तस्संयमवाञ्छया व्यरचयत्तन्त्रं कि-
मप्यञ्जसा । चूर्णीमन्तिकमानिनाय जननीधाम्नः स्वराजः प्रभोः किं वा दु-
ष्करमत्र सर्वजगतीजालक्रियाशीलिनः ॥ स्नानायैव गतोऽवगाहनविधौ
ग्राहग्रहार्तिं पदे मात्रे काञ्चिदिवोपदर्श्य मधुरं लब्ध्वाऽभ्यनुज्ञां ततः । प्रैषो-
च्चारणपूर्वकं सनियमं जग्राह हृष्टान्तरो नक्रस्सोऽप्यमुचत्स्वशापविकृतिं पा-
दावमर्शात् प्रभोः ॥' इत्यादिना ॥ 'यत्त्वन्ये नास्य गुरोः पितुस्सान्निध्य-
मुपनयनावसरे निरूपितमभियुक्तैः । तथाहि ॥ 'कल्यादिमे महादेवि सह-
स्रद्वितयात्परम् ॥ **** ॥ केरले शशलग्रामे विप्रपत्न्यां मदंशजः । भ-
विष्यति महादेवि शङ्कराख्यो द्विजोत्तमः ॥ उपनीतस्तथा मात्रा वेदान्
साङ्गान् ग्रहीष्यति ॥' इति । आचार्यविजये च ॥ 'तृतीये वर्षे चौल-
कर्म पञ्चमे मौञ्जीबन्धं विध्युक्तितश्चक्रुर्विप्रमात्राः ॥' इति व्यासाचलीयेऽ-
पि ॥ "शिवगुरुस्सजरंस्त्रिसमे शिशावमृत कर्मवशास्सुतमोदितः । उपनि-
नीषितसूनुरपि स्वयं न हि यमोऽस्य कृताकृतमीक्षते ॥' इति ॥ केरली-
यशङ्करविजयेऽपि—'पञ्चमाब्दे निजं पुत्रमुपनेतुमना द्विजः । पञ्चत्वमग-

मत् सद्यः कालो हि दुरतिक्रमः ॥' इति । एवमेव दृश्यन्तेऽन्ये लौकिका अपि प्रवादाः । तद्यदुक्तं 'उपनीय दिवं गत' इत्यादि तदसदित्याहुः । तदज्ञानविजृम्भितमज्ञपरंपरैकपरिशीलनीयमनुलपितम् । यदुपनयनात्परमुपक्रान्तस्वतनयाध्यापनस्य शिवगुरोः स्वर्गप्राप्तिमाहुरनुक्षणमुपचरिताचार्यचरणाः सर्ववृत्तान्तसाक्षिणः सहजवदेकाग्रहारोत्पन्ना आजीवमविरहयुजः श्रीसर्वज्ञचित्सुखाचार्याः स्वकृतौ बृहच्छङ्करविजये ॥ "शिवगुरुरुपनीय शङ्करार्यं निगममशेषमथाध्यजीगपत्तम् । नियतिरिदमसासहिर्हि भीचा नियतमनीनयदन्तरे गुरुं द्याम् ॥' इत्यनेन समुदाहृतप्राचीनशङ्करविजयश्लोकेन च तत्सान्निध्यस्य प्रतिपादितत्वात् तत्प्रतिपादितानां प्रबन्धानां बहुविरुद्धकथांशनिबन्धनेनाप्रामाण्यस्य प्रागेव जनिकथाप्रसङ्गे निरूपितत्वात् शिवरहस्यवचनस्यापि 'उपनीतस्तथा मात्रे'त्यस्य मात्रा गुरुकुलं प्रापितइत्यर्थस्य सुवचत्वाच्च मूलकारोक्तमेव समञ्जसमिति सर्वमनवद्यम् ॥ व्यपदिश्य ग्राहग्रहादिव्याजं प्रदर्श्य । निजमातरं स्वजननीं नियमाप्तिं संयमग्रहणं संन्यासमिति यावत् । अन्वमीमनत अनुमानितवान् । सः सद्यः अधुनैव मम मुदे निरातिशयानन्दाय मोक्षायेत्यर्थः । अस्तु भवतु ॥१८॥

**प्रतिचन्द्रभवं निवृत्तिधर्मा श्रितगोविन्दमुनेरवाप्तधर्मा ।**
**जयतात्कृतसूत्रभाष्यकर्मा स्वयमन्तेवसतां वितीर्णशर्मा ॥ १९ ॥**

एवमस्य प्रेषोच्चारणप्रकारमुपपाद्य क्रमसंन्यासग्रहणभाष्यकरणप्रवचनाद्युपन्यस्यति—प्रतीति । प्रतिचन्द्रभवं नर्मदानदीसकाशे श्रितात् उपसंगृहीतात् गोविन्दमुनेः तदाख्यात् 'हरितल्पे'त्यादिना प्राङ्निरूपितात् शेषावतारात् श्रीगोविन्दभगवत्पादेभ्यइत्यर्थः । अवाप्तधर्मा आत्तक्रमसन्न्यासपद्धतिः । 'धर्मादनिच्केवलादि'त्यनिच् । धर्मश्चात्र मौलाम्नायिकः । तदुक्तं प्राचीनशङ्करविजये—'जग्राहानुग्रहैकप्रवणान्निजधियः शेषमूर्तेः शमीन्द्रात् श्रीगोविन्दादशेषान् शमधनानियमान् सार्धमाम्नायधर्मैः । मौलाम्नाये समध्ये रतिमधिकमधाद्गुरोरा च विष्णोरभ्यस्तेऽन्यानपीच्छञ्जगति कलयितुं विस्तरेणाध्यगीष्ट ॥' इति मौलाम्नायश्च बृहच्छङ्करविजये श्रीशङ्कराचार्यसत्पथे सविस्तरं निरूपितः ।



'मध्यमो मौल आम्नायः आम्नायानामनूपमः । अनुष्ठितोऽस्मदाचार्यैराविष्णोरा च नो गुरोः ॥ अस्मिन्नितः परं स्थाप्याः ब्रह्मचर्याद्धि संयताः । क्षेत्रं सत्यव्रतं नाम तीर्थं कम्पानदी परा । देवस्तत्र तथैकाम्रनाथ ऋग्वेदईरितः । शक्तिः श्रीकामकोट्येव प्रणवश्चोपदेश्यवाक् ॥ शुद्धा सरस्वती चेन्द्रानन्दपूर्वा च भारती । भगवत्पाद इत्यादिनामान्यन्यानि च स्वतः ॥ मिथ्या वारस्सम्प्रदायः परिव्राजकसंज्ञितः । आचार्यश्शङ्करस्साक्षाद्ब्रह्माद्वैतप्रवर्तकः ॥ सोऽयं हि भगवत्पादैः स्वकीयत्वेन संस्तुतः । सर्वोत्तरः सर्वसेव्यः कामकोष्ठपरातले । पराशक्तेः परे स्थाने श्रीकाञ्च्यां शारदामठे ॥' इति । निवृत्तिधर्मा सर्वोदासीनचित्तवृत्तिः स्वयं कृतसूत्रभाष्यकर्मा विरचितब्रह्मसूत्रव्याख्यानइत्यर्थः । अन्तेवसतां पद्मपादादीनां वितीर्णशर्माऽर्पितसुखस्थितिः सन् जयतात् सर्वोत्कर्षेण वर्तताम् । अर्थान्तरे वृत्तेरिति जयतेरकर्मकत्वम् ॥ १९ ॥

**कुहनान्त्यजविश्वनाथसृष्टो द्रुहिणव्यासवरोदितानुशिष्टः ।**
**ममतां मम तावदेष भिन्द्यान्नमतश्चोपरतिं ददात्वनिन्द्याम् ॥२०॥**

अथ तस्य ब्रह्मव्यासप्रसादाभ्यामायुर्द्वैगुण्यप्राप्तिमाह—कुहनेति । कुहनाऽन्त्यजेन कपटचाण्डालरूपिणा विश्वनाथेन विश्वेश्वरेण सृष्टः सृजिः प्रेरणार्थः प्रेरित इति यावत् । धातूनामनेकार्थत्वात् । 'सृजिर्निदेशार्थकोऽपीति वामनश्च । विस्तृतमिदं व्यासाचलीये—'सोऽन्त्यजं पथि निरीक्ष्य चतुर्भिर्भीषणैः श्वभिरनुव्रतमारात् । गच्छ दूरमिति तं निजगाद प्रत्युवाच स च शङ्करमेनम् ॥ अद्वितीयमनवद्यमसङ्गं सत्यबोधसुखरूपमखण्डम् । आमनन्ति शतशो निगमान्तास्तत्र भेदकलना तव चित्रम् ॥ दण्डमण्डितकरा धृतकुण्डाः पाटलाभवसनाः पटुवाचः । ज्ञानगन्धरहितागृहसंस्थान्वञ्चयन्ति किल केचन वेषैः ॥ गच्छ दूरमिति देहमुताहो देहिनं परिजिहीर्षसि विद्वन् । भिद्यतेऽन्नमयतोऽन्नमयं किं साक्षिणश्च यतिपुङ्गव साक्षी ॥ ब्राह्मणश्वपचभेदविचारः प्रत्यगात्मनि कथं तव युक्तः । बिम्बितेऽम्बरमणौ सु-

रनद्यामन्तरं किमपि चास्ति सुरायाम् ॥ शुचिर्द्विजोऽहं श्वपच व्रजेति मि-
थ्याग्रहस्ते मुनिवर्य कोऽयम् । सन्तं शरीरेष्वशरीरमेकमुपेक्ष्य पूर्णं पुरुषं पुरा-
णम्॥अचिन्त्यमव्यक्तमनन्तमाद्यं विस्मृत्य रूपं विमलं विमोहात्।कलेबरेऽस्मि-
न् करिकर्णलोलाकृतिन्यहन्ता कथमाविरास्ते॥ विद्यामवाप्यापि विमुक्तिपद्यां
जागर्ति तुच्छा जनसङ्ग्रहेच्छा । अहो महान्तोऽपि महेन्द्रजाले मज्जन्ति
मायाविवरस्य तस्य ॥ इत्युदीर्य वचनं विरतेऽस्मिन् सत्यवाक्तदनु विप्रति-
पन्नः । अत्युदारचरितोऽन्त्यजमेनं प्रत्युवाच स च विस्मितचेताः ॥ सत्य-
मेव भवता यदिदानीं प्रत्यवादि तनुभृत्प्रवरैतत् । अन्त्यजोऽयमिति सम्प्रति
बुद्धिं सन्त्यजामि वचसाऽऽत्मविदस्ते ॥ जानते श्रुतिशिरांस्यपि सर्वे मन्वते
च विजितेन्द्रियवर्गाः । युञ्जते हृदयमात्मनि नित्यं कुर्वते न धिषणामपभेदाम् ॥
भाति यस्य तु जगद्दृढबुद्धेः सर्वमप्यनिशमात्मतयैव । सद्द्विजोऽस्तु भवतु श्व-
पचो वा वन्दनीय इति मे दृढनिष्ठा ।या चितिः स्फुरति विष्णुमुखे सा पुत्तिकाव-
धिषु सैव सदाऽहम् । नैव दृश्यमिति यस्य मनीषा पुल्कसो भवतु वा स
गुरुर्मे ॥ यत्र यत्र च भवेदिह बोधः तत्तदर्थसमवेक्षणकाले । बोधमात्र-
मवशिष्टमहं तद्यस्य धीरिति गुरुस्स नरो मे ॥ भाषमाण इति तेन कला-
वानेष नैक्षत तमन्त्यजमग्रे । धूर्जटिं तु समुदैक्षत मौलिस्फूर्जदैन्दवकलं स-
ह वेदैः ॥ भयेन भक्त्या विनयेन धृत्या युक्तस्स हर्षेण च विस्मयेन । तु-
ष्टाव शिष्टानुमतः स्तवैस्तं दृष्ट्वा दृशोर्गोचरमष्टमूर्तिम् ॥ दासस्तेऽहं देह-
दृष्ट्याऽस्मि शम्भो जातस्तेंऽशो जीवदृष्ट्या त्रिदृष्टे । सर्वस्यात्मन्नात्मदृ-
ष्ट्या त्वमेवेत्येवं मे धीर्निश्चिता सर्वशास्त्रैः ॥ यदालोकादन्तर्बहिरपि च
लोको वितिमिरो न मंजूषा यस्य त्रिजगति न शाणो न च खनिः । यतन्ते
चैकान्तं रहसि यतयो यत्प्रणयिनो नमस्तस्मै स्वस्मै निखिलनिगमोत्तंसम-
णये ॥ अहो शास्त्रं शास्त्रात्किमिह यदि न श्रीगुरुकृपा विना सा किं
कुर्यान्ननु यदि न बोधस्य विभवः : किमालम्बश्चासौ न यदि परतत्त्वं मम
तथा नमः स्वस्मै तस्मै यदवधिरिहाश्चर्यधिषणा ॥ इत्युदारवचनैर्भगवन्तं सं-
स्तुवन्तमथ च प्रणमन्तम् । बाष्पपूर्णनयनं मुनिवर्यं शङ्करं सबहुमानमुवाच॥



अस्मदादिपदवीमभजस्त्वं शोभिता तव तपोधननिष्ठा । बादरायण इव
त्वमपि स्यास्सद्गुरोऽद्य मदनुग्रहपात्रम् ॥ संविभज्य सकलश्रुतिजालं ब्रह्म-
सूत्रमकरोदनुशिष्टः । यत्र काणभुजसाङ्ख्यपुरोगाण्युद्धृतानि कुमतानि समू-
लम् ॥ तत्र मूढमतयः कलिदोषात् छिन्नवेदवचनोद्बलितानि । भाष्यका-
ण्यरचयन् बहुबुद्धैर्दूष्यतामुपगतानि च कैश्चित् ॥ तद्भवान् विदितवेदशि-
खार्थः तानि दुर्मतिमतानि निरस्य । सूत्रभाष्यमधुना विदधातु श्रुत्यु-
पोद्बलितयुक्त्यभियुक्तम् ॥ एतदेव विबुधैरपि सद्भिरर्थनीयमनवद्यमुदारम्।
तावकं कमलयोनिसभायामप्यवाप्स्यति परां वरिवस्याम् ॥ मोहसन्त-
मसवासरनाथांस्तत्र तत्र विनिवेश्य विनेयान् । पालनाय परतत्त्व-
सरण्याः मामुपैष्यसि ततः कृतकृत्यः ॥ एवमेनमनुगृह्य कृपावानाग-
मैस्सह शिवोऽन्तरधत्त । विस्मितेन मनसा सह शिष्यैः शङ्करोऽपि
सुरसिन्धुमयासीत् ॥" इति ॥ द्रुहिणव्यासयोः ब्रह्मबादरायणयोः वरो-
दिताभ्यां प्रसादवचनाभ्यां अनुशिष्टः नियुक्तइत्यर्थः । साक्षात्कृतब्र-
ह्मविष्णुरुद्रइति प्रतिपादयितुं विशेषणद्वयम् । एषः भाष्यकर्तेति यावत् ।
नमतः नमस्कारं कुर्वतः मम तावदिति वाक्यालङ्कारे । ममतामहङ्कारं भिन्द्यात्
छिन्द्यात् । अनिन्द्यामनवद्यां उपरतिञ्च प्रशमञ्च ददातु वितरतु । अहमध्या-
समालोड्याखण्डज्योतिरानन्दात्मकमोक्षानुभावमुद्भावयत्वित्यर्थः ॥ विधि-
व्यासाभ्यामस्य समागमश्च प्राचीनशङ्करविजये ॥ "इत्यब्जसम्भवपराश-
रपुत्रदत्तस्वायुर्विशेषदुरपोहहरिज्जयेच्छः । प्रक्रान्तवान्दिशि विदिश्यति-
धीरवादैरद्वैतमेव परिवर्धयितुं बुधेषु ॥' इत्यस्मात् पूर्वम् ॥ २० ॥

**अपि हालनृपालपालितं द्रागपहायेन्द्रहरिन्मुखं वितन्द्रम् ।**
**श्रितमुर्मुरमुद्धरंस्त्रिवेण्यां यतिराड्भट्टमघानि वो वितुण्यात्॥२१॥**

तस्य दिग्विजयप्रस्तावनया कुमारिलभट्टाचार्यसमनुग्रहरीतिमुपवर्ण-
यति—अपीति । हालनृपालेन तदभिधानेन मगधमहीपतिना पालितमपि
तदात्वे पाल्यमानमपीति यावत् ॥ अतिधार्मिकराजरक्षितत्वेन त्यागानर्हम-
पीत्यर्थः । इन्द्रहरिन्मुखं प्राचीप्रदेशं तद्यात्रामिति यावत् । द्राक् झटिति

अपहाय विसृज्य वितन्द्रं विधूतप्रमीलमालस्यरहितमित्यर्थः । त्रिवेण्यां तत्तीरे प्रयागाख्य इति लक्ष्यम् । श्रितमुर्मुरं प्रायश्चित्तकाण्डप्रामाण्यनिर्वहणाय गुरुमतनिराकरणप्रायश्चित्तं तुषानलप्रवेशमनुतिष्ठन्तमित्यर्थः । भट्टं कुमारिलं उद्धरन् आत्मतत्त्वोपदेशेन विगलितसकलोपप्लवं कुर्वन्नित्यर्थः । यतिराट् आचार्यो वः अघानि तृण्यात् युष्माकमंहांसि विलोपयत्वित्यर्थः ॥२१॥

पटुमण्डनमिश्रखण्डनार्थं प्रविशन् पद्मवनं नवं जयार्थी ।
तमधृष्यगिरं विधूय वादैर्यतिमाधात्स च पातु मां प्रमोदी ॥२२॥

अथ मण्डनस्य संयमप्राप्तिमाह—पट्विति । यः जयार्थी विजिगीषुः पटोः चटुलस्य मण्डनमिश्रस्य तदभिधस्य मीमांसकस्य तदुक्तेरिति लक्ष्यम् । खण्डनार्थं न्यक्काराय नवं नूतनं पद्मवनं तन्नामानमग्रहारं प्रविशन् प्राप्नुवन् अधृष्यगिरं, दुरभिभवविवदनं तं मण्डनं वादैः करणभूतैः विधूय अभिभूय यतिं संयमिनं आधात् कृतवान् । समयबन्धानुगुणमिति शेषः । सः प्रमोदी नित्यानन्दशीलः ताच्छील्ये णिनिः । मां पातु रक्षतु । चो वाक्यालङ्कारे पादपूरणे वा । 'तु हि च स्म ह वै पादपूरणे' इत्यनुशासनात् ॥२२॥

प्रविशन् वदरीमवाप्य सद्यः परमाचार्यपदार्चनं क्रमाद्यः ।
धवलाचलमाप्य योऽप्यमाद्यच्छिवलावण्यमुदीक्ष्य तं प्रपद्ये २३ ॥

अथ तस्य परमगुरोः परमेश्वरस्य च दर्शनप्रसङ्गमाह—प्रविशन्निति । यः क्रमात् दिग्विजयक्रमेणेत्यर्थः । वदरीं वदरिकाश्रमं प्रविशन् प्राप्नुवन् सद्यः परमाचार्यपदार्चनं श्रीगौडपादाचार्यपादवन्दनमवाप्य लब्ध्वा धवलाचलं रूप्यशैलं कैलासमिति यावत् । आप्य उपगम्य अपि च शिवलावण्यं प्रत्यक्षेण परमशिवसौन्दर्यं उदीक्ष्य अवलोक्य प्रसन्नस्येति ज्ञेयम् । अमाद्यत् अमोदत आनन्दमत्यन्तमाप्तवानित्यर्थः । तमाचार्यं प्रपद्ये शरणं यामि ॥२३॥



प्रतिपादितलिङ्गपञ्चकेऽमुं प्रणिवर्त्याशु तिरोहिते गिरीशे ।
विनिवृत्य स दिग्जयप्रवृत्तो विविधैश्शिष्यवरैर्विभातु चित्ते २४

अथ परमेश्वराल्लिङ्गपञ्चकप्राप्तिमुपपादयिष्यन्नाह—प्रतिपादितेति । गिरीशे महेशे प्रतिपादितं वितीर्णं लिङ्गपञ्चकं योगभोगवरसिद्धिविमुक्तिनामकस्फटिकालिङ्गपञ्चतयं येन तस्मिन् तथोक्ते आशु लघु अमुं प्रणिवर्त्य प्रयत्नेन मर्त्यलोकं प्रयातुमाज्ञाप्येत्यर्थः । तिरोहिते अन्तर्हिते सति विनिवृत्य प्रत्यागत्य विविधैः उच्चावचैः शिष्यवरैः सुरेश्वरपद्मपादहस्तामलकतोटकोदङ्कचित्सुखप्रभृतिभिरन्तेवासिवर्यैः सह दिग्जये तत्तद्देशस्थविमतपरिभव इति लक्ष्यम् । प्रवृत्तः उद्यतः सः शङ्करदेशिकः चित्ते ममेति शेषः । विभातु प्रकाशतां आविरस्त्वित्यर्थः ॥२४॥

कलयन्निलयं च तुङ्गभद्रातटिनीरोधसि वेधसः स्त्रिया द्राक् ।
कतिचिच्छरदोऽत्यवीवहद्यो यतिराट् क्वापि मठे स मेऽस्तु सद्यः ।

इत्थमाऽविमुक्तादा च कैलासादाकलितयात्रेण परमेश्वराज्ञया प्रतिनिवृत्तेन समापितसकलोत्तरदिग्विजयेन दक्षिणापथमासेदुषा श्रीशङ्करदेशिकेन्द्रेण शृङ्गगिरौ वाणीस्थापनं स्वभाष्यप्रवचनं कतिपयदिवसनिवासयोगं च निरूपयति—कलयन्निति । किञ्च यः द्राक् लघु तुङ्गभद्रेति तटिनी नदी तस्या रोधसि तीरे वेधसः ब्रह्मणः स्त्रियाः अभ्याजशक्तेस्सरस्वत्या इत्यर्थः । निलयं आलयं कलयन् बध्नन् उद्भाव्येत्यर्थः । क्वापि कस्मिन्नपि मठे नियमिजनवासे कतिचित् द्वादशेति प्रबन्धान्तरे "अब्दान् द्वादश सोऽत्यवीवहदधिव्याख्यानसिंहासनं शिष्यान् स्वान् विनयन् स्वभाष्यसरणौ श्रीतुङ्गभद्रातटे । मृत्यवंशं पृथिवीधवं विरचयन् पीठेऽथ विद्याभिधे मुक्त्वा कुम्भभवाश्रमं समसदत्साक्षात्परमेश्वरम् ॥" इति । शरदो वर्षान् अत्यवीवहत् अतिवाहितवान् । सः यतिराट् संयमीन्द्रः सद्यः अधुनैव मे अस्तु भवतु प्रसन्न इति शेषः ॥२५॥

अथ कान्यकुमारसन्धिसेतुस्थलिनीवेङ्कटकालहस्तियातुः ।
यमिनेतुरमुष्य काञ्चियात्रा शमिदानीं शमदं क्रियाद्विचित्रा २६

अथ सेत्वादियात्राप्रकारमुपवर्णयति क्रमेण—अथेति । अथ ऋश्यशृङ्गाश्रमनिवासानन्तरं कन्याकुमार्येव कान्यकुमारं स्थलविशेषः । 'ङ्यापोस्संज्ञाच्छन्दसोर्बहुलमि'ति कन्याया ह्रस्वः । सन्धिः सन्धिनगरमिति स्थलं शूरपद्मसन्धानार्थं वीरबाहुना वाचिकसन्देशं प्रेषितवतस्तत्पुनरागमनप्रतीक्षणार्थमध्युषितं कुमारेणेति तन्नाम्ना दक्षिणोदधे रोधसि प्रसिद्धं सुब्रह्मण्यक्षेत्रम् । सेतुः सेतुबन्धोपलक्षितं क्षेत्रमिति लक्ष्यम् । स्थलिनी गजारण्यस्यैवेदं नामान्तरमिति वृद्धाः । वैङ्कटं वेङ्कटसम्बन्धी शेषाद्रिरित्यर्थः । कालहस्ती दक्षिणकैलासापरपर्यायं स्थलं तेषां यातुः गन्तुः अमुष्य प्रागुक्तस्य यमिनेतुः यतिराजस्य विचित्रा काञ्चीयात्रा भूप्रदक्षिणपूर्वकमाप्ततयाऽद्भुतत्वकथनम् । काञ्चीक्षेत्रप्रयाणं इदानीमधुना शमदं शान्तिप्रदं शं आत्माऽपरोक्षसाक्षात्कारसौख्यं क्रियात् विधेयात् ममेति शेषः ॥ २६ ॥

श्रितनिर्मलराजसेनचोलक्षितिपालोद्धृतविप्रदेवशालः ।
वरदस्य तथाम्रनायकस्याप्युरुवेश्मद्वयकृज्जयाय मे स्यात् ॥ २७ ॥

अथ काञ्चीगतमुदन्तं वर्णयति षड्भिः— श्रितेति । श्रितः आप्तः आत्मानमित्यूह्यम् । निर्मलः निष्पापवृत्तिः यो राजसेन इति चोलक्षितिपालः तदाख्यजनपदाधीशः तेन प्रयोज्यकर्त्रा उद्धृताः जीर्णोद्धरणं प्रापिता इति यावत् । विप्राणां ब्राह्मणानां देवानां शिवविष्ण्वादीनां सुराणाञ्च शालाः वास्यः येन प्रयोजककर्त्रा सः तथोक्तः स्वनियुक्तराजसेनोद्धृतसकलजीर्णब्रह्मदेवालयसमूह इति ध्येयम् । वरदस्य वरदराजाभिधस्य हस्तिगिरीश्वरस्य तथा तद्वत् आम्रनायकस्यापि एकाम्रनाथस्य चेति उरु विस्तृतं वेश्मद्वयं आलयद्वितयं करोतीति तथोक्तः सः मे जयाय सर्वतो विजयाय स्यात् भवतु सर्वत्र जयप्रदो भवत्वित्यर्थः ॥२७॥

प्रकृतिं च गुहाश्रयां महोग्रां स्वकृते चक्रवरे प्रवेश्य योऽग्रे ।
अकृताश्रितसौम्यमूर्तिमार्यां सुकृतं नस्स चिनोतु शङ्करार्यः ॥२८॥



अथ तत्र श्रीचक्रनिर्माणमाह—प्रकृतिमिति । यः गुहाश्रयां महाबिलास्पदां बुद्धिनिविष्टां वा महोग्रां अतिदारुणां प्रकृतिं सर्वभूतजननीं मायां वा अग्रे तस्य बिलस्य पुरोभागे स्वकृते चक्रवरे स्वनिर्मिते श्रीचक्रे प्रवेश्य आवाह्य स्वकृतवाग्जालवलयैः प्रधानप्रविद्याख्यं बोधदूरीकृतं कृत्वा एतेन मायामयमखिलमिति बोधयन्निति चेत्यर्थः । आर्यां कामाक्षीं आश्रितसौम्यमूर्तिं उपगतप्रियदर्शनाकृतिं अकृत कृतवान् सः शङ्करार्यः भाष्यकृत् नः अस्माकं सुकृतं पुण्यं चिनोतु वर्धयतु ॥ २८ ॥

परकीयवपुःप्रवेशशैल्या स्मरतन्त्राणि विदन् वशी न लौल्यात् ।
अकृतातनुभारतीं वशे यः सुकृतं मे सुतरां गुरुस्स चीयात् २९॥

प्रासङ्गिकमस्य परकायप्रवेशं प्रदर्श्याधिकारिकमशरीरवाणीविजयमाह—परकीयेति । यः वशीकृतेन्द्रियग्रामस्सन् न लौल्यात् न चापलात् परकीये वपुषि प्रवेशशैल्या, परकायप्रवेशविद्ययेति यावत् । स्मरतन्त्राणि मन्मथरहस्यानि कलामर्माणीति यावत् । विदन् जानन् ज्ञात्वेत्यर्थः । अतनुभारतीं अशरीरिणीं वाणीं वशे स्वाधीन्ये अधित कृतवान् । सः गुरुः मे सुकृतं चीयात् वर्धयेत् । इदं हि पद्यमत्रत्याः कतिपये कामप्राचार्यविजयविद्याशङ्करविजयादिषु निषण्णबुद्धयः "अकृतोभयभारती" मिति यत्किञ्चित्पदव्यत्ययेन "पृटुमण्डनमिश्रे"ति पद्यसमनन्तरं पठन्ति । समर्थयन्ति च तदानीमेव सरस्वतीविजयम् । अस्यात्र पाठस्तूचितः सर्वज्ञपीठाधिरोहणसमय एव तद्विजयस्य शिवरहस्यबृहच्छङ्करविजयकेरलीयशङ्करविजयप्राचीनशङ्करविजयव्यासाचलीयादिषु निरूपितत्वात् । ये त्वभिनवोद्दण्डविद्यारण्यस्वामिभिराराचिते विद्याशङ्करविजये शिवरहस्यवचनत्वेन प्रतिपादिताः "दुर्वाससश्शापतो भूमौ जातां वाणी"मित्यादयः श्लोकास्ते न क्वापि शिवरहस्यप्राचीनमातृकासूपलभ्यन्त इत्यप्रामाणिकमेवेति सर्वं शिवम् ॥ २९ ॥

उपयात्सु बुधेषु सर्वदिग्भ्यः प्रदिशन्नाश पराभवं य एभ्यः ।
विधृताखिलवित्पदश्च काञ्च्यामधृतार्तिस्सदिशोच्छ्रयं च काञ्चित्।

अथ तस्य काञ्च्यां सर्वज्ञपीठाधिरोहणमुपन्यस्यति—उपयात्स्वि-ति । यः सर्वदिग्भ्यः ताम्रपर्णीतीरादिनानाप्रदेशेभ्यः बुधेषु विवादशी-लेषु विद्वत्स्वित्यर्थः । उपयात्सु उपनिपतत्सु सत्सु एभ्यः तेभ्यः इत्यर्थः । पराभवं प्रत्यादेशं आशु झटिति प्रदिशन् वितरन् तान् विवादविजितान् कुर्वन्निति यावत् । काञ्च्यां काञ्चीनगरे अधृतार्तिश्च अकलितखेदश्च लीलयैव सर्वान् जित्वेत्यर्थः । विधृताखिलवित्पदः आरूढसर्वज्ञपीठ इति बोध्यम् । सः काञ्चित् अनिर्वचनीयां श्रियं निश्रेयसमिति यावत् । दि-शेत् वितरेत् अस्माकमिति शेषः ॥ २० ॥

समतिष्ठिपदाहिमाद्रिसेव्यं क्रमशो धर्मविचारणाय दिव्यम् ।
अधिकाञ्चि च शारदामठं योऽभ्यधिकं नस्सुखमातनोतु सोऽयम्

अथ तत्रैव समग्रमौलाम्नायपरिकरितमात्मपीठं कामकोटीति विर-चय्य विजितशारदानामाङ्कितं मठमपि निर्मम इत्याह—समतिष्ठिपदि-ति । यः क्रमशः क्रमेण धर्मविचारणाय धर्म इति अधर्मस्याप्युपलक्षण-म् । अखिलवर्णधर्माधर्मव्यवस्थापनाय दिव्यं मौलाम्नायतया देवसेव्यवि-मवमित्यर्थः । आहिमाद्रिसेव्यं पुण्यभूमौ चासेतोरा च शीताद्रेराखिलवर्ण-वन्द्यं शारदामठञ्च तदाख्यं मठं । चात् कामकोटीतिपीठं च । अधिका-ञ्चि काञ्चीपुरे समतिष्ठिपत् स्थापितवानित्यर्थः । सोऽयमस्मदाचार्यः श्री-कामकोटिपीठाधिपतिर्जगद्गुरुरित्यर्थः । नः अभि अस्माकमन्तेवासिनामि-ति यावत् । तद्द्वाध्यायनेन तत्परम्परागतयमीन्द्रशासनाधीनतया वा शिष्यत्वमिति बोध्यम् । अधिकं निरतिशयं सुखं बन्धविमोक्षरूपं सौ-ख्यमित्यर्थः । तनोतु सिद्धमेव कण्ठचामीकरन्यायेन विस्मृतं विशदय्य र-सयत्वित्यर्थः । कात्स्न्येनेदमुपपादितं प्राचीनशङ्करविजये "आधाय सौ-म्यवपुर्वं प्रकृतिं महोग्रामनाहृत्य विग्रहतनूमनुचक्रराजम् । आह्लादिते च विषये विबुधेषु चात्मप्रासादितेषु वशतां चरणौ वहत्सु ॥" इत्यारभ्य सरस्वतीविजयादिप्रपञ्चनपरपञ्चत्रिंशत्पद्यानन्तरं "सर्वज्ञपीठमधिरुह्य ततस्तदग्रे मिथ्यान्विजित्य सहसोपनतान् प्रयागान् । अभ्यास्त का-



ञ्चिमभिमण्डितकामकोटिपीठो मठं निजमवाप्य सशारदाख्यम् ॥" इत्या-दिना सर्गान्तं यावत् ॥ २१ ॥

पृथिवीधवपद्मपादहस्तामलकानन्दगिरीनतिप्रशस्तान् ।
चतुरोऽकृत यश्चतुर्षु पीठेष्वतुलां नश्चतुरो गिरं स देयात् ॥ २२ ॥

एवमाचार्यस्य पीठाधिरोहणं वर्णयित्वा शिष्याणाञ्च तत्तत्पीठेषु स्थापनं वर्णयति—पृथिवीति । यः अतिप्रशस्तान् सुप्रसिद्धान् चतुरः च-तुस्सङ्ख्याकान् पृथिवीधवः पूर्वमेव शृङ्गगिरौ निवेशितः पद्मपादः द्वारका-यां हस्तामलकः जगन्नाथे आनन्दगिरिः बदरिकाश्रमे तान् चतुर्षु शारदा-कालिकाविमलाज्योतिष्मतीपदाङ्कितेषु तेषु तेष्वपि पीठेषु अकृत कृतवान् नियतानकार्षीदित्यर्थः । चतुरः अवलोक्य भारत्या अप्यवलेपमधिकाञ्चिस-मधिष्ठितसर्वज्ञपीठः श्रीकामकोटीपीठानिलयः विजितवाणीनिवेशविलसदभि-ख्याविलासश्रीशारदामठाध्यक्षः समनुष्ठितमौलाम्नायसकलजगद्गुरुश्शङ्कर देशिक इत्यर्थः । सः नः अतुलां असमां गिरं देयात् वाचामर्थान् विस्ता-रयत्वित्यर्थः । मुदं स इति पाठे मुदमखण्डामित्यर्थः । विस्तरेणेदं प्राचीन-शङ्करविजये—'कैलासाद्विनिवर्तने प्रथमतो योऽयं बदर्याश्रमे ज्योतिष्मत्य-भिधो व्यधायि सुमहान् पीठस्तदाख्ये मठे । तस्मिंस्तोटकमेव पूर्वनिहितं व्याधाज्जगन्नाथगे तं हस्तामलकं सनन्दनमपि न्यास्थत् प्रतिद्वारकम् ॥ श्री-संज्ञेऽथ मठेऽनुतुङ्गविहिते श्रीशारदासंज्ञिते पीठे तं पृथिवीधवञ्च निहितं प्रा-गेव कुर्वन् स्थिरम् । सन्देहे सति सम्प्रदायमठपीठाख्यानवाक्यावधिव्देषां तद्भ्रमकं तदैव विदधावाम्नायसेतुं च सः ॥" इत्याम्नायविस्तरपरकतिपयपद्य-समनन्तरं 'नित्ये योगिसुरेश्वरोपचरितः श्रीकामकोट्याह्वये लोकाचार्यपदे स्थितस्स दिवसान् सर्वज्ञपीठे सुखम् । ख्यातस्तत्र तदादि तेन विजितां वा-णीमनुस्मारयन् श्रीमच्छङ्करदेशिकस्य जयति श्रीशारदाख्यो मठः ॥" इत्या-दिना । अत्र चतुरश्चतुर्षु पीठेष्वित्याम्रेडनमाचार्यशिष्याणां मठाश्चत्वार एव तदधिका नेति विशदयितुम् । स्वस्यैकशिष्याणां चतुर्णां चत्वारश्चेति पञ्चैव पूर्वमध्याम्नायानुरोधेन मठाः श्रीभगवत्पादैराखिलवर्णाश्रमधर्मविचारणाय वि-

हिता इति सेत्वादिष्टः सैद्धान्तिकश्च पन्था इत्यलमतीव विस्तरेण । अथ प्रसंगादत्राद्वैताचार्योपदिष्टाम्नायाष्टकसम्प्रदायादिसूचिका अनुक्रमणिका प्रदर्श्यते । तद्यथा प्रत्याम्नायं संज्ञा मठः पीठः क्षेत्रं तीर्थं देवः शक्तिः वेदः संप्रदायः योगपटः ब्रह्मचारी महावाक्यमाचार्यः इत्येते क्रमादुच्यन्ते ॥ अथ पूर्वाम्नायाः **पश्चिमाम्नायः**—द्वारकामठः कालिकापीठः द्वारवती गोमती सिद्धेश्वरः भद्रकाली सामवेदः कीटवारः आश्रमः स्वरूपब्रह्मचारी तत्त्वमसि *पद्मपादः । **उत्तराम्नायः**—ज्योतिर्मठः ज्योतिष्मतीपीठः बदरिकाश्रमः अलकनन्दा नारायणः पूर्णगिरिः आथर्वणवेदः आनन्दवारः गिरिः आनन्दब्रह्मचारी अयमात्माब्रह्म तोटकः । **पूर्वाम्नायः**—गोवर्धनमठः विमलापीठः पुरुषोत्तमम् महोदधिः जगन्नाथः विमला शुक्लयजुः भोगवारः अरण्यः प्रकाशब्रह्मचारी प्रज्ञानं ब्रह्म हस्तामलकः । **दक्षिणाम्नायः**—शृङ्गगिरिमठः *शारदापीठः *रामेश्वरम् तुङ्गभद्रा वराहः शारदा कृष्णयजुर्वेदः भूरिवारः भारती चैतन्यब्रह्मचारी अहं ब्रह्मास्मि * पृथिवीधवः । इति पूर्वाम्नायाश्चत्वारः । अथ मध्यमाम्नायः । **मौलाम्नायः *श्रीशारदामठः कामकोटिपीठः सत्यव्रतकाञ्ची कम्पासरः एकाम्रनाथः कामकोटी ऋग्वेदः मिथ्यावारः इन्द्रसरस्वती सत्यब्रह्मचारी ॐतत्सत् शङ्करभगवत्पादाः इति मौलाम्नायः** अथोत्तराम्नायाः । **ऊर्ध्वाम्नायः** सुमेरुमठः मायापीठः कैवल्यक्षेत्रम् मानसम् निरञ्जनः माया उपनिषदः श्रीकाषी सत्यज्ञानाभिधौ शुद्धब्रह्मचारी सोऽहम् महेश्वरः । **प्रत्यगाम्नायः** परमात्ममठ. विद्यापीठः योगक्षेत्रम त्रिपुटी परमहंसः विद्या अजपा सत्सन्तोषः अखण्डः सिद्धब्रह्मचारी मातृकाः चेतनः । **निष्कलाम्नायः** सच्चिन्मठः आनन्दपीठः स्वानुभूतिः नमः परं ब्रह्म चितिः प्रणवः स्वप्रकाशः पुरुषः पूर्णानन्दः तारकम् भूमा इत्यूर्ध्वाम्नायास्त्रयः । अत्र मौलाम्नाये मठश्शारदाख्यः पीठश्च कामकोटीति ‘प्रतिचन्द्रमव’ मिति पद्यव्याख्यानप्रदर्शितमौलाम्नायप्रवचनपरबृहच्छङ्करविजयवाक्यैः “अस्मिं-



स्तिष्ठन्ति ये पीठे कामकोटिसमाह्वये’ ‘पीठोयं कामकोटीति’ ‘इदं दुरासदं ज्ञेयं कामकोटीतिशब्दितम्’ इत्यादिसेतूपन्यासेन च ‘अध्यास्त काञ्चिमभिमण्डितकामकोटिपीठामठं निजमवाप्य सशारदाख्यम्’ ‘निन्ये योगिसुरेश्वरोपचरितः श्रीकामकोट्याह्वये लोकाचार्यपदे स्थितस्स दिवसान् सर्वज्ञपीठे सुखम् । ख्यातस्तत्र तदादि तेन विजितां वाणीमनुस्मारयन् श्रीमच्छङ्करदेशिकस्य जयति श्रीशारदाख्यो मठः ॥’ इत्यादिना च निर्णीयते। ननु ‘शारदापीठनाम्ना तु प्रसिद्धे जगतीतले ।’ ‘यस्त्वद्वैतमते स्थित्वा शारदापीठनिन्दकः’ ‘कामकोटिमठे त्वस्मिन् गुरुरिन्द्रसरस्वती ।’ इत्यादिषु शारदापीठकामकोटीमठपदप्रयोगयोर्व्यत्ययेनापि सत्त्वाद्व्यवस्थेयमकिञ्चित्करीति वाच्यम्, तत्र शारदायास्तदभिधमठस्य पीठ इति सम्बन्धसामान्ये षष्ठ्याः समाश्रयणेन कामकोटीयुतः तदाख्यया शक्त्या पीठ्या वा विशिष्टः सचासौ मठश्च कामकोटीमठ इति शाकपार्थिवादित्वान्मध्यमपदलोपिसमासाभ्युपगमेन च तस्या बाधाभावात् । एवमेव ‘शृङ्गेर्यां शारदामठ’ इत्यादिषु प्रयोगेषु शारदायुक्तः तदभिधशक्तिपीठान्यतरविशिष्टः मठ इत्येव व्याख्येयम् । तत्र स्थापितायाश्शक्तेश्शारदात्वात् शक्तिनाम्नैव सर्वतः पीठानां व्यवहारदर्शनाच्च अखिलमिदमधिगन्तव्यमाम्नायसेतुभ्यामित्यलमतिप्रसङ्गेन ॥ प्रतिपादितञ्चेदं प्राचीनशङ्करविजये—‘श्रीसंज्ञेऽथ मठेऽनुतुङ्गविहिते श्रीशारदासंज्ञिते पीठे तं पृथिवीधवञ्च निहितं प्रागेव कुर्वन् स्थिरम्’ इत्यादिना ॥ दक्षिणाम्नाये रामेश्वरमित्यत्र रामक्षेत्रमित्यपि पाठान्तरम् ॥ यद्यप्यत्र पूर्वमौलाम्नाययोस्तीर्थपर्वतसागरवनपुरीसरस्वत्यानन्दसरस्वत्यादीनि प्रबन्धान्तरानुशिष्टानि, तथापि सेतुसिद्धानुवादरीत्येदमुक्तमित्यवधेयम् । भूयसोऽनुग्रहाच्च सेतुरेवास्मिन्नादरणीय इति च दिक् ॥ तथाहि सेतुः—‘शृङ्गेरीमठ आचार्यो भारत्याख्यो बहूदकः । कालिकामठ आचार्य आश्रमाख्यमुनिर्मलः ॥ ज्योतिर्मठस्य विदित आचार्यः पर्वताभिधः । कामकोटीमठे त्वस्मिन् गुरुरिन्द्रसरस्वती ॥’ इति ॥ पाश्चिमाम्नाये च— ‘आचार्योऽद्य सुरेश्वर’ इति सेतुवचनमद्यपदादेव भग-

न्दरव्रणविरोपणार्थमाचार्यपार्श्वमुपगतस्य पद्मपादस्यासान्निध्य इति कथन- परम् । सुरेश्वरस्य सकलविबुधशिरोमणित्वेऽपि शपथपथैकप्रापिताश्रमत- या स्वयमपरमहंसतया च न काप्याचार्यतया प्रतिष्ठितता । तदेवासूचय- ति पद्मपादादिपरमहंसप्रशंसाकोटौ विना नामग्रहणं वार्तिककारमिति वि- शेषणनिर्देशेनैव 'तं तोटकं वार्तिककारमन्यानस्मद्गुरून् सन्ततमानतोऽस्मी' त्यद्वैताचार्यपरम्पराप्रपञ्चनपरा पुरातनी गाथेत्यपि प्राञ्चः ॥ अत्र 'पृथ्वी- धवाख्य आचार्य' इति सेतुना 'श्रीशारदासंज्ञिते पीठे तं पृथिवीधवञ्च नि- हित'मित्यादिप्राचीनशङ्करविजयवाक्येन चायमेवाचार्य इति दक्षिणाम्नाये गम्यते । 'आचार्यो विश्वरूपक' इत्याम्नायस्य च मृत्युयमावतारयोरेका- चार्यशिष्यभूतयोरविनाभावमेकाधिकरणवृत्त्योरनयोः पृथ्वीधवविश्वरूपयो- राजपुरोहितन्यायेनाभेदप्रतिपिपादयिषया भक्त्या प्रवृत्त्यौचित्यात् । तथैव मूलेऽपि 'स्थिरबोधे'त्यादिनोक्तत्वाच्च ॥ इत्यलमतिप्रसङ्गेन ॥३२॥

परसन्तिकसत्सुरेश्वराद्यैः परमाद्वैतमतं स्फुटं प्रवेद्य ।
परिकाञ्चिपुरं परे निलीनः परमायास्तु शिवाय मे गुरुर्नः ३३॥

अथ जगद्गुरोः काञ्च्यामेव ब्रह्मीभावमाह—परमिति । परं सर्व- ज्ञपीठाधिरोहणात्पश्चात् अन्तिके समीपे सन्तः वर्तमानाः गुरुविरहासहि- ष्णुतरा पार्श्वैकवृत्तयश्छात्रा इति यावत् । तैः सुरेश्वराद्यैः आद्यपदेन चित्सुखोदङ्कविश्वरूपादयो गृह्यन्ते । परमाद्वैतमतं औपनिषदसमयं स्फुटं प्रवेद्य प्रतिबोध्य विविदिषुभ्य इति यावत् । परिकाञ्चिपुरं काञ्चीनगर एव परे परस्मिन्व्योमनि निलीनः लयं प्राप्तः सः सद्गुरुः "गुरवो बहवस्स- न्ति शिष्यवित्तापहारकाः । दुर्लभस्सद्गुरुस्त्वेकोऽप्यस्य हृत्तापहारकः॥' इत्युक्तरीत्या शिष्यहृत्तापहारी गुरुरित्यर्थः । नः अस्माकं परमाय शि- वाय अनावेयातिशयनित्यानन्दरूपनिःश्रेयसावाप्तये अस्तु भवतु ॥ अस्य काञ्चीपुर एव ब्रह्मीभावमाह शिवरहस्ये नवमांशे षोडशाध्याये— "त योगभोगवरसिद्धिविमुक्तिनामलिङ्गार्चनाप्राप्तजयः स्वकाश्रमे । प्राप्तान् विजित्यतरसाक्षतशास्त्रवादैर्मिश्रान् सकाञ्च्यमथ सिद्धिमाप्नुत ॥" इति । वि-



स्तरस्तु तस्यान्यतः प्राचीनशङ्करविजयादिषु द्रष्टव्यः । तत्रादौ बृहच्छङ्क रविजये शङ्कराचार्यसत्पथे—"अद्वैतमातुर्हितनभूवरमा च सेतोराधाय स- र्वसुमनश्चयसम्मतार्थम् । त्यक्ताङ्कनाद्यवगुणान्यपि षण्मतानि शैवादिमानि च निरुच्य यथाऽधिकारम् ॥ वाणीं विजित्य च विपद्विशदामदेहां सर्वज्ञ- पीठमधिरुह्य च तत्र काञ्च्याम् । विद्वद्वरार्चितपदो यमिसार्वभौमो देव्याः पुरः परतरे पुरुषे विलिल्ये ॥ पुण्यश्लोकमञ्जर्यामपि "महेशांशाज्जातो मधुर- मुपदिष्टाद्वयनयो महामोहध्वान्तप्रशमनरविः षण्मतगुरुः । फले स्वामिन् स्वायुष्यपि शरचराऽब्देऽपि (२६२९) च कलेर्विलिल्ये रक्ताक्षिण्यधिवृ- षसितैकादशि परे । ' इति ॥ प्राचीनशङ्करविजयेऽपि—'कल्यब्दैश्च शरे क्षणाध्वनयनैः(२६२९)सत्कामकोटिप्रथे पीठे न्यस्य सुरेश्वरं समवितुं स- र्वज्ञसंज्ञं मुनिम् । कामाक्ष्याः सविधे सजातु निविशन्नुन्मुक्तलोकस्पृहो देहं स्वं व्यपहाय देह्यसुगमं धाम प्रपेदे परम् ॥' इति । केरलीयशङ्करविजयेऽपि — 'इति निश्चित्य मनसा श्रीमान् शङ्करदेशिकः । मठे श्रीशारदाभिख्ये स- र्वज्ञं निदधन्मुनिम् ! सुरेश्वरं वृत्तिकृतमन्तिकस्थं सदाऽऽदरात् । समं सं- स्थाप्य तस्मै स्वं वक्तुं भाष्यं समन्वशात् ॥ स्वशिष्यपारम्पर्येण लिङ्गं स्वं योगनामकम् । सेवयैनं कामकोटिपीठे सार्धं वसेति च ॥ इत्याज्ञां सम्प्र- दायास्मै त्यक्तपीठमठस्पृहः । कामाक्ष्यानिकटे जातु सन्निविश्य जगद्गुरुः देहिभिर्दुर्भजं भेजे देहं तत्रैव सन्त्यजन् । अखण्डज्योतिरानन्दमक्षरं परमं पदम् ॥ सएव शङ्कराचार्यो गुरुर्मुक्तिप्रदस्सताम् । अद्यापि मूर्तं चैतन्यमिव तत्रैव तिष्ठति ॥' इत्यादि । व्यासाचलीयेऽपि द्वादशसर्गे—'एवं निरुत्त- रपदां सविधाय देवीं सर्वज्ञपीठमधिरुह्य मठे स्वकल्प्ये । मात्रा गिरामपि तथोपगतैश्च मिश्रैस्सम्भावितः कमपि कालमुवास काञ्च्याम् ॥ प्रागष्टमा द्विदितवेद्यमुदूढबाल्यं सर्वज्ञसंज्ञमथ हंसितमात्मनैव । श्रीकामकोटिविरुदे न्यदधात्स्वपीठे गुप्तं स्वशिष्यतिलकेन सुरेश्वरेण । इत्थं सशङ्करगुरुः कृतकृत्यभावात् भावान् प्रकाश्य निगमान्तगिरां निगूढान् । काञ्च्यां विमुच्य वपुरादृतमिच्छयैव स्वस्यैव धाम्नि परमे स्वतएव लिल्ये ॥ गामा-

क्रम्य पदेऽधिकाञ्चि निबिडं स्कन्धैश्चतुर्भिस्तथा व्यावृण्वन् भुवनान्तरं परिहरंस्तापं समोहज्वरम् । यश्शाखी द्विजसंस्तुतः फलति तत्स्वाद्यं रमाख्यं फलं तस्मै शङ्करपादपाय महते तन्मन्त्रिसन्ध्यं नमः ॥ पीठे तिष्ठति कामकोटिविरुदे यश्शारदाख्ये मठे देहीवादिमशङ्करार्यनियमव्रातो व्रतिष्ठोऽधुना । नेपालादिनृपालमौलिविधृतश्रीशासनोनश्शिवं देयादेष जगद्गुरुस्स विपुलानन्दाकृतिश्शङ्करः ॥" इति । एवमेवाचार्यविजयादिष्वपि प्रपञ्चितमिदमित्यवलोकनीयम् ॥ अयमिह जगद्गुरुकथासङ्ग्रहः—"कलिना बलिना ध्वस्ते स्रस्ते वैदिकवर्त्मनि । देवान्विलपतः श्रुत्वा दयार्द्रहृदयः शिवः ॥ विष्ण्वाद्यानवतार्य प्राक् अवातारीत्स्वयञ्च सः । केरले किल काल्यां गृहे शिवगुरोश्शुभे ॥ उपनीय निजे ताते गते लोकान्तरं ततः । कचित्समाप्याध्ययनमनुज्ञामाप्य मातृतः । छलेन प्रेषमुच्चार्य निष्क्रान्तस्सदनान्निजात् । नर्मदारोधसि प्राप्य गोविन्दात्क्रमसंयमम् । जाह्नवीतीरमासाद्य बोधितोऽन्त्यजरूपिणा । विश्वेश्वरेण भाष्यं स ब्रह्मसूत्रस्य निर्ममे । ततः प्रयागमाविश्य भट्टमुद्धृत्य संस्तुतेः । तद्वाचा मण्डनं प्राप्य तमकार्षीज्जयन्यतिम् । ततस्स परमाचार्यान्द्रष्टुं बदरिकाश्रमम् । प्राप्य नत्वा गौडपदान् कैलासं प्रययावतः । लिङ्गपञ्चकमासाद्य शम्भोराज्ञावशोवशी । निवृत्तः परमाचार्यपदं पुनरशिश्रियत् । सनन्दनोऽभवच्छिष्यः सूत्रकृत्सविरिञ्चनः । ददृशे देशिकेन्द्रेण तोषितश्च विपाश्चिता ॥ शरीरान्ते जनन्याऽथ स्मृतस्तस्या निकेतनम् । व्योम्नैवाप्य परं तत्त्वमुपदिश्य मृतां ततः ॥ दोर्मन्थोत्थानलेनैव संस्कृत्य बदरीं पुनः । प्राप्तस्तस्माच्छृङ्गगिरिमध्युष्य कतिचित्समाः ॥ सेतुश्रीकालहस्त्यादियात्रां कृत्वा क्रमाद्वशी । काञ्चीपुरं समासाद्य राजसेनेन भूभृता ॥ वरदस्याम्रनाथस्य कामाक्ष्याश्च तथाऽऽलयान् । उद्धृत्य शमयित्वोग्रकलां श्रीचक्रतश्शिवाम् ॥ विजित्य वाणीमतनूं परकायप्रवेशतः । ज्ञातेन स्मरतन्त्रेण तन्नाम्ना निर्मिते मठे ॥ सर्वज्ञैकसमध्यास्ये कामकोटीति संज्ञिते । पीठे स्थितः कतिपयानब्दाञ्छिष्यानपालयत् । सुरेश्वरपरित्रातं बालं चिद्घनमासने । निवेश्य प्राविशद्धाम परमं स्वं जगद्गुरुः ॥" इति ॥ ३३ ॥



स्थिरबोधघनमतापदाम्नोः गुरुपृथ्वीधवविश्वरूपनाम्नोः ।
चिरमर्थनयोपतुङ्गभद्रं सरसस्सौतु सुरेश्वरस्स भद्रम् ॥ ३४ ॥

सविस्तरमित्थमद्वैतप्रवर्तकाचार्यमुपवर्ण्य तदाज्ञया सर्वज्ञात्मानं गुरुमागुरुवियोगाद्दा च तत्तारुण्यावाप्तेरावितुमेव तेन सममधिष्ठितकामकोटिपीठं सुरेश्वरमतदेकपदस्थितमासूचयिष्यन्नाह--स्थिरेति । गुरुपृथ्वीधवविश्वरूपनाम्नोः मृत्युयमावतारत्वेन प्रागेवास्माभि"रवतार्य सुरान्दरा"निति पद्यव्याख्यानावसरे दर्शिनाविमात्यधिगन्तव्यम् । अनयोरिदमभिख्यतातु पूर्वाश्रमएवेति बोधयितुमिदं विशेषणम् । स्थिरबोधघनः नित्यबोधघनः । प्रतापदामा अखिलजिनजयलाञ्छनीभूततदभिधमाल्यवत्तया तथाप्रसिद्धइति यावत् । तयोः चिरमागुरोर्वियोगाद्दा च महादेवयोगियौवनावाप्तेरित्यर्थः । अर्थनया सार्धपावाभ्यां वस्तव्यमित्याशंसया उपतुङ्गभद्रं तदभिधागास्सरितस्समीपे सरसः धृतामधइत्यर्थः । सः सुरेश्वरः ब्रह्मावतारो वार्तिककृत् भद्रं मङ्गलं सौतु जनयतु अखण्डानन्दाविर्भावमनुभावयन्त्विति यावत् । अयं सुरेश्वरः स्वयमपरहंसतया परमहंसैकसमध्यासनीये जगद्गुरुणा स्वपीठे शिष्यपीठेषु वा न निवेशितोऽपि स्वसमानवैदुष्यभाजनतया महायोगितया च सर्वपीठव्यवस्थागोपने नियुक्तस्तत्र तत्र कियन्तञ्चित्कालमुवास । ततस्तन्मठीयैस्सएवपरमाचार्यात् परमाचार्यपरम्परायां पठ्यत इति वस्तुस्थितिः । तथा चोक्तं बृहच्छङ्करविजये श्रीशङ्कराचार्यसत्पथे—"भाष्यव्याख्यानप्रकरणगतं सम्प्रधार्यैव वृत्तं मेधावी सप्रथितधिषणं प्राह तं वृत्तिकारम् । न त्वां न्यस्याम्यधिमठमिह क्वापि पीठाधिपत्ये त्रातुं सर्वांस्त्वमसि तदितस्त्वां गुरुं सङ्गिरन्ताम् ॥" इति ॥ ३४ ॥

प्रणयल्लँयपयोगमब्दुदञ्चयं पुनराचार्यमठे निपद्य काञ्च्याम् ।
भुवि यश्शिवलिङ्गभूयमंते प्रविवान् सोऽस्तु मुखाय न स्मशान्तः ।

तस्यैव काञ्चीपरिसरे परमपदप्राप्तिमाह—प्रणयन्निति । यः पुनः प्राप्त इति शेषः । आचार्यमठे सकामकोटिपीठे श्रीशारदामठइति याव-

त् । निषद्य स्थित्वा अक्षुदन्च्यं अत्र क्षुदित्युदन्याशोकमोहजरामरणा-नामप्युपलक्षणम् । तैरप्राप्यं तन्निवारकमिति यावत् । लययोगं तदाख्यं योगविशेषं प्रणयन् अनुतिष्ठन् अन्ते निष्ठापरिसमाप्ताविति बोध्यम् । काञ्च्यां तत्परिसरस्थायामिति लक्ष्यम् । भुवि वक्ष्यमाणपुण्यरसाभिधान-भागीति योज्यम् । शिवलिङ्गभूयं शिवलिङ्गभावं शिलामयत्वमित्यर्थः । प्रविवान् प्रपन्नः सुशान्तः महातपस्वी सः सुरेश्वरः नः सुखायास्त्विति योजना ॥ ३५ ॥

प्रथिते किल कामगोष्ठनाम्नि प्रथते पुण्यरसेति यत् पवित्रम् ।
परमस्य गुरोस्समाधिभूमिं प्रणये मण्डनचिह्नितं निकामम् ॥ ३६ ॥

तदेव प्रकारान्तरेण प्रस्तौति—प्रथित इति । पवित्रं पावनं यत् स्थलमिति शेषः । प्रथिते प्रख्याते कामगोष्ठनाम्नि पुण्यस्थल इति शेषः । पुण्यरसा पुण्यभूमिरिति प्रथते प्रसिद्धेत्यर्थः । गुरोः प्रागुदाहृतवचनसूचितसकलाचार्यपीठगुरुभावस्येति बोध्यम् । अस्य सुरेश्वराचार्यस्य मण्डनचिह्नितं मण्डनशब्दजातलाञ्छनं मण्डनमिश्राग्रहार इत्यद्यापि प्रसिद्धं समाधिभूमेरधिष्ठानस्य परमाधिकरणं निकाममत्यन्तं प्रणये आद्रिये मनसेति शेषः । तथा चोक्तं पुण्यश्लोकमञ्जर्याम्—“गौडः कश्मीरजन्मा कलितपरिचितिः पूर्वतन्त्रे कुमारात् ब्रह्मण्यस्सर्ववेदाः स्फुटशपथपथं श्रीमदाचार्यगोष्ठी । सन्न्यासं प्रापितस्तं तदनु परिचरन् योगभूमैकसीमा तस्यादेशेन काञ्च्यामसदथ समास्सप्तति कामपीठे ॥ वर्षे शुद्धतरे कलेरथ भवे ज्येष्ठसितद्वादशीरात्रौ चिनितसर्वभूमसयशसा श्रीमान् सुरेशस्स्वयम् । श्रित्वा पुण्यरसां रसेन महता युञ्जन् लयाख्ये पथि श्लक्ष्णश्रीशिवलिङ्गभूयमभजत्साक्षात्तां पश्यताम् ॥” इति । अस्मिन्पद्येऽस्य निर्याणकालः कल्यब्दाः २६९९ भवज्येष्ठशुक्लद्वादशीरात्रिरिति तदा परमहंसः श्रीसर्वज्ञात्माऽपि स्वमहसा पर्याप्तमाचार्यमठमवितुमभवदीश्वर इत्यपि प्रतीयत इति करबदरम् ॥

जपादिष्टः कामकोटिपीठाधिपभूमण्डलदेशिकेन्द्रपाठात् ।
नरनुत्यशुचीनि निर्णिनिक्षे परहंसस्तवतोऽक्षराण्यरूक्षम् ॥ ३७ ॥



इत्थमविशेषेणाचन्द्रशेखरादा च सुरेश्वरादखिलाद्वैतिकुलगुरूनभिप्रणम्य परं श्रीमच्छङ्करभगवत्पादपरम्परागतान् सर्वज्ञात्मा च निजगुरोः परमशिवेन्द्रात् जगद्गुरून् प्रस्तोष्यन् ब्रह्मेन्द्रस्तदेव प्रतिजानीते—जपादिति । जपतामिष्टदः स्तावकाभीष्टदायीति यावत् । कामकोटिपीठस्य काञ्चीशारदामठप्रतिष्ठिततदाख्यशाक्तिविशिष्टविष्टरविशेषस्येति बोध्यम् । अधिपानां तन्मध्यमध्यासीनानामित्यर्थः । भूमण्डलदेशिकेन्द्राणां जगद्गुरुवर्याणां श्रीशङ्कराचार्यापरनाम्नामिति यावत् । पाठः परम्परानुकीर्तनमिति ध्येयम् । यस्मिन् तस्मात् परहंसस्तवतः परमहंसस्तोत्रात् नरनुत्यशुचीनि महीपालादिमनुजविशेषकीर्तनकलितकल्मषाणि तज्जनितपङ्काविलानीत्यपि लक्ष्यम् । अक्षराणि तत्समुदायात्मिकां वाचमित्यर्थः । अरूक्षं अतीव्रं निर्णिनिक्षे निर्णेक्तुमिच्छामि शोधयिष्य इति यावत् ॥ ३७ ॥

सलिलाशन एव यस्सलीलं विलयं प्रापिपदार्हतान् सुशीलः ।
सुमहारफणीन्द्रयोस्सदृष्टिः स हि सर्वज्ञगुरुर्ह्रियात् कुदृष्टिम् ॥ ३८ ॥

यथाप्रतिज्ञमाचार्यभगवत्पादसमनन्तरमधिष्ठितकामकोटिपीठमादिमं जगद्गुरुं श्रीसर्वज्ञं प्रस्तौति—सलिलेति । सुशीलः सुवृत्तः यः सलिलाशन एव सलिलमिति वायुरुग्णांशूनामप्युपलक्षणम् । एतेन नियताहारत्वं लक्ष्यते । आर्हतान् क्षपणकान् सलीलं हेलयैव न त्वायासेनेति यावत् । विलयं विनाशं प्रापिपत् नीतवान् निरशेषमुदवासयदिति बोध्यम् । सुमहारफणीन्द्रयोः मालामहोरगयोः सदृष्टिः समानवीक्षः तुल्यानुभाव इत्यर्थः । स सर्वज्ञगुरुः तदभिधानः श्रीशङ्कराचार्यः कुदृष्टिं द्वैतधियं ह्रियात् अपसारयतु अध्यारोपं निवर्तयत्वित्यर्थः । प्रस्तुतश्चायं बृहच्छङ्करविजये “श्रीमच्छङ्करदेशिकेन्द्रभणितैर्भग्ने च भुग्नानने ताते वर्धननाम्नि सार्धमनुगैः श्रीताम्रपर्णीचरैः । सर्वज्ञासनमारुरुक्षति गुरौ धीरं निवर्त्य श्रुतौ डिम्भः कोऽपि तमूनसप्तमसमो वादैररौत्सीत्स्वयम् ॥ तुर्येऽहन्यथ शङ्करोदितसमाधाने प्रशान्ते शिशौ तातादेर्धुरि संयियासति च तं दृष्ट्वाऽतिहृष्टान्तरः । आपष्ठादप एव भुङ्क्त इतरन्नास्वदाति पृष्टोऽप्यसावोमित्येव गदत्यजस्रमिति तद्वृत्तं च तातादवैत् ॥

मत्वैनं सदृशाविकारिणमधात्तं ब्रह्मदेशोद्भवं प्राप्तानुज्ञमपि स्वतो जनयितुर्वाग्मी सनातं रमम् । आख्यामप्यकरोत्सतस्य च महादेवाभिधस्याग्रतः सर्वज्ञाभिधशङ्करार्थ इति यं स्वस्थाय पीठे न्यधात् ॥" इति । पुण्यश्लोकमञ्जर्यामपि— "ताम्रपर्णीरोधसि वर्धनात् समुदितस्सन्न्यासितस्सप्तमात् प्रागेवात्मविवादहृष्टमनसा श्रीशङ्करेणैव यः । तत्पीठे ससुरेश्वरं समनयद्वर्षांश्च यस्सप्ततिं चत्वारिंशतमास्त सद्व्रयमसावब्दान् स्वयं तन्मठे ॥ आचार्यपिण्यपद्मपादचरणाम्भोजद्वयीसेवनाद्रूढद्वारवतीमठाय मुनये ब्रह्मस्वरूपात्मने । श्रद्धारूढपदाय तत्त्वमतुलं चिन्मुद्रया निर्दिशन्नैवस्वं समगान्निजेन महसा सर्वज्ञसंज्ञो मुनिः ॥ कल्यब्देस्स हयाग्निलोकनयनैर्वर्षे नले माधवे लिल्ये कृष्णचतुर्दशीमनु महस्यामाम्नायशैलान्तिके । ग्रन्थैरेत् कालनिर्भिदर्शि विशदं संक्षेपशारीरकप्रख्यैरद्वयसूत्रभाष्यगहनच्छन्नः पदार्थोच्चयः ॥' इति ॥ अस्य सुरेश्वरादपि विद्याऽवाप्तिरधिगम्यते । तद्यथा संक्षेपशारीरके । प्रथमम् । 'यदीयसम्पर्कमवाप्य केवलं वयं कृतार्था निरवद्यकीर्तयः । जगत्सु ते तारितशिष्यपङ्क्तयो जयन्ति देवेश्वरपादरेणवः ॥ गुरुचरणसरोजसन्निधानादपि वयमस्य गुणैकलेशभाजः । अपि महति जलार्णवे निमग्नाः सलिलमुपाददते मितं हि मीनाः ॥ शक्तो गुरोश्चरणयोर्निकटे निवासान्नारायणस्मरणतश्च निरन्तरायः । शारीरकार्थविषयावगतिप्रधानं संक्षेपतः प्रकरणं करवाणि हृष्यन् ॥" इति, अवसाने च "श्रीदेवेश्वरपादपङ्कजरजस्सम्पर्कपूताशयः सर्वज्ञात्मगिराऽङ्कितो मुनिवरः संक्षेपशारीरकम् । चक्रे सज्जनबुद्धिवर्धनमिदं राजन्यवंशे नृपे श्रीमत्यक्षतशासने मनुकुलादित्ये भुवं शासति ॥" इति च ॥ अस्य परमायुरेकोनविंशत्युत्तरशतमब्दाः । तत्र द्वादशाधिकशतमब्दानध्यास्त कामकोटिपीठीमिति चाधिगम्यते । इति प्रथमममम्बिकामकोटिपीठमाचार्यरत्नम् ॥ ३८ ॥

यमिपञ्चकमाश्रितोज्ज्वलाख्यं शमितान्योक्तिचसत्यबोधमुख्यम् ।
परवैभववारिविद्यमन्तः करवै तत् त्रितयञ्च चिद्घनान्तम् ॥ ३९ ॥



अथाऽऽचार्याष्टकमेकवैवोल्लासाऽभिवर्णयति ॥ यमीति ॥ आश्रिता स्सुन्दराः उज्ज्वला निरतिशयप्रकाशाः सुप्रसिद्धा इति यावत् आख्या संज्ञा यस्य तत् तथा । शमितान्योक्तिखण्डितमीमांसकादिदुर्मतदुरुक्तीति ज्ञेयम् । सत्यबोधमुख्यं सत्यबोधप्रधानं यमिपञ्चकं सत्यबोधज्ञानोत्तमशुद्धानन्दानन्दज्ञानकैवल्ययोगिनाम्नः क्रमात् पञ्चापि गुरून् । किञ्च परेषां आर्हतादीनां वैभववारिणी विभवनिराकरणशीला विद्या यस्य तत् तथोक्तं चिद्घनान्तं श्रीचिद्घनावसानं तेषां गुरूणां त्रितयं त्रीन् गुरून् कृपाशङ्करविश्वरूपसुरेश्वरचिद्घनाभिधानानिति यावत् । अन्तश्चेतसि करवै कुर्यां ध्यायामीत्यर्थः । तथाह्याह सर्वज्ञसत्यबोधौ ज्ञानोत्तम एव स्वकृतौ नैष्कर्म्यसिद्धिचन्द्रिकायाम् । यथा "वस्तुख्यातिविधातिवादितिमिरं नैष्कर्म्यसिद्धिस्फुटव्याख्याचन्द्रिकया विधूय सुधियां सद्दृष्टिमुन्मीलयन् । अन्तः संभृतशान्तिचन्दनसुधोद्द्योतः समुद्द्योतते सर्वज्ञाश्रमचन्द्रमास्त्रिजगतीसर्वज्ञचूडामणिः । पदरुशतहतकुमारिलसौगतगुर्वक्षपादकणभक्षः । यमनियमनिलयधिषणो जयति श्रीसत्यबोधार्यः ॥" प्रस्तुताश्रमे पुण्यश्लोकमञ्जर्यामपि—"आम्रावतीतटनताण्डवशर्मसूनुः श्रीसत्यबोधनियमी फलिनीशनामा । श्रीभाष्यवार्तिककृदादरसंप्रपन्नसर्वज्ञसद्गुरुरबोढधुरां गुरूणाम् ॥ अब्दान्यस्ततत्रसङ्ख्यानवसदधिमठे शारदानाम्नि काञ्च्यां इप्यत्तौतातितार्हज्जिनगुरुकणभुक्पक्षपादङ्घ्र्यादितन्त्रम् । निर्थन्त्रं निर्मिमाणः पदकशतहताराति कौतस्कुतोक्तिस्साक्षात् श्रीसत्यबोधोऽकृतसहवतुलाष्टम्यहे नन्दने स्वम् ॥ जातो मङ्गलनाम्नि चोलविषये नागेशसंज्ञाद्द्विजाच्छ्रीज्ञानोत्तम इत्यवाप्तविरुदो यस्तार्किकाग्रेसरः । ज्ञानानन्दमुनिस्त्रिषष्टिशरदः सम्प्रण्व्य पीठीं गुरोस्सिद्धिं मन्मथमार्गशीर्षसितसप्तम्यामवापत्सुधीः ॥ वेदारण्यजवैद्यभद्रतनयः श्रीविश्वनाथाभिधः ज्ञानानन्दमुनेरवाप्य निगमं काञ्चीपदे स्थापितः । शुद्धानन्दमुनीश्वरः स शरदः सैकामशीतिं धुरामाचार्यस्य वहन्नवाप नलज्येष्ठाच्छषष्ठ्यां लयम् ॥ आनन्दाराद्धगौरीनिरवधिकरुणालब्धसाहित्यविद्यामोहित्यस्सूर्यनारायणपतितनयश्शेरभूश्चिन्नयाख्यः । आनन्दज्ञाननामा भगवद्धु-

पञ्चदशैवमभौ भाष्यकर्तुः पीठे श्रीकामकोट्यां प्रकटितपरमाचार्यभाष्यौघभाष्यः ॥ शुद्धानन्दमुनीन्द्रचन्द्रविमलालोकास्तचेतस्तमाः विस्तार्याद्वयवर्त्म सप्ततिमथो नैकां समागामवन् । श्रीशैलान्तिक आसदन् पथि वशादानन्दसिद्धिं ययौ सिद्धः क्रोधनराधकृष्णनवमीसन्ध्यामनु ब्रह्मवित् ॥ श्रीशैलीयशिवस्यसूनुरदधात्तस्याज्ञया तत्पदं मङ्गन्नार्थ इति श्रुतः परमहो कैवल्ययोगिप्रथः । आरूढां शिवराजयोगपदवीं तिष्ठंस्त्वशीति समास्सिद्धोऽभूत्स च सर्वधारिमकरक्रान्तौ च सायाहनि ॥ अन्धेष्वात्मनसोमयाजितनयः गर्गान्वयो गङ्गयाभिख्यः ख्यापितपण्मतशिवहरिस्कन्दादिसेवाध्वनि । तन्त्राचारविदूरमेव परितो वेदैकवेद्योदितं संस्थाप्याद्वयमप्यथाद्वयकथादूरं कृपाशङ्करः ॥ श्रीकैवल्यमुनीन्द्रशासनवशात् श्रीविश्वरूपाभिधं शृङ्गेर्यां निहितं विधाय नियमाल्लोके व्यवस्थाप्य च । चत्वारिंशतमेकयुक्तमभिमण्ड्याचार्यपीठीं दिशं प्रस्थायैडविडस्य सिद्धिमभजाद्विन्ध्ये कृपाशङ्करः ॥ विभवे विभुरूर्जितः परोर्जे परमाशानुतृतीयमद्वितीयः । परमं पदमात्मनीनमेकं परमानन्दमयं परापराख्यम् ॥ महाबलीश्वरेश्वराच्युतोद्भवो महेश्वराभिधस्सुरेश्वरः परो निधम्य सर्वभूगुरोः । अवाप काञ्चिकामकोटिपीटधूर्वहक्रियां ययौ स्वमक्षये क्षयं शुचेश्शुचिस्स पर्वणि ॥ कर्णाटोज्ज्वलसूनुरीश्वरवटुः श्रित्वा सुरेशं चिराच्छ्रीभाष्याद्युपलभ्य तस्य चधुरामासाद्य पीठे वसन् । निन्ये तत्र शिवास्समाश्शिव इव श्रेयोऽर्थिनां देहिनां दातुं श्रेयउपागतोयमिव यः श्रीचिद्घनाख्यो बभौ ॥ प्राप्तं क्षीरसरित्तटात् हरिरिति ख्यातश्च वात्स्यायनम् पीठे स्वे विनिवेश्य दत्तनियमं सञ्चार्य च प्रक्रियाम् । कल्यब्दे च विरोधिकृत्यनुतपं शुद्धे दशम्यामगात्स्वं रूपं परमं सुधीशतनुतः श्रीचिद्घनश्चिद्घनम् ॥" इत्यनन्तरमाचार्याष्टकम् ॥ ३९ ॥

सुमहाव्रतसार्वभौमचर्याश्रमहानाय निगूढयोगचर्यः ।
शमदां मम चन्द्रशेखरेन्द्रः स मुदं पातु जगद्गुरुर्वितन्द्रः ॥४०॥

अथ द्वादशमुपपादितहरिपदाभिधेयपूर्वाश्रमं श्रीचन्द्रशेखरजगद्गुरुमुपश्लोकयति—सुमहेति । सुमहाव्रतं सुश्लाघ्यनियमभूतेति यावत् । या सार्वभौम-



चर्या नाम निष्ठा तस्यां यः श्रमः खेदः तस्य हानाय तं हातुमित्यर्थः । निगूढयोगचर्यः गुप्तयोगाचरणः परित्यज्य मठनिवासमिति बोध्यम् । वितन्द्रः तन्द्रेति निद्राहाराणामप्युपलक्षणम् । तद्विहीन इति यावत् । स जगद्गुरुः चन्द्रशेखरेन्द्रः मम शमदां शान्तिप्रदां मुदं सन्तोषं पातु रक्षतु मुदितामव्याहतां पुष्णात्वित्यर्थः । अनेनायं कतिपयवर्षाणि विमठमुषित्वा परं कञ्चिदन्तेवासिनं निवेश्य तत्र स्वयं सार्वभौममहाव्रतपरायणः क्वापि निगूढ इति प्रतीयते । तथा हि पुण्यश्लोकमञ्जर्याम्—'श्रीचिद्घनेन्द्रनियतश्शरदस्त्रिपष्टिं श्रीकामकोटिमभिमण्डय्य ततश्च कश्चित् । सच्चिद्घनाख्यमनुशिष्य वृतोऽपि शिष्यैः श्रीचन्द्रशेखरगुरुस्सवपुस्तिरोऽभात् ॥' इति । अयञ्च द्राविडः क्षीरनदीतीरवासी हरिनामा ब्रह्मचारीपरं श्रीचन्द्रशेखराभिध इति द्वादशं गुरुरत्नम् ॥ ४० ॥

फलहायनकाष्ठमौनसेवाबलहासास्पदबालमुग्धभावम् ।
अजरामरमात्तलिङ्गभावं भज सच्चिद्घनमन्तरङ्ग देवम् ॥४१॥

अथ सच्चिद्घनं स्तौति—फलेति । फलहायनं फलेति द्वात्रिंशतः संज्ञा द्वात्रिंशद्वर्षकालमित्यर्थः । काष्ठमौनस्य निश्शब्दवाचंयमव्रतस्य सेवाबलात् आश्रयवशात् हासास्पदं बालमुग्धभावः यस्य तं बालोन्मत्तपिशाचवदखिलजनहासास्पदं आदृतमौनं अटनमिटन्तमिति यावत् । अजरामरं योगमहिम्ना निरस्तजरामरणमित्यर्थः । आत्तलिङ्गभावं आसादितशिवलिङ्गरूपं देवं देवतात्मना स्थितं सच्चिद्घनं तदभिधं जगद्गुरुं हे अन्तरङ्ग भज सेवस्व इति चित्तं प्रति बोधनम् । अयं किल श्रीसच्चिद्घनेन्द्रः समनुभूय समास्सप्तत्रिंशदाचार्यपीठवासमुक्तं अधिरोप्य विद्याघनं अध्यात्मनीनमठमाटनकाष्ठमौनः परं अभितः पुरीं समास्त्रिंशदटन्नुन्मत्तदेश्यमर्भककुलैरनुधाव्य तृणशिलाक्षेपादिना बाध्यमानो यदृच्छयाभिरुद्रशालमासीत्तिरोहितो लिङ्गमूर्तौ भगवति ततस्तच्च लिङ्गमभिख्ययापि कायारोह इत्यभूदिति सत्यव्रतीयानां किंवदन्ती । पुण्यश्लोकमञ्जर्यामपि — 'सप्तत्रिंशदसौ समास्समनुभूयाचार्यपीठीधुरां श्रीविद्याघननामधेयमुनिमध्याचष्टी-

नायनाख्यं मठे । आम्यन् बालवदन्तरे पुरवरस्याधूतवृत्तिः स्थिरः श्रीसच्चिद्घनदेशिकस्तमगमत्स्वान्तर्भिमन्वीश्वरम् ॥ ननु श्रीधरपण्डितस्य गरुडस्रोतस्विनीतीरभूः शिष्याग्र्यो गुरुचन्द्रशेखरमुनेरशिष्यश्च सच्चिद्घनः । वर्षान् सप्ततिमेकवर्जमनुभूयाध्यात्मबुद्ध्या सुखं देहान्ते शिवलिङ्गमध्यमविशत्काबाधिरोहेशितुः ॥' इति । इति त्रयोदशमाचार्यरत्नम् ॥४१॥

कलया मलयाद्र्यगस्त्यकूटस्थलयातूपितभैरवप्रमोदम् ।
कलयाम लयाध्वलीढभानुं चलविद्याघनमाप्तकामधेनुम् ॥४२॥

अथ समनन्तरं विद्याघनं प्रस्तौति—कलयेति । कलया विद्यया मलयाद्रेः पटीरशैलस्य यत् अगस्त्यकूटमिति स्थलमधिकरणं तस्मिन् यातूपितस्य राक्षसवद्विचमानस्य समीपचरसत्त्वहिंसकतया भैरवस्य संहारभैरवात्मनः परमेश्वरस्य प्रमोदं कलाकर्षणात्प्रशामकमित्यर्थः । लयाध्वना लययोगविशेषानुष्ठित्येति ज्ञेयम् । लीढाः आस्वादिताः भानवः सूर्यमरीचयो येन तं आप्तकामधेनुं आश्रितानामखिलकामदमित्यर्थः । चलतीति चलः अनवरतसञ्चारशीलत्वात्तथोक्तः सचासौ विद्याघनश्च चलविद्याघनः तं कलयाम आश्रयाम गोप्तृत्वेन भजामेत्यर्थः । मन्त्रसिद्धतयैषोऽगस्त्यकूटपरिसरपुरवासिभिः समुपेत्य तत्समीपस्थस्य नानासत्त्वविलोपिनः उग्रभैरवस्य कलाप्रशमनार्थं कलितमुचिराकर्षणस्तत्प्रशमनाधाय तत्रैव नियताहारः स्वयमुपयथाप्यापदिति ज्ञेयम् । तथा हि पुण्यश्लोकमञ्जर्यामपि—'निवेश्य गङ्गाधरगीष्पतिं पदे प्रविश्य कूटं तदगस्त्यविहितम् । प्रमोटयन्मन्त्रत उग्रभैरवं निवेशनं सर्वं तत एव कल्पतवान् ॥ श्रीमद्वापनसोमयाजितनयः श्रीनायनाभिख्यया ख्यातः पूर्वमुदारमन्त्रनिभवत्संयम्य सच्चिद्घनात् । आस्थायाप्यनिकामकोटि सशिवानन्दानगेऽगाच्छयं धातौ शालिगणीशिखीक्षणसहे दर्शे च विद्याघनः ॥' इति । अनेनायं पञ्चचत्वारिंशदब्दमध्युष्य गुरुपीठमन्ते मलयाद्रावगस्त्यकूट एव शाल्यब्दे २२९ तमे धातुनामनि तिष्यदर्शदिवसे सिद्धिमाप्तेदिति ज्ञायते । इदञ्च चतुर्दशं गुरुरत्नम् ॥४२॥



गुरुमार्गगवेषणात्तवेलाचलदृष्टाग्रजशिष्टमन्त्रलोलम् ।
हरपूजनपूतगात्रमोहं वरगङ्गाधरगीष्पतिं श्रयेऽहम् ॥४३॥

अथ पञ्चदशमाचार्यरत्नमवतारयति—गुर्विति । गुरोश्चलविद्याघनशङ्करार्यस्य यो मार्गः पदवी तस्य गवेषणे अन्वेषणे आत्तः प्राप्तः सचासौ वेलाचलः मलयगिरिः तस्मिन् दृष्टो योऽग्रजः तेन ब्राह्मणेन अगस्त्येनेत्यर्थः । शिष्टे उपदिष्टे मन्त्रे मन्त्रराजे श्रीविद्याविंशत्ये पञ्चदशाक्षर इत्यर्थः । लोलमासक्तचित्तम् । एतेनास्य लौल्यमस्मिन्नेव न त्वन्यत्र पीठाधिपत्यादिष्विति ध्येयम् । हरस्य योगलिङ्गात्मनः श्रीचन्द्रमौलेः पूजनेनार्चनेन पूतं पवित्रमस्ताशेषकल्मषमिति यावत् । अस्तमोहमविद्यालेशशून्यमात्मविदं वरो वरेण्यो जगद्गुरुत्वादिति गम्यम् । यः गङ्गाधरः गीष्पतिरिव इत्युपमितसमासः । तमहं श्रये आश्रयाम्यात्मनः श्रेयस इत्यर्थः ॥ अयं हि श्रीगङ्गाधरदेशिकेन्द्रः वाग्मितयाऽत्यन्तमेधावितया च नियमिभिर्गीष्पतिरिति गीयमानः गुरोः श्रीविद्याघनेन्द्रस्यान्वेषणाय मलयं गतस्तत्र सन्निहितवता वृद्धब्राह्मणरूपिणा कुम्भोद्भवेनोपदिष्टश्रीविद्यः गुरोश्च समवगम्य ब्रह्मसिद्धिं निवृत्य तन्मन्त्रसाधकस्समा द्वादशैव पीठमध्युवास । तथा हि पुण्यश्लोकमञ्जर्याम्—'सूनुर्भद्रगिरेस्सुभद्र इति यः कञ्चयन्त्रयो द्वादशे वर्षे संयममाश्रितोऽनुचरितादाचार्यविद्याघनात् । श्रीगङ्गाधरगीष्पतिस्स च चतुर्विंशे वयस्यात्मविच्छ्रीविद्याशिवयोर्निरन्तरधृतेराप्तोत्पदं शाश्वतम् ॥' इति । इदं हि पञ्चदशमाचार्यरत्नम् ॥ ४३ ॥

कुलशेखरसाहितीप्रणेत्रे चलदासेतुहिमाद्रिविज्ञनेत्रे ।
जरदृष्टिशकादिपुष्टिदात्रे स्थिरवर्णाश्रमधर्मसंविधात्रे ॥४४॥

अथोत्तरमाचार्यमुज्ज्वलप्रकृतिमभिवर्णयति द्वाभ्यां—कुलेति । कुलशेखराय तदाख्यस्यानन्दूरपुरवराधीश्वराय श्रीकेरलेन्द्राय साहित्याः सरसकवितायाः प्रणेत्रे प्रदात्र इत्यर्थः । चलन्तः अटन्तः विवादविजिगीषयेति भावः । आसेतुहिमाद्रिस्थिताः आरामेश्वरमाहिमवतश्च तत्स्थिवांसः ते च ते विज्ञाश्चेति शाकपार्थिवादित्वात्समासः । तेषां नेत्रे नियन्त्रे व्यवस्थापकाये-

ति यावत् । एतेनास्य सर्वविबुधयूथातिशायित्वमुक्तं भवति । जरदृष्टेस्तदारूपपण्डितब्राह्मणवृन्दस्य सम्बन्धिनस्तन्मतानुसारिण इत्यर्थः । ये शकादयः आदिशब्दाद्यवनसिल्हकबाल्हिका गृह्यन्ते । तेषां वृष्टेः घर्षणोत्थप्रद्रवस्येत्यर्थः । दात्रे उत्पादयित्र इति भावः । विवादेन परिभूय भयपलायितान्विदधत इति निर्गलितोऽर्थः । स्थिराणां वर्णाश्रमधर्माणां संविधात्रे यथोचितमाचारयित्रे ॥ ४४ ॥

स्तनितं निगमेषु शङ्करेण ध्वनिमद्वैतमुदस्यते चिरेण ।
प्रणयानि महायतीशभूम्ने प्रणतीरुज्ज्वलशङ्करार्यनाम्ने ॥४५॥

स्तनितमिति । शङ्करेण श्रीभाष्यकृता निगमेषु वेदान्तेषु स्तनितं उद्घुष्टं प्रकाशितमिति यावत् । अद्वैतं द्वैतगन्धरहितं ध्वनिं तत्सादृश्यात्तयोक्तं सिद्धान्तमित्यर्थः । तत्सादृश्यञ्च 'तत्तु समन्वया'दिति समन्वयेन स्वपदोपस्थापितपदार्थसंसर्गाविषयशाब्दबोधजनकत्वेन सर्वेषामपि वेदान्तवाक्यानामद्वैते ब्रह्मणि तात्पर्यमित्यादिकल्पनया वाच्यानपेक्षमेव प्रतीयमानत्वादिति बोध्यम् । 'इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथित' इत्याद्यालङ्कारिकोक्तेर्ध्वनिश्च वाच्यानपेक्षव्यङ्ग्य एवेति दिक् । चिरेण बहोः कालात् उदस्यते उच्छ्रायं प्रापयते सर्वतः प्रकाशयत इति यावत् । उज्ज्वलायात्यन्ततेजस्वितया तथा जनैर्व्यवहृताय शङ्करार्यनाम्ने पीठानुगुणविरुदभाजनाय महायतीशायैव भूम्ने तदभिधानायैव परस्मै ब्रह्मण इत्यर्थः । प्रणतीः प्रणामान् प्रणयानि करवाणि ॥ अयं किल बाल्य एव साङ्गमाम्नायांश्चतुरोऽप्यधीत्य स्नातः नैष्ठिकस्सन्नासेतुकलितयात्रः स्यानन्दूरपुरवराधीश्वरश्रीकुलशेखरवर्मपरिचारितपादपद्मस्तमनुगृह्य निगृह्य चेन्द्रियग्राममधिमहेन्द्रमाचरंस्तपः श्रीगङ्गाधरगीष्पतिना दृष्टोऽनुशिष्टश्च संयमीभूतस्तदाज्ञयैव तुहिनभूधरं यावदाकलितजैत्रयात्रः प्रसभमुज्ज्वलज्वलनसेविनश्शकयवनसिल्हकबाल्हीकानासिन्धुपारं मद्राज्य सर्ववर्णाश्रमधर्मव्यवस्थापूर्वमाचार्यभाष्यगतमद्वैतमभितस्सन्दयांश्च र्वयन् गर्वितानपि विदुषो विवादवशान् पशूनिव विगतपौरुषानाधाय स्वस-



मयवर्तिनः कृतकृत्यः कश्मीरेष्वद्यापि तदभिधया प्रसिद्धे प्रदेशे महायतिपुरनामनि ब्रह्मभूयं गतः ॥ तथा हि पुण्यश्लोकमञ्जर्यामपि—'सूनुः केशवशङ्करस्य तपतीतीरोद्भवो नैष्ठिकः श्रीमानच्युतकेशवः श्रितपदे वञ्चीश्वरे गीष्पतेः । आदेशात्कृतसंयमश्च विमतानामूलमुन्मूलयन्नाकश्मीरमगान्महायतिरिति ख्यात्योज्ज्वलश्शङ्करः ॥ अष्टात्रिंशदथातिवाह्य शरदः पीठे जगद्देशिकस्यासीद्विग्रसवार्धिवाह्निषु कल्यात्स्वक्षयेऽर्के वृषे । अष्टम्यामपहर्षशोकमजरं ब्रह्मैव यश्शाश्वतं कश्मीरेषु कलापुरे यदधुनाऽप्याख्यायतेऽस्याख्यया ॥' इति । अनेनायं जन्मना महाराष्ट्रः कश्मीरेषूज्ज्वलमहायतिपुराभिधेऽग्रहारे ३४६८ तमे कल्यब्दे अक्षये वैशाखाष्टम्यां सिद्धिं गत इति ज्ञायते ॥ इदञ्च पञ्चदशोत्तरमाचार्यरत्नम् ॥ ४५ ॥

अथ गौडसदाशिवेन्द्रपादान् प्रथितान् न्यक्कृतवाह्लिकप्रवादान् ।
जननक्षण एव जातबोधान् जगदाचार्यपदान् श्रये विबाधान् ४६

सप्तदशं प्रस्तौति — अथेति । अथ जगदाचार्यपदान् जगद्गुरुशब्दवाच्यान् तद्विरुदभाजनशारदामठाधिपान् प्रथितान् प्रशस्तकीर्तीन् निर्दोषवृत्तित्वान्निर्मलयशस इति यावत् । जननक्षण एव जन्मसमय एव जातबोधान् समवगतात्मयाथात्म्यानित्यर्थः । विबाधान् विगतबाधान्वाहिंसानिति यावत् । न्यक्कृतवाह्लिकप्रवादान् तिरस्कृततदभिधजनपदबुधजनदुर्मतदुर्मददुरुक्तीनित्यर्थः । गौडसदाशिवेन्द्रपादान् तदभिधानान् पूज्यान् श्रये आश्रयामि ॥ अयं हि श्रीसदाशिवसद्गुरुः काश्मीरिकामात्यस्य देवमिश्रशर्मणो जिनमताभिनिवेशिनो ब्राह्मणस्य सूनुर्जननक्षण एव व्यपेतमोहमात्मैवेदमन्यन्न किञ्चिदिति विशदमभिधाय गुरुजनबहुमतं जिनमतं निरस्यन्नसूयुभिरार्हतैर्विसिन्धु निक्षिप्तः तयाऽपि सहादरमधिनलिनीदलमक्षतवपुरेव नीयमानः पुत्रीयतः स्नानार्थमनुस्वसलिलमवतीर्णस्य भूरिवसुशर्मणः पुण्यपुरवासिनस्तपस्विनः करं "अयन्ते सुतस्तपस्तोषितया मया प्रत्तः" इति सहाशरीरिण्या वाचा प्रापितः सादरमनेन पोषितस्समुपनीतश्च सम्भवक्षण एव सगभर्गवविद्यावैशारद्यनया सर्वेष्वस्सपवमद्वैतमेव सञ्चा-

रयन् उज्ज्वलशङ्करार्यसङ्गतः सप्तदशाब्द एव संयममनुगतः स्वगुरोर्महायतेराज्ञयैव ससुवर्णान्दोलिकं सविभवपरिवारश्च सञ्चरन् समाचरंश्चान्वहं ब्रह्मसाहस्रसन्तर्पणमासमुद्रविद्रावितविमतवैकृतस्सर्ववर्णाश्रमधर्मनियमनपरः प्रपन्नेभ्यो वारानासन्नपञ्चाशानाश्रावितशारीरकमीमांसः समधिष्ठायाष्टौ समाः कामकोटिपीठमथ श्रितपदं सुरेन्द्रमधिनिजमठं निवेशयन्नविशदमुमानेव समाधिधरां दरीमधिनासिकात्र्यम्बकमित्यभियुक्ताः ॥ तथाहि पुण्यश्लोकमञ्जर्याम् "विप्राच्छ्रीदेवमिश्रादजनि जनित एवाप्तविद्याप्रकाशः संस्कारैः प्राक्तनैर्यः समगिरत गिरं सर्वमात्मेति सत्यम् । तन्नोमृष्यद्भिरर्थाज्जिनयुगभिजनैः पातितस्सिन्धुवेण्यां त्रातः प्रेम्णैव सिन्धुर्वाऽप्यविलयममुया पद्मपात्रे निवेश्य ॥ सूनुस्सोऽयं तपोभिस्तवमुदितधिया दीयतेऽद्येति वाचा सार्धं दत्तो द्विजाय स्थिरनियमयुजे यस्तयैवोह्यमानः । पुष्टस्तेनाथ पुष्पाभिधपुरजनुषा भूरिवित्ताह्वयेन त्रात्रा पित्रोपनीतस्समयमयमधादद्वयं निर्द्वयत्वे ॥ आचार्यमुज्ज्वलमहायतिशङ्करार्यमाराध्य संयममवाप्य तदाज्ञयैव । श्रीमान् सदाशिवगुरुर्व्यधिताऽऽब्धियात्रां सान्दोलिकं सुविहिताश्रमवर्णधर्मः ॥ नित्यं ब्रह्मसहस्रपोषणपरस्सर्वत्र भाष्यं गुरोः सञ्चार्य द्विविवर्जितान् सनियमं वारांश्च पञ्चाशतः । अध्यास्याष्ट जगद्गुरोरभिमठं वर्षान् समाधिस्थलीं जीवन्नेव सदाशिवस्समविशत्कृत्वा सुरेन्द्रं पदे ॥ भवे भवाकृतिस्सोऽपि ज्येष्ठे ज्येष्ठस्तपस्विनाम् । दशम्यामाप दशमीं सिद्धिं सिद्धस्सदाशिवः ॥" इति ॥ इदञ्च सप्तदशमाचार्यरत्नम् ॥ ४६ ॥

**विवदन् धिषणेन साधु दुर्दीदिविसाह्वाय समागतेन सार्धम् ।**
**जयिजीर्णसुरेन्द्रभूमिभोगी जयतान्नस्सुधिये सुरेन्द्रयोगी ॥४७॥**

अथाष्टादशमाचार्यमतिवदावदमखिलनृपाललालितमात्मारामं सुरेन्द्रयोगिनमाह—विवदन्निति । दुर्दीदिवेस्तदाह्वयस्य चार्वाकस्य साह्याय साहाय्यकरणाय समागतेन लोकायतान्वयच्छद्मनेति ज्ञेयम् । धिषणेन सार्धं बृहस्पतिना सह साधु जयसाधनपूर्वमित्यर्थः । विवदन् विवादमाचरन् जयिनः नित्यजयशालिनः प्राप्तबहुभूपालजयस्येत्यर्थः । जीर्णस्य वृद्धस्य सुरेन्द्रस्य तदाख्यस्य काश्मीरिकनरेन्द्रादित्यभागिनेयस्य राज्ञो भूमेः स्वपीठसात्कृतायाः सर्वमान्यभोग्याया इति यावत् । भोगी अनुभवशीलः पीठाधिपत्यवशादिति ज्ञेयम् । योगिनो भोगित्वानौचित्यात् । सुरेन्द्रयोगी तदाख्यः श्रीजगद्गुरुः नः सुधिये सत्यपि सर्वविभवे साधनं योग एव श्रेयस इति सुष्ठु ज्ञातुमित्यर्थः । जयतात् सर्वोत्कर्षेण वर्तताम् ॥ अयं हि चार्वाकमतधुर्वहेण दुर्दीदिविनाम्ना विवदन् तत्साह्याय समागतं मायालोकायतममरगुरुञ्च परिभूय सदसि सुरेन्द्रभूपालस्य सभाजितो बहुविधैरुपचारैरिति समधिगम्यते ॥ यथाऽऽह पुण्यश्लोकमञ्जरी—'दुर्दीदिविं समभिभूय तथाऽस्य साह्यासक्तञ्च जीवमपवार्य सधैर्यमुक्त्या । सम्पूजितस्सदसि राजसुरेन्द्रमुख्यैः योगी सुरेन्द्रनियमी युयुजे पदे स्वे ॥ महाराष्ट्रस्सर्वैरपि च विनुतो माथुर इति प्रपन्नस्सन्न्यासं रसवसुजलध्यग्निषु कलेः । दशैवाध्युष्याब्दानभिमठमयं योगितिलकः सुरेन्द्रः स्वं मार्गे प्रतिपदमनुप्राप निलयम् ॥' इति ॥ इदञ्चाष्टादशमाचार्यरत्नम् ॥४७॥



**चिरसाधितषोडशीप्रसादक्षरितश्वित्ररुजं निरस्तवादम् ।**
**स्ववशासुविसर्गमर्कभृत्यं नवविद्याघनमाश्रितोऽस्मि नित्यम् ॥४८**

अथैकोनविंशमुपक्रमते—चिरेति । चिरसाधितायाः बहुकालसमाराधितायाः षोडश्यास्तत्प्रतिपाद्यायाः श्रीविद्यायाः प्रसादात् अनुग्रहात् क्षरिता नाशं प्राप्ता श्वित्ररुक् तदाह्वयआमयो यस्य तं निरस्तवादमाश्रितमौनमित्यर्थः । स्ववशः स्वतन्त्रः स्वेच्छानुगुणप्रभवः । असुविसर्गः प्राणविमोक्षः यस्य तम् । देवव्रतादिवत्स्वेच्छानुगुणमरणमिति यावत् । अर्कभृत्यमधिब्रह्मचर्यमधिगतपूर्वदासाभिधं नवविद्याघनं अभिनवविद्याघनेन्द्रसरस्वतीं नित्यं सदा आश्रितोऽस्मि प्रपन्नोऽस्मीत्यर्थः । एष विद्याघनः प्रत्यहमनुष्ठिताष्टोत्तरसहस्रसूर्यनमस्कृतिराचरितश्रीविद्याजपश्च प्राग्भवीयपापजातजनितश्वित्ररोगमवधूय श्रीसुरेन्द्रयमीन्द्रसेवनावाप्तपारमहंस्यः परमं मौनमवलम्ब्य प्रणिधाननिरुद्धतया स्वेच्छानुभाव्यमरणस्समास्त्रयोदश समध्यास्त सर्वज्ञपीठमध्यमिति बोध्यम् । यदाहुः सर्वज्ञसदाशिवबोधेन्द्राः—

'श्रीकण्ठोऽयमुमेशशङ्करसुतः श्वित्री वयस्यष्टमे निर्हन्तुं गदमन्वहं कृतनमस्साहस्रमर्कं भजन् । श्रीविद्याजपतश्च नीरुजतनुर्जातस्तथाऽष्टादशे सन्न्यस्यन् सुरेन्द्रदेशिकपदं प्राप्तप्रशान्तान्तरः ॥ मौनी तपस्स्ववश-मृत्युरखिलपीठमठांस्त्रयोदश विहृत्य च शङ्करेन्द्रम् । निक्षिप्य दत्तगुरुवाचमलब्ध सिद्धिं सह्ये विलम्बिनि तथाऽहि महानवम्याम् ॥' इति ॥ इदं त्वेकोनविंशमाचार्यरत्नम् ॥ ४८ ॥

**घनवाग्जनिमूक एव विद्याघनकारुण्यत ऊढहृद्यविद्यः ।**
**कलयन्नपि मेण्ठकं कवीन्द्रं कलयेन्नः स शिवानि शङ्करेन्द्रः ॥४९॥**

अथ विंशमात्तमूकशङ्कराभिख्यमाचार्यशिरोमणिमनुवर्णयति—घनेति । जनिमूकः जात्यैवोपहतवाक् सन्नपीति शेषः । विद्याघनकारुण्यत एव घनवाक् पटुतरवाग्विलास इत्यर्थः । ऊढहृद्यविद्यश्च लब्धानवद्यब्रह्मविद्यश्च सन्निति बोध्यम् । मेण्ठकमपि हास्तिपकमपि वक्षिणादेवेति शेषः । कवीन्द्रं कलयन् महाकविं कुर्वाणः हयग्रीववधाख्यनाटकप्रबन्धप्रबन्धारमिति यावत् । सः शङ्करेन्द्रः नः शिवानि कलयेत् करोतु ॥ ४९ ॥

**अपि यः श्रितमातृगुप्तविद्याधिपसेतुप्रवरादिसूरिहृद्याम् ।**
**सुषुमामथिताहिमाद्रिभूमौ विषमादित्यनुतोऽवतात्स चामुम् ५०**

अपीति । अपि च यः विषमादित्यनुतः विषमादित्येन हर्षापरपर्यायेण तदभिधानोज्जयिनीश्वरेण शकारिणा विक्रमादित्येन नुतः प्रशंसितः परिचर्यापुरस्सरमिति यावत् । श्रिताः आश्रिताः मातृगुप्तः काश्मीरिकक्षितिपतीभूतः स्वस्यैव पूजाचन्दनपिष्ट्कवयिता विप्रवटुस्तदाख्य इति यावत् । विद्याधिपः रामिलाख्यः स्वस्यैवाश्वीयशालाविचारकस्तादात्विकविबुधजनमाननीयतद्बिरुदवाही मणिप्रभाकारो मैथिल इति लक्ष्यम् । सेतुप्रवरः सेत्वाख्यकाव्यनिर्माता प्रवरसेनः तदाख्य आञ्जनेयः कुलालगृहपोषितस्तोरमाणनृपालतनयः काश्मीरिको महाराज इत्यर्थः । तदादयः ये सूरयः तत्प्रमुखा ये विद्वांसः कवयश्च तेषां हृद्यां मनोहरां तैरभिनन्दितामित्यर्थः । आहिमाद्रिभूमौ हिमालयावधिभूप्रदेशे सुषमां तदाख्यां पद्धतिं महापथमिति यावत् ।



अथित आरचितवान् । सः अमुं मामित्यर्थः । अवतात् रक्षतु ॥ इदमत्रानुसन्धेयम् । यत्किल मणिप्रभायां—'सूत्रधारः—आर्ये अवधीयताम् । "भङ्क्त्वं चन्दनमर्दिनः प्रणतयोः स्फूर्जद्रसां साहितीं हर्षक्षोणिपतेश्च हर्षमतुलं दृष्ट्यैव येऽतानिषुः । धीरांस्तान् गुरुशङ्करेन्द्रयमिनश्चित्ते स्मरन् रामिलः प्राणैषीत्समणिप्रभां प्रथयितुं भक्तेर्गुरोर्गौरवम् ॥ नटी—अज्जउत्त को सो चंदणमद्दी के पणदा को अ हरिसमहीवालो के वा गुरुहोरणा मेहआ संकरिंदा इत्ति संकिचिज्जइ गुरुपदेण समंचेअ कइणा । सूत्र—न जानासि 'मूकार्भोऽपि जगद्गुरोः करुणया विद्याघनस्याप्तवागाचार्योऽस्ति हि शङ्करेन्द्रविरुदस्सर्वज्ञपीठाधिपः । अर्चाकिङ्करमातृगुप्तकविताग्र्वस्य निर्वासनायाधायोऽश्वपनागपावपि कवी रामिल्लमेण्ठू क्षणात् ॥ किञ्च ॥ आचार्यैश्शद्विजन्मार्च्यतिथिषु विनतो वैनतेयश्शकाहेः कश्मीरानव काव्यं किमपि कवयितुर्दत्तवानप्रमत्तम् । रक्षादत्तप्रहर्षप्रकृतिकृतिशताम्मातहर्षस्सहर्षः कर्णाभ्यर्णावतीर्णः कथमथ तव नो विक्रमी विक्रमार्कः ॥' इत्यादिना । यच्च हयग्रीववधेऽपि—'ख्यातश्रीशङ्करेन्द्रप्रचुरतरकृपालब्धसाहित्यविद्यः सद्यस्साधूक्तिसंमोद्यपि परकविताऽर्पिणो मातृगुप्तात् । प्रौढाः प्रौढोक्तिरूढैर्निबिडरसभरैर्गुम्भनैर्यत्र मेदुर्मेदुर्मोदादनादौ द्वयवदनवधं वाग्म्यकुण्ठस्समेण्ठः ॥' इति च प्रपञ्चितम् ॥ अमी च श्रीशङ्करेन्द्रभगवत्पादाः 'जातः खल्वाटवीराद्गणककुलमणेस्साधुविद्यावतीतो मूको मूकार्भनामा भुवनगुरुपदाम्भोजरेणोर्महिम्ना । व्यक्तप्रौढोक्तिराप्योपनयनमखिलाम्नायजातञ्च तातादृह्णन् सन्न्यासमासीत्परमभिजगदाचार्यपीठं सधीरः ॥ श्रीशङ्करेन्द्रः श्रितमातृगुप्तमाधाय वर्णाश्रमधर्मपालम् । सैकोनषष्टित्रिशते शकेऽब्दे सिद्धिं गतः श्रावणपूर्णिमायाम् ॥' इत्यादिपुण्यश्लोकमञ्जरीसन्दर्भेणाध्यासामामुराचार्यपीठमिव्र समा एकोनषष्टिमितिमुनिर्णीतं सुषमाख्यपद्याविरचनं च प्रपञ्चितं हरिमिश्रीगे—'ततः प्रवरसेनस्य साह्येनामिततेजसः । पद्यां सुषमां नाम हिमाद्रेस्स चकार ह । आचन्द्रमवमामिन्धु हिमालयमहीभृतः । श्रीशङ्करेन्द्रेण कृता पद्या साऽद्यापि दृश्यते ॥' इति । इदं विंशमाचार्यरत्नम् ॥ ५० ॥

**अनुजह्नुसुतातिवाहिताहं विधिनाऽऽराधितशङ्करं विमोहम् ।**
**शरणं समुपैमि चन्द्रचूडं चरणप्रौढतपः पतत्रिनीडम् ॥५१॥**

अथैकविंशमुपवर्णयति—अन्विति । अनुजह्नुसुतं जाह्नवीपरिसरे वाराणस्यामिति यावत् । अतिवाहिताहं क्षपितायुश्शेषमित्यर्थः । विमोहं मोहशून्यं यथा तथा विधिना यथाविधानमित्यर्थः । आराधितौ सेवितौ अर्चितौ वरिवस्याभ्यामिति बोध्यम् । शङ्करो महादेवः शङ्करस्तदभिधआचार्यः श्रीनशङ्करेन्द्रश्च शङ्करश्च शङ्करश्च तौ शङ्करौ येन तं तथोक्तम् । सरूपाणामित्येकशेषः । करणेन आचरणेन प्रौढानि वृद्धिं गतानि तपांस्येव पतत्रिणः खगास्तेषां नीडं कुलायभूतमखिलतपोनिलयमित्यर्थः । चन्द्रचूडं तदभिधमाचार्यं शरणं समुपैमि प्रपद्य इत्यर्थः । अयं हि प्रागुदाहृतो मातृगुप्त एव संयम्य दशैव शरदस्समलञ्चकार सर्वज्ञपीठीमधिगतचन्द्रचूडनामेति ज्ञेयम् । तथाहि पुण्यश्लोकमञ्जरी—'अर्चाचन्दनपेषणाद्भगवतः श्रीशङ्करेन्द्रार्चितस्यारूढः पदवीं कवेरनुसृतेर्हर्षस्य भूत्वा नृपः । कश्मीरेषु विरज्य विक्रमभृतौ गृह्णन् गुरोः प्राक्तनात्सन्न्यासं स हि कोङ्कणाच्युतसुतः श्रीचन्द्रचूडोऽभवत् ॥ अब्दान् देवनदीतटे दश नयन्नाचार्यभूतोभुवो धन्वन्तर्यवतारमार्यमधुरं निक्षिप्य पीठे निजे । दत्वाऽस्मै परिपूर्णबोधविरुदं भेजे व्ययेचाव्ययं धाम स्वं जननाष्टमीनिशि हरेः श्रीचन्द्रचूडाश्रमी ॥' इति । इदञ्चैकविंशमाचार्यरत्नम् ॥ ५१ ॥

**परिपूर्णविबोधनामभाजां धुरि गोकर्णधराभुवां विराजत् ।**
**मम मानसमस्पसिद्धिभूम्ना ममतार्तिं विजहातु मोदसीम्ना ५२**

अथ द्वाविंशमाह—परीति । गोकर्णधराभुवां गोकर्णक्षेत्रसम्भूतानां परिपूर्णविबोध इति नाम भजन्तीति तेषां परिपूर्णबोधाभिधानानां धुरि सन्निधौ विराजत् प्रकाशमानमुपस्थितमिति यावत् मम मानसं चेतः अस्याः क्षेप्तुं योग्याः परिभवनीया इत्यर्थः । सिद्धीनामणिमादीनां भूमानः प्रभावाः यस्यास्तया अणिमाद्यैश्वर्यातिशायिन्येति वास्तवार्थः । मोदसीम्ना आनन्दात्मकपरमपदावाप्त्येति यावत् । ममतामेवाहङ्कारमेव आर्तिमनर्थं विजहातु विमुञ्चतु परमानन्दावाप्त्या प्रशिथिलसकलोपप्लवं भवत्वित्यर्थः ॥ अयञ्च श्रीपरिपूर्णबोधः शरदश्चतुस्त्रिंशतः अवात्सीदाचार्यधुरामवाप च प्रतिजगन्नाथमात्मनि विलयमिति पुण्यश्लोकमञ्जरीकाराः । तद्यथा 'पुत्रो रमेशमखिनो मधुरोऽगदंकृत् ग्रावाभिलापक इति प्रथितश्च मन्ले । श्रीशारदामठगुरुः परिपूर्णबोधो रौद्र्यूर्जशुक्लनवमीमनु सिद्धिमार्छत् ॥ इति ॥' इदञ्च द्वाविंशमाचार्यरत्नम् ॥ ५२ ॥

**अपि नास्तिकमास्तिकं दधानान् लपितैर्ज्यौतिषमार्यभट्टमूनम् ।**
**प्रतिषिद्धपयोधिपोतयानान् यतिसच्चित्सुखसद्गुरून्नमामि ॥५३॥**

अथ त्रयोविंशम्—अपीति । ऊनं कुणिं ज्यौतिषं गणकं आर्यभट्टं तदभिधं कार्तान्तिकं नास्तिकमपि निरीश्वरतानिरूढचित्तमपि लपितैः विवदितैः आस्तिकमवाप्तवेदेश्वरादिप्रत्ययं दधानान् कुर्वाणान् स्वतपःप्रभावेन करं दत्वेत्यपि योजनीयम् । प्रतिषिद्धं निषिद्धमस्मार्तत्वादित्यर्थः । पयोधौ समुद्रे पोतेन वहित्रेण यानं रामसेत्वाद्यननुशिष्टदेशयात्रा यैस्तान् यतीन् सच्चित्सुखसद्गुरून् नियमिनस्तदभिधानाचार्यवर्यान् नमामि नमस्करोमि ॥ अत्र छायाग्रहणाय प्रतिप्रतीचि सुदूरकलिततरणियात्रस्य नास्तिकशिरोमणेः कुणेरार्यभट्टस्य करोत्पादनेन विवदनेन च मदमपवर्ज्य प्रसृज्य चास्तिक्यमस्य प्रायश्चित्तमप्युपकल्प्य तमनुष्ठाप्य च प्रकटितपयोधियात्रानिषेधोऽयं सच्चित्सुखसद्गुरुः सोमनार्यतनुजः गिरियज्वनाम्ना विश्रुतः परिपूर्णबोधेन पदे स्वे नियम्य निवेशितः पीठमध्यमध्यवात्सीदेकत्रिंशतं शरद इति प्रतिपादितमखिलं पुण्यश्लोकमञ्जर्याम्—'श्रीचिक्काकुलसोमनार्यतनयः सोऽयं गिरीशः पुरा सन्न्यस्तः परिपूर्णबोधगुरुणा सच्चित्सुखः षण्मुखम् । ध्यायन्कालविदं सुदूरमुदधौ प्रोष्यार्यभट्टाभिधं प्रत्यावृत्तमधादथास्तिकमनुष्ठाप्योदितं निष्क्रयम् ॥ चित्सुखं विनिवेश्य स्वे पदे सच्चित्सुखः सिते । खरे खरांशौ वृषगे सप्तम्यां सिद्धिमाप सः ॥' इति ॥ इदं त्रयोविंशमाचार्यरत्नम् ॥ ५३ ॥

**समधिष्ठितकोङ्कणे चिरेण स्वगते साधुसमाधिनाऽऽदरेण ।**
**निरतो नियमेन चित्सुखेऽस्मि श्रितसच्चित्सुखलक्षणे परस्मिन् ॥९४॥**

अथ चतुर्विंशम्—समधीति । श्रितसच्चित्सुखलक्षणे आदृतसत्यज्ञानानन्दस्वरूपे परस्मिन् परे ब्रह्मणि आदरेण अनल्पेन यद्वा निर्भयेन विगलितशीतोष्णादिभयेन समाधिना निष्ठया साधु निर्विघ्नसाधनमिति यावत् । चिरेण बहोः कालात् स्वधृते आत्मत्वेनानुसंहिते सति समधिष्ठितकोङ्कणे प्रणिधानाभिनिवेशेन कोङ्कणान्विहाय पदात् पदमप्यचलित इति बोध्यम् । चित्सुखे तदाख्ये जगद्गुरौ अहं नियमेन ऐदंपर्येणेति यावत् । निरतोऽस्मीति योजना । तथा च पुण्यश्लोकः—सच्चित्सुखाच्छिव इति प्रथितोऽयमादावादाय शासनमवर्तत कोङ्कणेषु । आचार्य इत्यभिधया परमार्थरक्षामाधान्न तु क्वचिदगात्पदतः पदं सः ॥ अपराभवोऽपि च पराभवे सितोऽप्यनभस्यपीह सनभस्यथासिते । प्रशमी जगाम दशमी च सन्नसौ नवमीदिनेऽभिनवमीश्वराद्वयम् ॥ इति ॥ इदं चतुर्विंशमाचार्यरत्नम् ॥ ९४ ॥

**कृमिकीटपतङ्गसत्त्वभाषाक्रमविद्वान् स धुनोतु सत्त्वदोषान् ।**
**रससाधनसिद्धलिङ्गरूपः सच्चिदानन्दघनस्स सत्स्वरूपः ॥९५॥**

अथ निरस्ताशेषकृत्यमात्यन्तिकयोगिनमखिलसत्त्वभाषाविशेषज्ञं पञ्चविंशमाचार्यमुपपादयति—कृमीति । कृमयः वम्र्यादयः कीटाः घुणादयः पतङ्गाः टिट्टिभादयः । इदं मृगसरीसृपादीनामप्युपलक्षणम् । त एव सत्त्वाः जन्तवः प्राणिन इति यावत् । तेषां यो भाषाक्रमः वचनधोरणी तस्य विज्ञः विद्वान् विज्ञानित्यपि पाठान्तरम् । रसस्य परस्य ब्रह्मणः साधने अनुमाने यत्सिद्धं नियतं लिङ्गमविकारित्वादि रूप्यतेऽनेनेति रूपं लक्षणं यस्य स तथोक्तः । पक्षे रससाधनेन सकलकायकल्पानामुपलक्षणमिदम् । सिद्धं उद्भूतं लिङ्गमिव रूपं शरीरं यस्य सः । योगबलाल्लिङ्गाकृतिर्जात इत्यर्थः । चिदानन्दघनः ज्ञानानन्दमयः सदिति स्वरूपेण स्वं रूप्यतेऽनेनेति स्वरूपलक्षणेन सहितस्स सत्स्वरूपः सच्चिदानन्दलक्षण इति क्रोडीकृतार्थः । स



'रसो वै सः' इति श्रुतिप्रतिपादितरसाभिन्नो भूमा ब्रह्मेति यावत् । पक्षे सच्चिदानन्दघनश्चिदानन्दपदघटितः सत् सदिति पदं स्वरूपे नाम्नि यस्य सः सच्चिदानन्दघनेन्द्र इति यावत् । तस्य शब्दशक्त्या भासमानेन ब्रह्मणोऽभेदेन रञ्जनाद्रूपकालङ्कारध्वनिः । सत्त्वदोषान् मानसानवगुणानहङ्कारादीनिति यावत् । धुनोतु विदलयतु ममतादिनिर्मन्थनेन निर्मलं स्वरूपं निरूपयत्वित्यर्थः । 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वाम्' इति श्रुतेर्ब्रह्मणइवाचार्यस्याप्यायत्तमेवात्मयाथात्म्यज्ञानमपीति दिक् । तथा हि ग्रन्थभट्टीये सिद्धविजयमहाकाव्ये—'आप्तोऽपि विश्वगुरुतामचलोऽमलात्मा प्रत्यक्प्रभासमविकारमपेतसङ्गः । भूमेव यः स्फुरति लिङ्गवपुस्सस च्चिदानन्दसद्गुरुरपोहतु मे विमोहम् ॥ आबाल्यमद्भुतचरित्रनिधेरशेषयोगानुभावकलनोदितलिङ्गमूर्तेः । पारे प्रभासमधुनाऽप्यनुभूयमानं सिद्धस्य तस्य चरितं स्पृहयामि वक्तुम् ॥' इति । पुण्यश्लोकमञ्जर्यामपि—'श्रीमुग्धकृष्णतनयश्शिवसाम्बनामा यस्त्रिः प्रदक्षिणितपुण्यमहिर्महात्मा । श्रीचित्सुखेन्द्रयमिनः श्रितशिष्यभावः श्रीशारदामठविभुस्समभूत्स शान्तः ॥ यदीयवृत्तं निबबन्ध ग्रन्थो निबन्धने सिद्धजयाभिधाने । सविंशतिं सैकसमां स्वपीठे निषद्य नित्यत्वमवाप सद्यः ॥ अधिसप्ततिके चतुश्शिरस्के सचिदानन्दघनस्ससञ्छकाब्दे । प्रभवे प्रभवन् शुचिश्च शुच्योः प्रथमायां पृथुलिङ्गतामवापत् ॥' इति । इदं पञ्चविंशमाचार्यरत्नम् ॥ ९५ ॥

**यमिधीघनचिद्विलाससाधू समहादेवसमग्रबोधबोधौ ।**
**भवभूतिकृतार्चनौ च वन्दे सुखसद्ब्रह्मचिदुज्ज्वलौ घनेन्द्रौ ॥९६॥**

अथ वर्णनीयविशेषाभावादाचार्यसप्तकमेकग्रहणिकयैव परामृशति—यमीति । यमी निर्दोषसंयम इति यावत् । धीघनः प्रज्ञाघनेन्द्र इत्यर्थः । चिद्विलास इति साधुः तदभिधानश्शमधनश्च तौ । इमौ षड्विंशसप्तविंशावाचार्यौ । महादेवः महादेवेन्द्रसरस्वती समग्रबोधः पूर्णबोधेन्द्रः बोधः बोधेन्द्रसरस्वती च तैस्सह वर्तेते इति तथोक्तौ । साहित्यञ्च पाठानुपूर्व्यामेवेति ज्ञेयम् । इमे अष्टाविंशैकोनत्रिंशत्त्रिंशा आचार्याः । भ

भवभूतिना मालतीमाधवादिकविना कृतार्चनौ प्रबन्धद्वारा प्रस्तुतावित्यर्थः। सुखपदेन तदपरपर्याय आनन्दपदं लक्ष्यते। सुखेन सत् आनन्दपदसहिताविति भावः। ब्रह्मचित् एकवचनं समाहारात्। ब्रह्मपदचिच्छब्दौ ताभ्यामुज्ज्वलौ रुचिरौ नाम्नोरिति बोध्यम्। घनेन्द्रौ द्वन्द्वान्ते श्रूयमाणं प्रत्येकं सम्बध्यत इति न्यायात् ब्रह्मानन्दघनेन्द्रचिदानन्दघनेन्द्राभिधानाविति निर्गलितोऽर्थः। तौ च इमौ चैकत्रिंशद्द्वात्रिंशावाचार्यौ। वन्दे नमामीत्यर्थः। अनयोर्भवभूतिवर्णितत्वं यथा महापुरुषविलासे पञ्चमोल्लासे—'रट्टां कर्णाटराज्ञीं प्रसभमभिभवन् केरलीयांश्च कीशप्ररूपान् प्रख्यापयिष्यन्नचकुलदजहद्दीर्घकौपीनपुच्छान्। म्लेच्छान्मूर्धाभिमुण्डानपि विदधदथो विद्रवद्वीविवृत्त्यै श्रीकाञ्चीकामकोटीमठमसददसौ श्रीगुरोस्सेवनाप्त्यै॥ चोलानभ्येत्य लीलावलयितवसुधामध्यकाञ्च्यां सकाञ्च्यामास्ताचार्यान् सपर्याप्रमुदितहृदयानादधानस्ससम्राट्। तत्स्मृत्यै ज्येष्ठरुद्रालयमपि विदधे साधुसाहस्रमक्तं नाम्ना लक्षोत्तराणामपि तदशनदं वेश्म कश्मीरदेशे॥' इति॥ प्रदर्शिताश्चैते यथाक्रमं पुण्यश्लोकमञ्जर्यामपि—'प्रभाकरस्यात्मभवः पिनाकिनीतटीभवश्शोणगिरिर्जगद्गुरुः। स्वभानुवैशाखसिताष्टमीनिशि प्रज्ञाघनः प्राप परं पदं मुदा॥ अथ हस्तिशैलमधुसूदनात्मजो हरिकेशवश्च चितिसौख्यमेदुरः। अगमत्पदं स्वमखिलस्थिरागुरुः शरदस्सदुर्मखिन आदिमे दिने॥ भद्राचलाभिजनभानुसुतस्सशेषनार्योऽभिमण्ड्य पदमादिमदेशिकस्य। रौद्रिण्यनूर्जदशमि प्रशमीन्द्रगम्यं प्रापत्पदं प्रणिहितैः परमामृताख्यम्॥ श्रीपतेस्तनयः कृष्णः पूर्णबोधो दिने हरेः। ब्रह्मभूतोऽनभस्यच्छे संयमीश्वर ईश्वरे॥ कालहस्तिसुतबालयाभिधो बोधसद्गुरुरबोधवर्जितः। आप शाश्वतपदं विशुद्धमानन्दमाधवचतुर्थ्यहर्मुखे॥ आनन्तिज्येष्ठरुद्रो द्रविडिषु गरुडह्रादिनीसीम्नि जातो बोधेन्द्राचार्यशिष्यो भुवनगुरुधुरां पालयञ्छीलयुक्तः। कृत्स्नक्ष्मामण्डलीजिन्नृपवरललितादित्यनुत्यार्चिताङ्घ्रिः श्रीब्रह्मानन्दसान्द्रः प्रभवशुचिशचिद्वादशीयाह्नि लिल्ये॥ ६॥ अण्णुशङ्करनन्दनः पटुपद्मनाभसमाह्वयः लम्बिकापथतत्परो-



ऽप्यवलम्ब्य सद्गुरुशासनम्। कामकोटिपदे स्थितः श्रितकामकोटिफलप्रदे नित्यदत्तसहस्रभक्तमभूदिदं पदभागसौ॥ सकरुणमपबन्धुं कन्नडेशीकुमारं पुनरपि निजराज्ये स्थापयंस्ताद्विसेत्रा। अतिलघुतनुवृत्तिर्जीर्णपर्णात्तयोगी पद्ममनु चतुरोऽब्दानेव देवोऽध्यवात्सीत्॥ ७॥' इति॥ ९६॥

स्वमठस्थमधीतभूरिभाषं क्रमिकार्चाहितकामदृक्प्रतोषम्।
प्रचितस्वमठालयं च सच्चिद्रुचिरानन्दमुपास्महे परं च॥९७॥

अथ त्रयस्त्रिंशमाचार्यमाह—स्वमठेति। स्वमठस्थं शारदामठएव स्थितवन्तमन्यत्र न क्वापि कृतसञ्चारमिति यावत्। अधीताः ज्ञाताः भूरयो बहवः भाषा आन्ध्रकर्णाटमहाराष्ट्रादिवाचः येन तं क्रमिकया यथाविधिविहितयेति यावत्। अर्चया अर्चनेन आहितः कृतः कामदृशः कामाक्ष्याः कामकोटिनाम्न्याः स्वमठप्रतिष्ठापितायाश्शक्तेः प्रतोषः सन्तोषः येन तम्। एतेन महायतीशशङ्करेन्द्रमारभ्य सर्वेऽपि यथाशक्ति सञ्चारपराएवाभवन् अयमेव काञ्च्यां कामाक्षीमन्वहमर्चयन्नध्यास्त कामकोटिपीठमिति ध्वन्यते। इदमेव द्योतयति विशेषणान्तरमपि प्रचितेत्यादि। प्रचितः जीर्णोद्धृतः प्रवर्धिताभोगश्च स्वमठालयः श्रीकाञ्चीशारदामठायतनं येन तम्। सच्चिद्रुचिरानन्दघनेन्द्रं श्रीसच्चिदानन्दघनेन्द्रशङ्करार्यं अहं आश्रये शरणं व्रजामीति यावत्। पुण्यश्लोकमञ्जरीकाराश्चाहुः—'नानाभाषाभिलापी प्रशमकुलधनः प्रौढरामत्रसूनुस्त्रैलिङ्गस्तिम्मनाख्यो भुवनगुरुरभूच्चन्द्रभागाप्रतीरात्। काञ्च्यामेवाधिपीठं मठमपि विपुलं जीर्णमुद्धृत्य नित्यं कामाक्ष्यर्चैकनिष्ठस्सुखमवसदसौ सच्चिदानन्दसान्द्रः॥ खरे प्रोष्ठपदे पष्ठ्यामखरोऽधिमहालयम्। ससच्चिदानन्दघनो महालयमगाद्गुरुः॥' इति॥ इदञ्च त्रयस्त्रिंशमाचार्यरत्नम्॥ ९७॥

अपरानपि चन्द्रशेखरेन्द्रान् विपुलक्ष्माभ्रमणे निरस्ततन्द्रान्।
शरणागतसर्वदुःखहर्तॄन् शरणं यामि कृपार्द्रजनजेतॄन्॥९८॥

अथ चतुस्त्रिंशम्—अपरानिति। विपुलायां विशालायां आसेतुहिमवच्छैलमित्येवं क्ष्मायां भुवि भ्रमणे अटने यात्रायामिति यावत्। निरस्तत-

न्द्रानन्नलसान् व्यग्रानित्यर्थः । शरणागतानां प्रपन्नानां सर्वदुःखानामाध्यात्मिकाद्यखिलतापानां हर्तॄन् अपनेतॄन् । इदञ्च विशेषणमस्य दवानलदग्धकिशोरकपरित्राणाय प्रौढमनलमवगाढवताऽनेन दृढ मित्यभियुक्ताः । कुवादिनो वैतण्डिकस्य जैनस्य चंकुणाभिधानस्य काश्मीरिकप्रधानसौगतस्य जेतॄन् अभिभवितॄन् वादैरिति यावत् । अपरान् प्रागुक्तादन्यान् चन्द्रशेखरेन्द्रांस्तदभिधानाचार्यान् शरणं यामि प्रपद्ये ॥ प्रस्तुतश्चार्थः पुण्यश्लोकमञ्जर्यां यथा—'सूनुर्वेगवतीतटोद्भवमहादेवाह्वयस्य श्रुतः शम्भुर्नाम दवाग्निदग्धपृथुकत्राणाय गाढानलम् । आचार्यस्य निदेशतः क्षितितलं सर्वं चरन् पश्चनुर्वर्णान् स्वस्वपथा ... चार्यपीठस्थितः ॥ श्रीचन्द्रशेखरेन्द्रोऽष्टचत्वारिंशा स्वमठमष्टदान् । सौम्यस्सौम्येऽन्तरभात्सहेऽसितसहनस्पुरशोभो दर्शे ॥' इति ॥ इदं चतुस्त्रिंशमाचार्यरत्नम् ॥५८॥

भजरे बहुरूपचित्सुखेन्द्रं बहुशस्सह्यगुहातपस्स्वतन्द्रम् ।
प्रशमप्रणयात् प्रशान्तचारं परमानन्दयुजं च पापदूरम् ॥५९॥

अथ पञ्चत्रिंशषट्त्रिंशावेकयाऽऽह्निकयाऽऽह—भजेति । रे इति चित्तं प्रति अविचारितमहापुरुषकल्पमवृत्तितया तथाऽऽमन्त्रणम् । बहुशः अनेकशः सह्यगुहातपस्सु कावेरकन्दरानुष्ठितनियमेषु अतन्द्रं व्यग्रम् । प्रशमप्रणयात् उपशमप्रीत्या प्रशान्तचारम् अननुष्ठितदेशयात्रमिति भावः । बहुरूपचित्सुखेन्द्रं जनबाधानिरोधाय स्वीकृतानेकरूपतया तथा प्रजाभिः रूपातं चित्सुखेन्द्रनामानमाचार्यं किञ्च परं अनन्तरं तस्येति शेषः । प्रशमप्रणयात् प्रशान्तचारमित्यस्य देहलीदीपन्यायादुभयत्रान्वयः । पापदूरमपहतपाप्मानं आनन्दयुजञ्च चित्सुखानन्देन्द्रनामानञ्चेति वास्तवार्थः । भज सेवस्व । पुण्यश्लोकमञ्जर्यामपि—'वेदाचलान्तिकभवो विमलाक्षनाम्नस्सूनुस्सुशीलकमलाक्ष इति प्रसिद्धः । संयम्य चित्सुखतनुः श्रितकामकोटीपीठाधिपत्यविभवोऽप्यवसत्स सह्ये ॥ चित्सुखानन्दयोगीन्द्रं निवेश्य निजविष्टरे । सर्वात्मना तिरोऽधात्स धात्वापाढाच्छपञ्चहे ॥ ख्यातस्सुरेश इति सोमगिरेस्तनूजः क्षीरापगातटभवोऽभवदाश्रमीन्द्रः । श्रीचित्सुखेन्द्रच-



रणानुचरः प्रसारद्दूरोऽभ्युवास मठमे गुरोर्नियोगात् ॥ श्रीचित्सुखानन्दगुरुस्सचित्सुखमयं पदम् । आललम्बे ऽविलम्बिन्याश्विने सितपर्वणि ॥'' इति ॥ इमे च पञ्चत्रिंशषट्त्रिंशौ गुरुरत्ने ॥५९॥

प्रचिते परितस्तुरुष्कचक्रे निचिते म्लेच्छगवीविभूम्नि वक्रे ।
कथमप्यवता श्रितार्यवृत्तान्यथ विद्याघनमौनिनेमि तृप्तिम् ॥६०॥

अथ सप्तत्रिंशम्—प्रचितइति । अथ तुरुष्कचक्रे म्लेच्छमण्डले परितस्समन्ततः पुण्यभूमिमिति शेषः । प्रचिते प्रवृद्धप्रचारइति यावत् । वक्रे विलक्षणे म्लेच्छगवीविभूम्नि सिल्हकभाषाविलक्षणस्य भवे निचिते पुञ्जिते च सति सर्वतश्च म्लेच्छवाचैव व्यवहारे जायमाने इति यावत् आश्रितानामाचार्याणां वृत्तानि धर्मान् कथमपि आयासेन अवता रक्षता तदाचार्यतया स्वाधिकारइति व्यवस्थापयताऽऽराधितश्रीविद्याप्रसादप्रभावात् परित आचारान् आचारयतेत्यपि बोध्यम् । विद्याघनमौनिना तदाख्यसंयमिना तृप्तिं परितोषमेमि व्रजामि ॥ तावत्यपि सङ्कटे तथा ज्ञातवान् किलायमिति सन्तुष्यामीति भावः ॥ पुण्यश्लोकमञ्जरीकाराश्च प्राहुः—''बालचन्द्रसुतस्सूर्यनारायणसमाह्वयः । श्रीचिदानन्दशिष्योऽभूच्छ्रीविद्याघनदेशिकः ॥ प्रपञ्चः श्रीविद्यां कथमपि सविद्याघनगुरुस्तुरुष्काक्रान्तेऽपि व्यधित धुरमाचार्यसहजम् । इह विश्वद्दर्पान्प्रभवशरदः पुष्यबहुलद्वितीयायां प्रापत्परमुपरमं प्रौढनियमी ॥' इति ॥ इदञ्च सप्तत्रिंशमाचार्यरत्नम् ॥६०॥

निजतातमृतेः परं प्रकाशे जगगर्भे त्रिशरद्विपच्य कोशे ।
गमयन्नमिवोल्ववासशेषं गणये विश्वजितस्सुतं त्रिशेषात् ॥६१॥

अथाष्टत्रिंशमाद्याचार्योदध्यतिप्रकाशमाचार्यमभिनवशङ्करं प्रस्तौति निजेत्यादिना षड्भिः—निजेति । निजतातस्य स्वजनकस्य मृतेः परं मरणानन्तरं प्रकाशे प्रकटे परिस्फुटप्रसवइति यावत् । त्रिशरद्विपच्यः वर्षत्रयविपाकार्हः कोशः जरायु यस्मिंस्तस्मिन् गजगर्भे तत्संज्ञे भ्रूणविशेषे उल्ववासशेषं अनुभाव्यमकृतगर्भनिवासावशेषं गमयन्तं एकदैवातिवाहयन्तमिवेत्युत्प्रेक्षा । विश्वजितः तदाख्यस्य श्रीचिदम्बरपुरसोमपीथिनः सुतं

तनयं विशेषाधिकतरमन्येभ्यइति शेषः गणये मानयामि लोकोत्तरतर वृत्ततयेत्यर्थः ॥ प्रतिपादितमिदं श्रीवाक्पतिभट्टोद्भटविरचिते श्रीशङ्करेन्द्रविलासे द्वितीयसर्गे। 'गते दिवं गण्यतमे मखीशे तदेकपत्नी तरुणी विशिष्टा। कृतप्रयत्नाऽपि किलानुगन्तुं न्यषेधि रोधाद्गसो निकाय्यैः ॥ मृतः पतिस्ते ननु मानदायी गतस्स कां वा गतिमर्थ्यकर्मा। क्व वाऽस्य युक्त्याऽथ कृतार्थता ते कृतं तदान्ध्यादनुयानकान्त्या ॥ रजो न दृष्टं रमणीह कालात्कणीयसस्ते भवतीव गर्भः । सति स्ववंशांकुरसंशयेन्तः स्मरन्ति नेदं स्मृतयस्सतीनाम् ॥ इदं विदुर्वैशसमेव विज्ञामहच्च वा साहसमङ्गनानाम्। यदात्महत्यामपि नाकलय्य प्रयन्ति वह्निं पतिभिस्सहैताः ॥ विदुर्न किं पङ्क्तिरथस्त्रियस्तत्पृथाऽथवा किं विधवेत्यशब्दा। तदद्य वंशांकुरसंशये ते न साम्प्रतं नाथचितानुयानम् ॥ अथैष गर्भोनु गदोऽथवान्यः प्रतीक्ष्यतां तत्फलकर्म यावत् । पुरैव पत्युः प्रलयादनेन त्विशं वियोगस्य हि शिक्षितासि ॥ विलासवीथीविस्ततिर्हता ते चिराद्दरालम्यभृतोऽङ्गसादात्। विधिर्यदेव व्यपदिश्य चक्रे विनाविभूषं वपुरप्यदेव। स्थितेऽपि नाथे क मुदा त्वमस्त्राः कस्मयलिम्पस्सुरभि विलेपम् । रसेन किं वाऽरसयश्च वासोऽप्यसाध्ववस्था अनुभाव्यवस्थाम ॥ कदाऽभिधाः कृतुलिकां नु सान्द्रां तमालकं वा तनुफालदेशे। क्व वाऽथ गोष्ठीमकथास्सखीभिः कदा नु कान्तेन च नल्वरस्थाः ॥ मृदङ्ग लब्धां मितमश्नती त्वं तले भुवः क्वापि लुठस्यनिद्रा। विलोलवाला विधृतमपीला सदा ननूच्चकुप्यासि सोमपट्टकात् ॥ न वीटिकायामपि ते जिघृक्षा शिरोऽवगुण्ठ्यैव सदाऽपि शेषे । उदश्रुनिश्वाससमुपोढखेदं नयस्यहानीतइहास्ति नान्यत् ॥ तथाऽभिभुत्वात्ततपूर्वसौख्यस्मृतेः स्वमाश्वसयासि त्वमेव । परत्र भीत्याऽत्ययतोविभस्ते विधेयमप्यत्र विनीतिधर्मा ॥ अकङ्कणैवासि सकङ्कणाऽपि सितांशुकैर्वास्यसितांशुकाऽपि । अवालिकैवासि सवालिकाऽपि किमद्य नूनं भविता तवेतः ॥ अनारतस्वेदनिपेकजीर्णं मुहुर्मुहुर्मुच्यतएव सूत्रम् । वितन्तुशक्त्योऽप्यनपत्यभाजश्चिरान्निरूढः किल ते कृशाङ्गि । सुतेदमश्नासि सक्च किञ्चिद्दयाद्वृगस्येव हरिं परत्र । धियैव निश्याय धत्वं धिनोऽपि स्वयं स्वमेतत्सुकरं सदा ते ॥ अतोन वैनठ्यदशाव्रतात्ते विरूपता क्वापि न वा भवित्री । स्थितेऽद्य नाथे तव दारभक्तिस्तदाऽस्थितेऽपि प्रभवेत्समाना ॥ गदोनु गर्भोनु वितन्तुना नु त्रयं निपत्यास्तलिनाविलासाः । प्रशाम्यते कश्चन काम्यतेऽपि प्रताम्यते त्वाप्नुसुनिर्हरास्ते ॥ तदेहि गेहं वधु माविगाढाः शुचि शुचीभूय भजस्व बाढम । पतिं सुतं वा हृदये दधाना परां पुनर्निर्वृतिमप्स्यसे त्वम् ॥ इति प्रतिष्ठापितधीरभावा धवानुयानाद्विरराम रामा। गृहं परावृत्य परीत्य कृत्यं दिनानि निन्ये युगपद्विशिष्टा । सुचिन्तितं बन्धुतयाऽपि यत्नादापन्नसत्त्वेत्यनुकम्पितान्यैः । कथञ्चिदाद्वादशमानिनाय दिनानि सूनुप्रसवप्रतीक्षा ॥ अतीत्य मासान् सुतसूतिकाहानिव्देऽप्यतीतेऽप्रसवं समग्रे। महोदरोसौ महतोहि पापादिति स्त्रियोनेपदजीगणंस्ताम् ॥ जनेषु बाह्ये विमुखीभवत्सु जुगुप्समानेषु च बान्धवेषु। कृतोपचारा स्वतएव साध्वी क्रमांश्च गर्भस्य न सा व्यचैतीत् ॥ अंकालिप वैरूप्यमवच्छमाहिमत्वापि कोणे कुहचिन्निवासः । अजहत्यमागच्छत्यपि सर्वतोऽन्यैरदर्शि तज्ज्ञानिभिरप्युपेक्षा ॥ सा कथञ्चिदथ रुक्मप्रवेशं संप्रपद्य सुदृढाभिनिवेशम् । आलये परिचरन्त्युदकुम्भैराहृतैरधित वृत्तिमपापाम् । इत्यनेन विधिना विदधाना वृत्तिमन्यनिरपेक्षमनूनम् । अत्यवीवहत हायनयुग्मं भृत्यकृत्यकुशला किल साधम् ॥ अप्यसौ निजगदे गदएवेत्यास्त सा हृदि तु गर्भधियैव ॥ तत्त्रयेऽपि शरदां परिपूर्णे साध्वसूत सुतमेकतमेऽह्नि ॥ हायनेऽथ विभवे वृषमासे शुक्लपक्षदशमीदिनमध्ये । शेवधिद्विपदिशानलवर्षे तिष्यएनमुदसोष्ट विशिष्टा ॥" इत्यादिना । पुण्यश्लोकमञ्जर्यामपि—" जज्ञे विश्वजितश्चिदम्बरभुवः श्रीमान्विशिष्टोदरान्नाथस्यासुविनिर्गमात्परमसावब्दत्रयेवर्षद्वये। वैशाखे विभवे सिते च दशमीमध्ये त्रिवस्वानिव स्वावासायितकुञ्जपुञ्जिततमस्काण्डाभेटीखण्डनः ॥" इति ॥ ६१ ॥

परिवादभयात् प्रसूतिसृष्टां विपिने व्याघ्रवधूभिरेव पुष्टम् ।
नवशङ्करमादिमात्र भृष्टं न स माध्यन्दिनिनैव वाल्मशिष्टम् ॥ ६२ ॥

अथ तस्य जननीपरित्यक्तस्य व्याघ्रपादप्राप्त्योपनयनादि वर्णयति—**परिवादेति** । परिवादभयात् कौलीनभीत्या विपिने वने मस्त्वा जनन्या विसृष्टं विमुक्तम् ॥ उक्तमिदमपि तत्रैव शङ्करेन्द्रविलासे—'सन्निवेश्य तदमुं लतागृहे साध्वपैम्यथ भयादसूपमम् । रक्षतैनमगतिं वने स्थिताः देवताः शिशुरुपेक्ष्यते क वा ॥' इत्यादिना 'इत्थमार्तमनुकीर्त्य मानिनी सोत्ससर्ज सुतमात्तसाध्वसा । आमनस्यविषमांघ्रिचंक्रमाप्याससाद पदमभ्रसंसदः ॥' इत्यन्तेन तत्सर्गान्तं यावत् । एवमुत्तरत्राप्यस्य चरितजातमवलोक्यतामधीदंप्रबन्धमित्यत्र न बाहिष्ठं लिख्यते ॥ व्याघ्रवधूभिरेव माध्यंदिनिस्त्रीभिरेव पुष्टं स्तन्यदानादिना रक्षितमित्यर्थः । माध्यंदिनिनैव मध्यंदिनापत्येन व्याघ्रपादमुनिनैव बाल्ये शैशव एव पञ्चमाब्दात्प्रागेवेत्यर्थः । शिष्टम् उपनीयाध्यापिताखिलाम्नायरहस्यमिति यावत् । चोऽप्यर्थे आदिमाचार्याद्वैतसमयप्रवर्तकाद्भगवत्पादादपीत्यर्थः । धृष्टं वादशौण्डमिति यावत् । नवशङ्करं अभिनवशङ्करेन्द्राभिधमाचार्यमाणं नम नमस्कुर्विति मानसी चोदना । आहुरिदं पुण्यश्लोककाराश्च—'वैधव्यं विबुधालये निवसतिं वृत्तिञ्च भृत्याश्रयां बन्धूनाञ्च विमाननामनितरासङ्गां दशाञ्चात्मनः । कौलीनात् कुलदूषणादपि भयादालोच्य गत्यन्तराभावादध्यटवि स्तृते नवदले क्षिप्तो जनन्यैव यः ॥ यं व्याघ्रपादमहिला विरुवन्तमारादादाय गेहमुपनीय निवेद्य पत्ये । स्तन्यादिना समपुषद्वययोपनीय माध्यंदिनिश्च यमबूबुधदात्मविद्याः ॥ विद्याकर्म समाप्य सर्ववचसां सारार्थवित्संगमं साक्षादाप्य जगद्गुरोरथ पुरः स्वेच्छोदिताच्छङ्करात् । तत्पार्श्वस्थितपद्मभूकरयुगप्राभं दधत्पादुकां वीरां व्योमगतौ ससंयमधनस्तिल्वाटवीमावसत् ॥' इति ॥ ६२ ॥

**परमभ्रतनोर्गिरैव शम्भोर्वरविद्याघनविष्टरोपलम्भी ।**
**अधिकाञ्चिपुरीमठं शुभं भोः त्वयिकश्चित्त तनोतु ते विदम्भः ॥**

अथ तस्याचार्यानुशासनानुरूपमद्वैतपीठोपलब्धिमाह--**परमिति** । भोश्चित्त हे चेतः परमनन्तरं अभ्रतनोराकाशमूर्तेः शम्भोः श्रीचिदम्बरेश्वरस्य



गिरैव वाचैव अशरीरिण्येति शेषः । अधिकाञ्चिपुरीमठं श्रीशारदामठे वरो गुरुः विद्याघनविष्टरस्य तदभिन्नश्रीशङ्करार्यपीठस्य य उपलम्भः प्राप्तिः स यस्येति तथोक्तः । विदम्भः अव्याजशील इत्यर्थः । त्रिभ्यः श्रीशङ्करभगवत्पादमहायतिश्रीमदुज्ज्वलशङ्करमूकाभिशङ्करेभ्योऽपीत्यर्थः । अधिकः प्रभावेनेति भावः । सः अभिनवशङ्करः ते शुभं तनोत्विति योजना । अशरीरवाणीवृत्तान्तविलासश्च शङ्करेन्द्रविलासे—'किमिति भजथ भीतिं क्लेशभाजः प्रजावः प्रभवति गुरुपीठीं प्राप्तुमद्य त्रिलोक्याम् । निर्गमिषु सकिलैकशङ्करश्शङ्कराप्तः शुचिनराशिवगङ्गाकुञ्जनिष्टस्तपस्वी ॥ इव नुन ननुतैनं दृष्टमाचार्यपीठे स्तुत विवृणुत विश्वमूर्धन्यमद्वैतभाष्यम् । चरत हरत कामं कामचारान्नराणां स्मरत सरत धीरास्सर्वमात्मेत्यपूर्वम् ॥' इति । तथा च सद्गुरुसन्तानपरिमले—'तिल्वारण्यनिकुञ्जनिष्ठमपि यं सर्वज्ञपीठोचितं सर्वज्ञः त्वयमेव यं निरदिशच्छम्भुर्वियाद्विग्रहः । तस्यासीमविभूमधामजलधेराचार्यचूडामणेरंघ्रिद्वन्द्वमुपास्महे कमलभूनिष्पाद्यपादूज्ज्वलम् ॥' इत्यादि ।६३।

**विदिशश्च दिशश्च सञ्चरन् यः प्रदिशन् भाष्यमदूष्यमास्त धन्यः ।**
**तमशेषविदासनाधिरूढं नम भट्टोद्भटवाक्पतेः सनीडम् ॥ ६४॥**

अस्य समाप्यप्रवचनं सहजयं सर्वाशाशाटनमाह—**विदिश इति** । किञ्च धन्यः आप्तकामः यः दिशोविदिशश्च अष्टास्वपि हरित्स्विति भावः । सञ्चरन् यात्रां कुर्वन् अदूष्यं निर्दोषमद्वैतसम्बन्धीति यावत् । भाष्यं ब्रह्मसूत्रस्येति शेषः । प्रदिशन् दिशिरुच्चारणार्थः । प्रोच्चरन् प्रवचनविषयीकुर्वन्नित्यर्थः । आस्त आसीदिति यावत् । भट्टोद्भट इति वाक्पतिः तदाकारकाश्मीरिकविरुदवहः कविः । तस्य दुर्जयस्येति बोध्यम् । सनीडं अत्यन्तसंयोगे द्वितीया । समीपेऽपीत्यर्थः । अशेषविदासनाधिरूढं भट्टोद्भटादिविबुधयूथविजयपूर्वमधिकश्मीरमण्डलमनुष्ठितसर्वज्ञपीठाधिरोहणमित्यर्थः । तं पूर्वोक्तं नम नमस्कुर्विति चित्तं प्रति चोदना । विस्तृतमिदं सद्गुरुसन्तानपरिमले— 'क्षीरस्वामिमनोरथेशाचटकश्रीसन्निमच्छल्लकश्रीदामोदरयक्षयवापनमहोपाध्यायमुख्यान् कवीन् । अष्टावप्यभिभूय दुर्जयतया भट्टोद्भटः प्र-

स्त्वहं योऽदीनारकलक्षवेतनवहः कोऽस्याग्रतः सोऽप्यभूत् ॥ देवीदिव्यचतुष्क-
दन्तोद्भटनवभपटाबुद्बुद्बुद्धाध्वमध्वास्वादमोदस्तवेदादिति(?)थ स जयापीडसम्रा-
डपि द्राक् । यद्वागुद्भूतबोधः श्रुतिमयवपुषः शारदायाः पुरस्तात्पीठे स-
र्वज्ञयोग्ये निदधविपदच्छायमार्चीद्यमचर्यप् ॥' इत्यादिना । इदमेवाभिक-
श्मीरमस्याखिलवित्पीठाधिरोहणमादिमाचार्याणामिति प्रेमुर्विद्याशङ्करविनय
संक्षेपशङ्करविजयकारादयइति दिक् ॥ ६४ ॥

श्रुतियुक्तिशरैः परान् प्रणिघ्नन् इति चाद्वैतसृतिं विलुप्तविघ्नाम् ।
विदधन्प्रविशन् दरीं पुराणीं मदघं हन्तु तिरोहितस्स मौनी ६५॥

अथास्य सशरीरस्यैवान्तर्हितिमाह—श्रुतीति । इति एवं परान्
विमतान् श्रुतयः उपनिषदः युक्तयः तदनुकूलास्तर्कन्यायाः ताश्च ताश्च श्रु-
तियुक्तयः सुरासुरादित्वात्समासः । ता एव शराः विपाठाः तैः करणैरिति
यावत् । प्रणिघ्नन् संहरन्नभिभवन्निति भावः । किञ्च अद्वैतसृतिं औपनिष-
दमार्गं विलुप्तविघ्नां विगलितान्तरायां विनष्टविमतविरोधमभितः प्रचारामि-
त्यर्थः । विदधन् कुर्वाणः पुराणीं चिरन्तनीं दरीं गुहां दत्तात्रेयस्येति शे-
षः । प्रविशन् प्रवेशं नाटयन्नेवेत्यर्थः । तिरोहितः अन्तर्धिं गतः सः मौ-
नी यतिः मदघं मम पापं व्यपोहतु दिव्यज्ञानोदयाय दोषानुन्मूलयत्वि-
त्यर्थः । तथा चोक्तं शङ्करेन्द्रविलासे—"अथ सदधिकचिद्विलासभिक्षो
व्यथय न वर्त्म गुहाञ्च मास्म विक्षः । सहसहगमपेहि याह्युदुह्यास्सकल-
गुरुत्वमपोह वेदबाह्यान् ॥ अनुगिरमिति तां गिरं तदीयामधुराधिकर्णमनु-
भवा न यावत् । अचिररुगिव तावदक्षिताङ्गं क्षितिगुरुरन्तरधत्त तत्सनीड-
म् ॥" इत्यादिना ॥ सद्गुरुसन्तानपरिमलेऽपि —"अङ्गान्वङ्गान्कलिङ्गा-
न्मगधमधुपुरीगौडसौराष्ट्रसिन्धून् कश्मीरान्तान् विजित्य प्रथितजनपदान्
रूढसर्वज्ञपीठः । आकैलासं धिगासन्ननुचरनिकरान्पश्यतस्सम्प्रतार्य प्रा-
प्तोऽन्तर्धिं सदेहश्शमयतु दुरितं शङ्करः सार्वभौमः ॥" इति ॥ ६५ ॥

सशरीरमुपेयिवांसमोकः शशिचूडस्य जगद्गुरुं तमेकम् ।
अपि चीनतुरुष्कबाल्हिकाद्यैस्स्वपराचार्यतया स्तुतं स्तुमोऽद्य ६६



अथास्य सकलभूमण्डलगुरुत्वमुपवर्णयति—सशरीरमिति । सश-
रीरं सदेहमेवेति शेषः । शशिचूडस्य चन्द्रशेखरस्य ओकः स्थानं कैला-
समिति यावत् । उपेयिवांसमधिजग्मिवांसं चीनतुरुष्कबाल्हिकाद्यैरपि इति
सर्वप्राच्योदीच्यपाश्चात्यानामप्युपलक्षणम् । आदिशब्देनान्वपराश्च सम
भूमध्यरेखायास्सञ्चरमाणा रेणुप्तिकादयोऽपाच्या गृह्यन्ते । स्वेषां पराचा-
र्यतया परमाचार्यत्वेन स्तुतं तमेकं मुख्यं जगद्गुरुमस्मादन्यत्र जगद्गुरुश-
ब्दवाच्यत्वमपि भक्त्योपपादितमेवेति भावः । स्तुमः वन्दामहे ॥ तथा च
श्रीशङ्करेन्द्रविलासे— "सपुनरञ्चितकामतनुर्मुनिर्विपुलयन्विमनेष्वपि चा-
द्भुतम् । व्यहृत चीनभुवः परितोवरामवशनोवशनोऽवशवादिनाम् ॥
गिरिशरोदमकल्मषमश्नता परिवियद्विनिपादुकया यता । क नु न तेन
जिताविमताः श्रुतौ ववलिरे बलिरेचितबाहुमुखाः ॥ चतसृष्वपि दिक्षु
यथाक्रमं पतति तत्र यतौ पतिता अपि । वरुणवायुशिवाग्नीन्द्रगतास्थि-
ताः श्रदधुरादधुरस्य मतं श्रितम् ॥ इति परीत्य दिशोविदिशश्च यः
परिधरं परिभूतमतान्तरः । पुनरवाप्तपुरारिधराधरः सततुतेऽततुतेजासि
संस्थितिम् ॥ श्रितवतामधुनाऽपि परिक्षिति नविनयन् परमार्थमसंश-
यम् । रहसि योगवतां स्मयवत्सलं न सगतस्सगतागतविह्वलः ॥"
इत्यादिना प्रबन्धान्तं यावत् । पुण्यश्लोकमञ्जर्यामपि —"वेदान्तदेशिक-
चिदम्बरनाथवेधोवाक्यैर्जगद्गुरुरधिष्ठितकामपीठः । अष्टासु दिक्ष्वपि निरस्त-
समस्तविद्वद्वादावलेपविभवोऽप्यचरद्धरित्रीम् ॥ काश्मीरिकांश्च विजित्य गि-
रोद्भटादीन् सर्वज्ञपीठमधिरुह्य च शारदाग्रे । आऽऽत्रेयकन्दरमनुप्रविततोऽ-
पि शिष्यैरन्तर्हितस्सतनुरेव सशङ्करेन्द्रः ॥ द्वापञ्चाशतमित्यमद्भुतनयं वर्षा-
न् प्रवृत्य क्षितौ पुण्यायां परतोऽपि तस्य सुषमाश्चिल्यासमेव द्रुते । सि-
द्धार्थिन्ययनेऽप्युदञ्चिनि शुचौ दर्शेऽह्नि काञ्चि कलेर्विद्याशेवधिपावके गुरु-
रभूत्साच्चिद्विलासोमुनिः ॥" इत्यष्टत्रिंशमाचार्यरत्नम् ॥ ६६ ॥

अनुपप्लपूरं चिराय तिष्ठन् ध्वनिकारादिबुधाश्रितो प्रतिष्ठः ।
पुनराञ्चितकाञ्चिरस्तु पद्मे मम साञ्चिच्छ्रवरो विलासाभसुः ६७

अथानन्तरमाचार्यमुपस्तौति—अन्विति । चिराय चिरकालं अनुपद्मपुरं पद्मपुरमनु तिष्ठन् वसन्निति भावः । ध्वनिं तदाख्यं ग्रन्थं करोतीति ध्वनिकारः आनन्दवर्धनाचार्यस्स आदिर्येषां तैर्विबुधैर्विद्वद्भिः आश्रितः जगदाचार्यतयेति ज्ञेयम् । व्रतिष्ठः निर्वीयसंयमव्रत इति यावत् । पुनरिति वाक्यालङ्कारे । अञ्चिता संश्रिता काञ्ची सत्यव्रतक्षेत्रं येन सः काञ्चीगतमात्मीयमाचार्यमठमवाप्त इत्यर्थः । सच्चिच्छिखरः सच्चित्पदपूर्वः विलासभिक्षुः सच्चिद्विलासनामा निगमीति यावत् । मम पक्षे सपक्षकोटावन्तु अध्यक्षात्मविद्यानिगमपादध्वानुपकारानित्यर्थः । अस्य चेयं पुण्यश्लोकमञ्जरी—'कान्यकुब्जकमलेश्वरात्मजः श्रीधरेति श्रितवमश्च शङ्करात् । अध्युवास गुरुपीठमग्रजं बालवर्षधृतिशालि आश्रमी ॥ आनन्दवर्धनमुखैरभिरूपवर्यैराराधिताङ्घ्रिरथ पद्मपुरं चिराय । अध्युष्य काञ्चिपुरमन्त्य च नन्दनाब्दे सिद्धिं गतो निशि नृसिंहजयन्तिकायाः ॥' इति । इत्येकोनचत्वारिंशमाचार्यरत्नम् ॥६७॥

अतिरूपमपास्तवृत्तमान्यं यतितामाश्रितमङ्गजं प्रथान्यम् ।
समयोच्चयसारसावधृत्यै सुमहादेवगुरुं स्मरामि धृत्यै ॥६८॥

अथ चत्वारिंशम्—अतिरूपमिति । अतिरूपमत्यन्तसुन्दरं यतितामाश्रितं गृहीतसन्न्यासमङ्गजमपरमात्मभुवं यथा कृतसंयमिभूमिकं परं मन्मथमिव स्थितमित्यर्थः । अपास्तवृत्तैः पुण्यचरितैर्मान्यं सम्भावनीयं सुमहादेवगुरुं शोभनमहादेवाभिधानं जगद्गुरुं समयोच्चयानामाम्नायागमपुराणादिदृष्टानां मतसमूहानां यः सारः स्थिरांशभूतमद्वैतं नाम तस्मिन् सावधृत्यै सनिश्चयाय धृत्यै धारणाविशेषाय सुदृढाद्वैतबोधायेति यावत् । स्मरामि । मनसेति शेषः । अयं चास्य पुण्यश्लोकः—'कर्णाटकजन्मसुतः शिवराममट्टः सच्चिद्विलासयमिना सुहितः स्वपीठे । अध्यास्य तं रविसमो भवराय शुद्धषष्ठीमदोषविरतौ विरतः स्वधाम्नि ॥' इति ॥ इति चत्वारिंशमाचार्यरत्नम् ॥६८॥

कृतसट्टकसत्रिनाट्यबन्धव्रतयायावरराजशेखराढ्यम् ।
हृतवन्तमनन्तमन्त्रशक्तिं व्रतिगङ्गाधरमाश्रयेऽर्घ्यसूक्तिम् ॥६९॥



अथैकचत्वारिंशम्—कृतेति । कृतं सट्टकं कर्पूरमञ्जरीनामापरूपकं येन सः कृतसट्टकः त्रिनाट्यबन्धे बालरामायणप्रचण्डपाण्डवविद्धसालभञ्जिकाख्यरूपकत्रयविरचने योव्रतः नियमस्तेन सहितास्त्रिनाट्यबन्धव्रतः सचयः यायावरराजशेखरः तदाख्यः कविः तस्मादाढ्यमपाटवमक्ष्णोरागन्तुकत्वादिति ज्ञेयम् । हृतवन्तमपनीतवन्तं अनन्तमन्त्रशक्तिमप्रमेयमन्त्रप्रभावं अर्घ्यसूक्तिममोघवाचं निग्रहानुग्रहयोरित्यूह्यम् । व्रतिनं प्रशस्तव्रतत्वात्तथा विबुधैर्गीतं गङ्गाधरं तदभिधमाचार्यमाश्रये श्रयामि ॥ स्वयंप्रकाशेन्द्रश्रीचरणास्तु सुषमाविमर्शिन्यां पद्यस्यास्य पूर्वार्धतया पद्यषष्टितमपद्यस्य पूर्वार्धं 'सशरीरमुपेयिवांसमोक्षः शशिचूडस्य जगद्गुरुं तमेकम् ।' इतीदं निवेश्य व्याख्यन् । उत्तरार्धेऽपि 'अनन्तमन्त्रशक्तिमनन्ताख्यकेरलीयाभिचारिकमन्त्रैर्भयं हृतवन्तमवलोपितवन्तमात्ममन्त्रशक्त्या' इत्यादिचोपन्यास्यन् । अस्य च पूर्वार्धं 'कृतसट्टकयुक्त्रिनाट्यबन्धव्रतयायावरराजशेखराढ्यम् ।' इति यत्किञ्चित्पदव्यत्ययमात्रेण तस्य स्थाने निवेशयाञ्चिजगद्गुराचार्यशङ्करेन्द्रस्यैव राजशेखरवीक्षोत्पादनमप्यपादानम् । अस्माभिस्तु भूयसां पाठानामनुरोधेन यथाश्रुतं व्याख्यातमिति विदांकुर्वन्तु विदितवेदितव्या विद्वांस एवेत्यलमतिकृतहस्तप्रतिहस्तितया । अयञ्च व्रतिगङ्गाधरः शरदां पञ्चत्रिंशतमध्यास्त परमाचार्यपीठीमिति पुण्यश्लोकमञ्जरीकाराः तद्यथाहुः—'अप्पन्नाख्यगुणेशभट्टतनयो भीमातटीसम्भवः श्रीविद्यानिरतः श्रियो गुरुपदं श्रीकामकोटीमठे । पञ्चत्रिंशतमध्युवास शरदः श्रीशारदापीठिकां सौम्यस्याश्वयुजशुद्धप्रतिपदि प्रयाय गङ्गाधरः ॥' इति ॥ इत्येकचत्वारिंशमाचार्यरत्नम् ॥६९॥

शिवयोजितचन्द्रमौलिपूजाप्रवणं तत्त्रिगमिन्द्रयं महौजः ।
परवस्तुविदस्तलम्भचारादरमास्तां परमस्य मे विचारे ॥७०॥

अथ गुरुत्रयमविशेषत्वतएकोक्त्यैव विमृशति—शिवेति । परमनन्तरं शिवेन शम्भुना योजितस्य प्रापितस्य श्रीशङ्करभगवत्पादकरकमलमित्यध्याहृत्य परिष्करणीयोऽर्थः । चन्द्रमौलेस्तदाख्यस्य श्रीयोगलिङ्गस्य

इदं कामपीठनिलयायाः कामकोटेरप्युपलक्षणम् । पूजायामर्चायां प्रवणमुन्मुखं महौजः प्रशान्तब्रह्मवर्चसं परवस्तुवित् ब्रह्मज्ञमतएव अस्तसमस्ताचारादरमपगतयात्राभिनिवेशं तत् नियमितत्वं ब्रह्मानन्दघनानन्दघनपूर्णबोधेन्द्रनामानः क्रमात् त्रयोगुरुमणयइति यावत् । नियमितत्वमित्यत्र पाक्षिकान्वयबोधस्त्वरुणाधिकरणन्यायादित्यवगन्तव्यम् । अथेदानीं मे मम विचारे ज्ञानवर्त्मनीत्यर्थः । आस्तां वर्तताम् । एषाञ्च पीठवासकालादि प्रतिपादितम् पुण्यश्लोकमञ्जर्याम् यथा——'सुब्रह्मण्यभवो नियम्य नरसंभृतोऽथ गङ्गाधराद्ब्रह्मानन्दघनाभिधोऽधित धुरां द्व्यूनास्समास्त्रिंशतम् । लिप्त्येऽथेश्वरमीश्वरोऽव्ययहुलाष्टम्यामसौ सङ्गवे पुष्यत्येव हि. सूत्रभाष्यविपश्चानन्तेवसद्वयः पट्टं ॥ श्रीतुङ्गभद्रातटभूसुरदेवभट्टात्मजः शङ्करपण्डिताख्यः। अभूद्घनानन्दघनश्चलाब्दैः प्रमादिचैत्राच्छनवम्यहेऽगात् ॥ कर्णाटो हरिपण्डितः शिवसुतः श्रीपूर्णबोधाख्यया बिभ्राणोऽनुपदं जगद्गुरुपदं वर्षांश्च षड्विंशतिं । धाम्नि स्वे परमे जगाम विलयं वर्षे प्रमाथ्याह्वये कृष्णप्रौष्ठपद्त्रयोदशतिथौ ब्राह्मे क्षणे ब्रह्मवित् ॥' इति ॥ इति द्वित्रिचतुश्चत्वारिंशान्याचार्यरत्नानि ॥ ७० ॥

**कविसोमकदेवसेवनत्यक् भविदूरोऽद्रिगुहागृहेऽहिकृत्यः ।**
**चिरमात्मनि सञ्चरन् प्रमत्तः परमाद्यस्सशिवश्शिवं विधत्ताम् ॥७१॥**

अथ पञ्चचत्वारिंशमाह——कवीति । कविना कथासरित्सागराख्यकथानककर्त्रा सोमकेन सोमकदेवभट्टेन क्लृप्तस्य सनियममुपचरितस्य सेवनस्य शुश्रूषणस्य त्यजतीति त्यक् परित्यज्य परजनोपनिपीडभयात् पलायित इत्यर्थः । भविनां संसारिणां तदेकमुग्धानामिति यावत् । दूरः दुरुपसर्प इत्यर्थः । अद्रिगुहागृहे क्षितिधरविपुलकन्दराविवरे अहिकृत्यः अजगरवृत्त्या स्थितइति यावत् । आत्मनि सत्यज्ञानानन्दलक्षणे ब्रह्मणि चिरं सञ्चरन् दीर्घकालं निष्ठां बिभ्रदित्यर्थः । प्रमत्तो नित्यतृप्तः परमाद्यः परमपूर्वपदाद्दिशवः परमशिवाख्यइति ध्येयम् । स आचार्यमणिः शिवं नित्यमङ्गलरूपं मोक्षं विधत्तामुत्पादयतु श्रितस्येति शेषः । अस्य चायं पुण्य



श्लोकः——श्रीकण्ठादिशिवमाश्रयपण्डितसुतः सैकां समाविंशतिं बिभ्रन् स्वस्य पदे निवेश्य सुकृतिं सुर्वात्मनं सोमकम् । शार्वर्यश्विनशुक्लभानितिथि गतसिद्धिः सपक्षे मिते सन्न्यासात्प्रभृति क्षितिध्रविवरस्थायी परादिश्शिवः ॥' इति ॥ अनेनायमद्रिगुहास्थएवाचार्यकमन्तेवसता सोमकेनैव संश्रितं बोधेन्द्रनाम्ना चकारेति विशदमवगन्तव्यम् ॥ इति पञ्चचत्वारिंशमाचार्यरत्नम् ॥ ७१ ॥

**नवभोजमहीपदत्तमुक्ताशिबिकाभ्रान्तसमस्तदक्षिणाध्वा ।**
**कलशेश्वरमन्त्रिणास्तबाधं कलयन् स्वं मठमीड्यतां सबोधः ॥७२॥**

अथ षट्चत्वारिंशम——नवेति । नवभोजमहीपेन प्रतिष्ठेन कविकुलाभिमानिना श्रीधाराभोजभूभृता दत्ता अर्पिता आचार्यभक्त्या अतुलसाहित्यप्रीत्या चेति बोध्यम् । या मुक्तामयी शिबिकाऽऽन्दोलिका तया भ्रान्तः अटितः समस्तः कृत्स्नः दक्षिणाध्वा दक्षिणापथः येन सः तथोक्तः कलशेश्वरस्य काश्मीरिकश्रीकलशमहाराजस्य मन्त्रिणा सचिवेन सहायभूतेनेति यावत् । स्वं मठं श्रीकाञ्चीशारदामठमस्तबाधमपगतम्लेच्छाद्युपद्रवं कलयन् कुर्वन् स्थितइति शेषः । सबोधः तदाख्यो जगद्गुरुरीड्यतां स्तुतिविषयीक्रियतां त्वयेति शेषः । चित्तं मत्येवेयं चोदनेत्यूह्यम् । इमौ चास्य पुण्यश्लोकौ——'श्रीभोजेन्द्रकृतस्ससोमो गुरुपरमशिवेन्द्रार्यवाचाऽधिपीठं तिष्ठन् प्राप्यान्यदेशान् पथि पथि विनतान् प्रापयन्नद्भुतास्थाम् । श्रीधाराभोजदत्तप्रचुरमणिमयान्दोलिकातल्पगात्रः कश्मीराधीश्वरत्युत्कटकसमवनोऽधान्मठं म्लेच्छदूरम् ॥ शरदस्त्रिंशतं समाप्य गुरोः सद्गुरोः पदम् । जगाम धाम परममीश्वराषाढपर्वणि ॥'' इति ॥ इति षट्चत्वारिंशमाचार्यरत्नम् ॥७२॥

**जयदेवसुराङ्ककृष्णमिश्राश्रयनामित्य कृपामपादिदक्षम् ।**
**अपि हैमपप्राकृतोक्तियोगिरूपसेव्योऽस्तु स चन्द्रचूडयोगी ॥७३॥**

अथ सप्तचत्वारिंशम——जयेति । यः जयदेवः पीयूषवर्षापराभिधेयश्चन्द्रालोकप्रसन्नराघवादिकृत् सुमङ्खः श्रीकण्ठचरितकर्तृकृत मङ्खक इति प्रसिद्धः कृष्णमिश्रः प्रबोधचन्द्रोदयादिमहाप्रबन्धकारः सच

सच सच ते तेषामाश्रयतां सेव्यतां भाष्यप्रवचनगुरुत्वादिति भावः । ए-
त्य भाष्य कुमारपालेन तदाख्यजैनभूपालेन मिश्रं सङ्गतं हेममपि जिनमत-
धुर्वहं हेमाचार्यमपि उक्तियोगैर्वाग्योयुक्तिभिरपाकृत पराभूतवानिति याव-
त् । सः चन्द्रचूडयोगी तदभिधो नैष्ठिकश्चन्द्रशेखरेन्द्रः उपसेव्यः उपस्था-
नीयः अस्तु अस्माकमिति शेषः । आहरं भक्तिकल्पलतिकायां जयदेवः
यथा—'श्रीचन्द्रचूडचरणाम्बुजकाञ्चिपीठान् सर्वज्ञशेखरमणीन् सततं श्र-
यामः । यद्वाग्मनर्गलगलत्सरसोक्तिवर्षैराचार्यहेमदववह्निरपि व्यरंसीत् ॥'
इति प्रस्तुतश्च तद्गुरुविजये कृष्णमिश्रैः यथा—"प्रांशुप्रालेयपृथ्वीधरवि-
कटतटपांशुमत्स्रःस्वगङ्गापूरावष्टम्भमुष्टिंधयपटुभणिताचान्तहेमार्ककान्तीन् ।
आचार्यश्चन्द्रचूडानवनिपतिरयास्मकजैनाभिमानोन्नामं नाम ने नामायजदजि-
तमहाप्रभुसिम्धुगुप्तिगुप्तेः ॥" इति ॥ अमुमुच्चः मुमेवाचार्यमपि च कृष्णभ-
क्त्या प्रबोधचन्द्रोदयप्रारम्भेऽपि तद्यथा—अन्तर्नाडीनियमितमरुल्लङ्घितब्र-
ह्मरन्ध्रं स्वान्ते शान्तिप्रणयिनि समुन्मीलदानन्दसान्द्रम् । प्रत्यग्ज्योतिर्जि-
यति यमिनः स्पष्टललाटनेत्रव्याजव्यक्तीकृतमिव जगद्व्यापि चन्द्रार्धमौलेः ॥"
इति ॥ "द्वात्रिंशत्कविरत्नमध्यतरलश्रीमल्लराजानकश्लोकव्यक्तिहवाश्च-
नगुणोद्दामप्रभाभास्वरम् । कश्मीरेन्द्रसभावराङ्गहृदयं गोशीर्षचर्चारसैश्चक्रे य-
श्शिशिरं चकास्तु सततं श्रीचन्द्रचूडो हृदि ॥" इति श्रीकाश्मीरिकमहा-
वैद्यमृहलकौ वैद्याभिधानचिन्तामणौ दृश्यमानत्वादस्य श्रीजयसिंहसेव्य-
ताऽप्यासीदित्यवगम्यते । इमे चास्य पुण्यश्लोकाः—"श्रीकण्ठः शुकदेवश-
र्मतनयः कुण्डीनदीकूलभूर्योगी वाल्लभतरसारसुकृतधृष्टोबटुद्राविडः ।
बोधेन्द्रार्पितगृहीतनियमः श्रीचन्द्रचूडाभिधा निवसन् काञ्चिमठे ब-
भार सधुरामाचार्यतां भूतले ॥ गङ्गश्रीजगदेवकृष्णमृहलप्रष्ठैर्महिष्ठैर्नुतो वि-
द्वद्भिः पारतः स्मिनिं विरचयन् यात्रां विमेनां व्रती । विद्यालोलकुमारपाल-
नृपतेर्मन्दस्मितं हेमाचार्यमपि तपाकृत गिरा वागष्टकस्याकृतम् ।
ध्यानस्तारकमार्गेहारकमसौ श्रीचन्द्रचूडाश्रमी ज्वालाभावविकारदाहनलिपि-
मिः (४२६७) काले कलौ कालितं । आस्थायासनमष्टपाष्टिदरदः श्रीपा-



र्थिवे पार्थिवं चैत्रे नित्रमपार्वं पर्वणि जहद्देहं विदेहोऽभवत् ॥" इति ॥ इ-
ति सप्तचत्वारिंशमाचार्यरत्नम् ॥७२॥

अभिचारकगुप्तपादवादिप्रभृत्पादिपराभवतत्पभूमिम् ।
कलये हृदि संश्रितं स्वभासा विलयं विद्वयतीह चिद्विलासम् ॥

अथाष्टचत्वारिंशमद्वैतभाष्यसर्वस्वप्रकटनपटुब्रह्मविद्याभरणविवरणाद्यनेक-
प्रबन्धकरणचणमाचार्यमद्वैतानन्दबोधेन्द्रमभिष्टौति—अभीति । इह आ-
भिचारकः अभिचारक्रियाचतुर इति यावत् । यः गुप्तपादः अभिनवगु-
प्तपादाभिध आगमिकः वादिप्रभुः खण्डनखण्डखाद्यखण्डिताखिलमण्डनम-
ण्डलीकतथा तथोक्तः हर्षः नैषधकृत् ब्राह्मणः श्रीहर्ष इत्यर्थः । तौ आ-
दी येषां तेषां पराभवस्थापनस्याग्रभूमिं इदंप्रथमतयोत्पत्तिस्थलमित्यर्थः ।
विद्वयति चिदम्बरे स्वभासा निजतेजसा विलयमेवं चिदाकाशैक्यमुद्भ-
भूयमिति वाऽर्थः । संश्रितं प्राप्तं चिद्विलासं चिद्विलासापरपर्यायानद्वैता-
नन्दबोधेन्द्रश्रीचरणान् हृदि मनसि कलये ध्यायामि । प्रस्तुतश्चायं स्थै-
र्यविचारप्रकरणे खण्डनकृता कान्यकुब्जश्रीहीरिणा श्रीहर्षेण—'तन्त्रैर्दु-
र्मन्त्रमन्त्रैरपि भुवनजनताऽगाधबोधापमृत्योः कृत्योद्यत्क्रूरधारापरुषतरमतेर्गु-
प्तनाम्नश्शरारोः । चेष्टाविश्रम्भकानां प्रतिविबुधसभं त्वत्प्रसादानुबन्धजानामा-
जानज्ञानभाजां विभवमभिदधे चिद्विलासाख्यभूम्नाम् ॥' इति ॥ तेनैव शि-
वशक्तिसिद्धावपि यथा—'क्षोणीस्त्रीमणिरत्नकाञ्चिनिकटेत्काञ्चीपदोद्द्र-
सश्रीकामासनवासवासितमहासत्त्वोऽस्त्यसत्त्वच्छदः । प्रस्फूर्जच्चिद्विला-
सवदुपासेमायचूडाल्वारैक्योक्तिविहभारतीं पदयतां मे चिद्विलासोऽनना-
क् ॥' इति ॥ अमुमुद्दिश्यात्मन आचार्यपरिनिष्ठिततामनितुर्यपरिच्छेदा-
न्ते खण्डनखण्डखाद्येऽपि यथा 'ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्र-
यत्नान्मया प्राज्ञंमन्यमनाहठेन पठिती माऽस्मिन् खलः खेलतु । श्रद्धाऽऽ-
राद्धगुरुः श्लथीकृतदृढग्रन्थिः समासादयत्वेतत्तर्करसोर्मिमज्जनसुखेष्वासञ्जनं
सज्जनः ॥ ताम्बूलद्वयमासनञ्च लभते यः कान्यकुब्जेश्वरात् यस्साक्षात्कु-
रुते समाधिषु परब्रह्मप्रमोदार्णवम् । यत्काव्यं मधुवर्षि धर्षितपरास्तर्केषु

परोक्तम: श्रीश्रीहर्षकवेः कृतिः कृतिमुदे तस्याभ्युदीयादियम् ॥' इति । अदर्शयच्चैवमेव शाङ्करमङ्गलया स्वाचार्यपूजालिङ्गमभिधाग्रहणिकया योगेश्वरविनिवेशीचरित्रविश्रान्तवाक्यमङ्गलवता वस्तुनिर्देशस्य । तद्यथा — 'लिङ्गार्चैः परं पवित्रमतुलमतत्कीर्तिपूर्णाद्भुतं यत्र स्नान्ति जनानि सन्ति कवयः के वा न वाचंयमाः । यद्धन्तुर्श्रियमिन्दुरक्षति जलस्फाटिकं इवेतरा यस्यासौ जलदेवता स्फटिकभूर्जागर्ति योगेश्वरः ॥' इति । किञ्चार्णववेगेनन्दलहसाङ्कस्वचरितादिष्वपि तत्र तत्र तेन सूचितमिदमित्यलम् । अस्य चेमौ पुण्यश्लोकौ—'वेदशास्त्र पिनाकिनीतटभुवम्भूनुम्स सीतापतिस्स्वात्मा संवत्सरशायुराश्रमपदं श्रीचन्द्रचूडान्मुनेः । खण्डं खण्डखण्डखण्डनकृदाचार्योदण्डचण्डवागाचार्यांस्त्विरहितस्य जलनिधि विश्वस्तविश्वम्भराम् ॥ वाग्दर्भौविंशदस्य विश्वमभितोऽद्वैतं विदां सम्मतं सिद्धार्थिन्यपि हायने शुचिरशुक्लहि श्रितश्च समाप् । अचैनेव च मुक्तिलिङ्गमदधादन्तः समन्ताच्छिवोऽभवासीदत्वपि निद्धलासनिष्ठी विद्योऽस्मि साक्षादसौ ॥' इति इदमष्टाचत्वारिंशमाचार्यरत्नम् ॥७४॥

बहुशः कृतकोटिहोमलीलावभूर्यो शाकपथाववामशीलौ ।
क्रमशः प्रणतोऽस्मि पावनाख्यौ सुमहादेवसुचन्द्रशेखराख्यौ॥७५

अथोत्तरमाचार्ययुगमेकोक्त्यैव परामृशति—बहुधेति । बहुधा अनेकप्रकारं कृतः आरचितः कोटिहोमः तत्सङ्ख्याकदुर्गाहोमः तस्य लीलैव न तु श्रमेणेत्यर्थः । अवभृथेऽवसानस्नानं याभ्यां तौ तथोक्तौ अवामशीलावपृष्टवामाचारौ शाक्तपथौ शक्त्युपासनामार्गाश्रयौ यथाऽऽचार्यमानुक्रमच्यम साधनुष्ठानेवुपासनौ पावने पवित्रे श्रवणादेव सर्वाघहारिण्यावाख्ये अभिधाने ययोस्तौ सुमहादेवसुचन्द्रशेखराख्यौ श्रीमहादेवेन्द्रचन्द्रशेखरेन्द्रनामानौ जगद्गुरू इति शेषः । क्रमशः क्रमेण यथानुपूर्व्यमित्यर्थः । प्रणतोऽस्मि नमामीति भावः । प्रतीति योज्यम् ॥ इमौ चानयोः पुण्यश्लोकौ—"छायावनाच्युतसुतौ गुरुमूर्तिनामा स्थित्वा जगद्गुरुपदे श्रीवर्षकालम् । प्राप्तोऽपराभवमदं सपराभवोर्जकाल्याष्टमीनिशि पदं परमात्मसं-



ज्ञम् ॥ अरुणगिरितनुपूरायगङ्गेशनामा गुरुवरपदमञ्चन् किञ्च पञ्चाशदब्दान् । श्रमजदथ ससिद्धि दुर्मुखिज्येष्ठषष्ठीनिशि निशितशिवार्चीनिष्ठितश्चन्द्रचूडः" ॥ इति ॥ इत्येकोनपञ्चाशपञ्चाशौ गुरुरत्ने ॥ ७६ ॥

हृदि सायणमाधवोपदेष्टॄन् मदिनां वादविधौ शमप्रदेष्टॄन् ।
नमत श्रुतिशीलनादतन्द्रान् यमिविद्याधिकतीर्थदेशिकेन्द्रान्॥७७॥

अथैकपञ्चाशमाचार्यरत्नमाहतविद्यानाथापरपर्यायमभिध्यायति—हृदीति । सायणमाधवयोः वेदभाष्यकर्तृपरिष्कर्तृत्वेन प्रसिद्धयोः उपदेष्टॄन् उपदेशकर्तॄनध्यात्मविद्यायामिति शेषम् । एतेनास्मादेव सायणमाधवयोस्सूत्रभाष्यशान्तिरभिहितेति ध्येयम् । यतस्तत्र तत्र स्वप्रबन्धेष्वयमेवाचार्यतया माधवेन वर्णितः । तद्यथा जैमिनीयाधिकरणन्यायमालायाम्—"प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् । जैमिनीयन्यायमाला श्लोकैस्संगृह्यते स्फुटम् ॥" इति । आद्यन्तयोरष्टकानामृग्भाष्ये सायणेन च 'यस्य निश्वसितं वेदा वेदेभ्यो योऽखिलं जगत् । निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ वेदार्थस्य प्रकाशेन तमोहार्दं निवर्तयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥' इति 'सवन्याद्भारतीतीर्थयतीन्द्रचतुराननात् । कृपामव्याहतां लब्ध्वा परार्ध्यप्रतिभोऽभवत् ॥' इत्यादिनास्य भारतीतीर्थप्रशंसा तु विद्यातीर्थशिष्यतया भारतीतीर्थस्यात्मनश्च विद्यान्तरेषु गुरुतया चोपपद्यते । दर्शितञ्च विद्यातीर्थशिष्यत्वमात्मनो भारतीतीर्थेनैव व्यासाधिकरणमालादौ तद्यथा—"प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् । वैयासिकन्यायमाला श्लोकैस्संगृह्यते स्फुटम् ॥' इति ॥ यदुच्यते विद्याशङ्करविजयकारादिभिर्वैद्याशङ्करिकैर्विद्याशङ्कर एव विद्यातीर्थशब्दवाच्य इति तत्साहसमात्रम् । विद्यातीर्थपदेनैव सर्वतस्सायणमाधवेन व्यवहृतत्वात् वेदभाष्यपरिष्कर्तुरनर्गलवाग्विलासस्य च तस्य वाग्व्यारिद्र्यकल्पनाऽनौचित्याच्च । अपि चास्य विद्यानाथस्यैव सर्वज्ञविष्णुरिति पूर्वाश्रमीयं नाम पिता च श्रीशार्ङ्गपाणिरित्यस्यैव । यथाऽऽहुः पुण्यश्लोकमञ्जरीकारा अपि— 'बिल्वारण्यजशार्ङ्गपाणितनयस्सर्वज्ञविष्णुश्श्रयन् सन्न्यासं गुरुचन्द्रशे-

खरमुनेरास्थाय पीठीं गुरोः । योगेशस्य च चक्रराजवसतेर्देव्याश्च सकोऽर्चने श्रीमन्माधवबुक्कभारतियतिप्रष्ठैर्महिष्ठैर्वृतः ॥' इति । गृहीतश्च सर्वदर्शनसङ्ग्रहे तेनैव पूर्वाश्रमनाम्ना श्रीविद्यातीर्थेन्द्रः तद्यथा — 'पारङ्गतं सकलदर्शनसागराणामात्मोचितार्थचरितार्थितसर्वलोकम् । श्रीशार्ङ्गपाणितनयं निखिलागमज्ञं सर्वज्ञविष्णुगुरुमन्वहमाश्रयेऽहम् ॥' इति । किञ्च गङ्गेशापरपर्यायश्रीचन्द्रचूडान्तेवसत्त्वस्य चास्मिन्नेव विद्यातीर्थे सङ्गतत्वाच्च । यच्चोक्तं काव्यमाधवव्याख्यात्रा श्रीमाधुरसुदर्शनेन यथा—'व्यामूढानामिह तनुभृतां आह्नीतीर्थमेकं विद्यातीर्थं नक्तिविमलं सद्विवेकोदयानाम् । सर्वेषां तु प्रथमसुतरं भारतीतीर्थमाहुस्तद्भावान्मे विमलमनसो निर्णये शक्तिरस्ति॥' इति । तद्व्याख्यायां च 'तीर्थपदावसानानि च गुरुतरगुरुतमनामानि च स्मृतानी'ति कण्ठोक्त्या प्रदर्श्य तीर्थपदस्य सम्प्रदायविशेषवाचकत्वाशङ्काऽपि निरस्ता। ग्रन्थान्तरेष्वपि विद्येशविद्यानाथविद्यातीर्थसर्वज्ञविष्णुविद्याशङ्करादिपदानि प्रवृत्तिनिमित्तैक्यमस्मिन्नेवाऽनुवदन्तीत्यलमतिमहतोपन्यासेन। प्रभाविमर्शनीकारास्तु 'सायणइति तद्वंशनाम तदुक्तं तेनैव माधवेन स्वकृतौ सर्वदर्शनसङ्ग्रहे यथा—"श्रीमत्सायणदुग्धाब्धिकौस्तुभेन विपश्चिता । क्रियते माधवार्येण सर्वदर्शनसङ्ग्रहः ॥" इति । सायणमाधवस्य सायणकुलोद्भूतमाधवाभिधानस्य' इति व्याचख्युः । अत्र तु सायणस्तत्सहोदरइत्याशयेन द्वन्द्वो निदर्शितः । तच्चोक्तं पराशरमाधवीये—"श्रीमती जननी यस्य सुकीर्तिर्मायणः पिता । सायणो भोग(सोम)नाथश्च मनोबुद्धी सहोदरौ । बौधायनम् यस्य सूत्रं शाखा यस्य च याजुषी । भारद्वाजं कुलं यस्य सर्वज्ञस्सहि माधवः ॥" इति । नायं वेदभाष्यकर्ता किन्तु परिष्कर्तैव कर्ता त्वस्य सोदरस्सायणएवेत्यनुजत्वेऽप्यभ्यर्हिततां तस्य द्योतयन्तोऽभ्यधुर्मूलकारा आत्तपूर्वनिपातमत्र सायणमाधवेति । विवृतश्चेदं तैत्तिरीयसंहिताभाष्ये यथा "आदिशन्माधवाचार्यं वेदार्थस्य प्रकाशने । सद्याह नृपतिं राजन् सायणार्यो ममानुजः । सर्वं वेत्त्येषवेदानां व्याख्यातृत्वे नियुज्यताम् ॥ इत्युक्तो माधवार्येण वीरबुक्कमहीपतिः । अन्वशात्सायणाचार्यं वेदार्थस्य प्रकाशने ॥" इत्यादिना । अस्य विद्यातीर्थस्य मुख्यशिष्यादनन्तरहितोत्तराच्छङ्करानन्दादपि माधवस्य भारतीतीर्थादिव विद्याग्रहणमासीदिति चावगम्यते । तद्यथा पञ्चदशीप्रकरणे — 'नमः श्रीशङ्करानन्दगुरुपादाम्बुजन्मने ।' इति । विवरणप्रमेयसङ्ग्रहेऽपि— 'श्रीशङ्करानन्दपदं हृदब्जे विभ्राजते तद्यतयो विशन्ति ।' इति । यद्यपीमौ शङ्करानन्दभारतीतीर्थावस्य गुरू तथाऽप्यस्य श्चिरतिशयगौरवधीर्गुरौ विद्यातीर्थे एवेति प्रतिप्रबन्धमधिगम्यते । यथात्रैव विवरणप्रमेयसङ्ग्रहे— 'यद्विद्यातीर्थगुरवे शुश्रूषाऽन्या न रोचते तस्मात् । अस्त्वेषा भक्तियुता श्रीविद्यातीर्थपादयोस्सेवा ॥' इत्यादिभिः । श्रूयते चायमेव श्रीशङ्करानन्देन्द्रमुनिना दत्तविद्यारण्यनामा सहैवाष्टभिस्सब्रह्मचारिभिस्सच्चिदानन्दादिभिरचीकॢपदष्टौमठानात्मनश्चैकं शिवगङ्गभद्रमनुविरूपाक्षेश्वरमतिवेलप्रवृद्धमध्वकणादादिविमतप्रचाररोधिन इति । वादविधौ विवाद इति यावत् । प्रदिनां दर्पवतां शमप्रदेष्टॄन् दर्पं निर्दल्य शान्तिप्रदानित्यर्थः । श्रुतिशीलनात् श्रौतार्थानुसन्धानादिति यावत् । अतन्द्रानपास्तप्रमीलान् यमिनो मुनीन् विद्याधिकतीर्थदेशिकेन्द्रान् श्रीविद्यातीर्थसंज्ञानाचार्यगणीनिति चोद्यम् । नमतनमस्कुरुत । अस्य चेमे पुण्यश्लोकाः—'काञ्चशमेव समपूर्तिं त्रिसहितां वर्षान्विभूष्यासनं शिष्यानष्ट दिशागजायितयतीनादिश्य पीठावने । आवत्पञ्चदशाब्दपूर्तिं हिमवच्छृङ्गाश्रयश्शङ्करानन्दैकानुचरश्चचार परमं धीरस्तपोदुश्चरम् ॥ तपस्यन्नेवासौ तरुणतरणेर्धाम्नि परमे निलीनोऽन्तर्हित्या निमिषति च पार्श्वे परिचरे । श्रितोरक्ताक्ष्यब्दे प्रतिपदि तपस्येषबहुले श्वसन् शिष्योऽप्यार्त्या न्यवृतदस्मदन् त्वञ्च समठम ॥ अत्रान्तरेऽष्टापि यथानियोगं आचार्यपीठीमविरोधमापुः । तं शङ्करानन्दमुदीक्ष्य हृष्टाः देष्टुर्मठं तं निरवीविशन्त ॥' इति । इत्येकपञ्चाशमाचार्यरत्नम् ॥ ७६ ॥



यमिषड्गवमप्लुतस्वदेशं शमिने म्लेच्छकुलैर्महत्प्रकाशे ।
अजहत्स्वमतं जहत्प्रचारं विजगायास्तु विवेकिनामुदारम् ॥७७॥

अथ प्रसङ्गात्तानष्टापि दिग्गजसंज्ञान् विद्यातीर्थान्तेवासिनो यति.

वरान् प्रस्तोष्यन् अभिशृङ्गगिर्याद्याश्रमिमठषड्गवप्रथमपरिवृढान् सच्चि-
दानन्दमुख्यान् एकयैवोक्त्या परामृशति—यमीति । म्लेच्छानां गोत्रापु
रोपरोधिनामविशेषेण सर्वपाश्चात्यानामिदमुपलक्षणम् । कुलैः समवायैर्महतां
साधूनां प्रकाशे वैभव इति यावत् । शमिते विलोपिते विश्लथित इति भावः ।
मथित इत्यपि पाठान्तरम् । अप्लुतः अनुपद्रुतः कुलाचारवर्णाश्रमधर्मेष्विति
ज्ञेयम् । क्षोणिजो देशः आन्ध्रकर्णाटादिः स्वस्वपीठपरिसरवर्ती प्रदेशः ये-
न तत् तथोक्तं अजहत्स्वमतं अविसृष्टाद्वैतसमयम् जहत्प्रचारमुन्मु-
क्तदेशान्तरसञ्चारं उदारं गभीरप्रकृत्यौदार्यशालि वा यमिषड्गवं षट्क-
माचार्याणां षड्यमिनइत्यर्थः । ते च सच्चिदानन्दाद्वैतब्रह्मानन्दसा
न्द्रानन्दाद्वैतानन्दशैवब्धिमहादेवशिवाद्वैतसुखानन्दाख्याः यथाक्रमं शृङ्ग
गिर्यादिमठषट्कप्रतिष्ठिताविद्यातीर्थशङ्करानन्दयोरन्तेवसन्तइति बोध्यम् ।
अत्र केचिदाचार्यविद्यातीर्थशिष्येष्वतिप्रवयसमानन्दात्मापरपर्यायमद्वैता-
नन्दशैवधीन्द्रमाचार्यशङ्करानन्दस्य विद्यान्तरगुरुमुशन्ति । अपरे त्व
मुमद्वयानन्दनामानमुदाहरन्तस्तस्यापि सर्वविद्यातीर्थशिष्यसाधारणं श-
ङ्करानन्दशिष्यत्वमेव साधयन्ति । तद्यथाऽऽहुः सदानन्दसरस्वतीश्रीचर-
णाः स्वकृतौ वेदान्तसारप्रकरणे—'अर्थतोऽप्यद्वयानन्दमतीतद्वैतलक्षणम् ।
आत्मारामममहं वन्दे श्रीगुरुं शिवविग्रहम् ॥' इत्यादौ । अन्ते च 'श्रीगुरू
नद्वयानन्दान् सान्द्रानन्दश्च तद्गुरुः । तद्गुरुं शङ्करानन्दं प्रणमामि पुनः
पुनः ॥' इति ॥ वस्तुतस्तु श्रीमदद्वैतब्रह्मानन्दश्रीचरणानामेवानन्दात्मान-
इति नामान्तरमपि । भारतीतीर्थइत्यपि नाम तेषामेव तच्च प्रकटीकृतं
बृहदारण्योपनिषद्दीपिकायां श्रीशङ्करानन्दश्रीचरणैरेव यथा—'का
श्चीपीठजुषः कठोरधिषणानिर्धूतदुर्धर्षहद्वैतिव्रातदुराग्रहग्रहभयान् मा-
याविदूराक्रियान् । आचार्यान् मम चन्द्रमौलिचरणध्यानैकतानाशयान् वि
द्यातीर्थमहेश्वरान् हृदि सदा विद्योतमानान् भजे ॥ सच्छात्रत्वेऽपि सा
क्षाद्गुरव इव दयामेदुरा ये पुनर्मां गूढेष्वर्थेषु गाढं विवरणसरणेश्चक्रुरात्त-
प्रवेशम् । भारत्यानन्दतीर्थापरविरुदवहानद्वयब्रह्मसौख्यान् वृद्धान् सिद्धा



न्प्रबुद्धानपि हृदि सततं भावये ब्रह्मभूतान् ॥ द्वैतध्वान्तनिकृन्तनाहरधिपै-
श्शिष्यैर्विशिष्याष्टभिर्विष्टम्याद्वयविष्टराष्टकमितः श्रीमाधवाद्यैर्बुधैः । स्पष्टं
यो व्यदधिष्ट शिष्टपरिषत्स्वद्वैतमेवाद्वयब्रह्मानन्दमुनीश्वरं तमनघं वन्दे वि-
रूपाक्षगम् ॥' इति । विवेकिनां सुधियां विजयाय सर्वोत्कर्षेण वृत्तये अ-
स्तु । विवेकिविजयप्रदं भवत्विति भावः । अत्रेदमनुसन्धेयम् । अनन्तर-
माचार्यश्रीशङ्करभगवत्पादेभ्यः एकादशतमात् आचार्यादारभ्य शृङ्गगिर्या-
मधिशारदापीठमष्टादशतीं यावदभवन्न केऽप्यधिष्ठातारः । तदेवाक्रमसु-
दक्रामन्नुद्रुद्वैतवेतालाभिनिवेशाः पिशाचा इव प्रकटपूर्णप्रज्ञदर्शनाः सम-
न्ततः कर्णाटान् परित्यक्तवैदिकाचाराः ब्राह्मणब्रुवाः । शिशकलायिपर्येवैषां
दुर्मतदुष्प्ररोहदुर्मदस्य तादात्विकानक्षोभ्यादीन् प्रक्षोभ्य काञ्च्यामधिशा-
रदामठमनुग्रहाद्विद्यातीर्थशङ्करानन्दयोराचार्यान्तेवसतोराश्रितामधिगम्य
सम्पक्स्वसब्रह्मचारिणस्सच्चिदानन्दमुखानभिकर्णाटमष्टसुदेशेषु शृङ्गगिर्या-
दिषु अभिनवारचितमठपीठादिपरिकरेष्वर्पिताचार्यमुद्रमास्थाप्य स्वयं च स्व-
साचिव्यसन्तुष्टसकलप्रकृतिनि विरूपाक्षक्षेत्र एव प्रकल्प्य कमपि मठं स-
मधितिष्ठन् स्वस्य स्वाचार्ययोश्च विद्यातीर्थशङ्करानन्दयोर्नाम्ना विद्यारण्य-
विद्याशङ्करान्यतराकारेण लाञ्छितानि श्रीमुखानि सर्वतोमुखानि प्रचारय-
न् आज्ञयैव शङ्करानन्दस्य प्रातिष्ठिपत्पुनरपि वैदिकाचारमखिलवेदविदसौ
सायणमाधवाचार्यएवेति । यदद्याप्येतेषां नवानामपि मठानामेते श्रीमुख-
शिरसि विद्यारण्यविद्याशङ्करपदयोरन्यतरदिति श्रीमुखलेखवैखर्याऽपि वि-
द्यारण्यस्य विद्याशङ्करयोरपि च पादपद्माराधकाएवामी इति च करबदर-
माबालमापण्डितमखिलानाम् । ततएव निकटवर्तिन्यप्यस्मिन्नभिनवमठनवके
काञ्चीपुरस्थेष्वाचार्येष्वबध्नन्तो जगद्गुरुधियमधिविरूपाक्षेश्वरमन्वतिष्ठन्नव-
निदानादि कामकोटिपीठाधिपेभ्य एव परेपरे वीरबुक्कभूपतेरर्वाञ्चोऽपि वी-
रनृसिंहरायश्रीकृष्णरायाच्युतरायादयः परंपरया विजयनगरभूपालाइतीदम-
द्यापि तद्दानपत्रैः करतलामलकम् ॥ इति ॥ ७७ ॥

समुपासितनीलकण्ठमन्त्रक्रमनिर्धूतविषामयं स्वतन्त्रम् ।
शिवयोगिसमाह्वयं यमीन्द्रं भवभेदाय भजाम मोदसान्द्रम् ॥७८॥

अथाष्टत्वशिष्टौ द्वावितरावपि यथापूर्वषड्वमाचार्यविद्यातीर्थेन्द्रसरस्वतीचरणचरणसरसिजाराधकत्वाविशेषेण जगद्गुरुपरम्पराबाह्यानपि परतः सत्यग्रपीठाचार्यकनिर्वाहतया प्रगल्भायमानानाचार्यशङ्करानन्दशिष्यानष्टावपि स्तोतुमादृतां प्रवृत्तिमतिसमग्रयिष्यन्नभिवर्णयति द्वाभ्यां— समुपासितेति । समुपासितः साधितः योनीलकण्ठमन्त्रः तदाख्यो विषनिर्हरणः मनुविशेषः तथोक्तः तस्य क्रमेण अनवरताभ्यासशैल्या निर्धूताः निरस्ताः विषामयाः विषवेगजनितोपतापाः येन तथोक्तं विषनिर्हरणमन्त्रेण प्राणिनां विषवेगविनाशकमिति यावत् । स्वतन्त्रं स्वेच्छासञ्चारं मोदसान्द्रमानन्दघनं नित्यानन्दमित्यर्थः । शिवयोगिसमाह्वयं शिवयोगिनामानं यमीन्द्रं यतिवरं भवभेदाय पुनर्भवाननुवृत्तये भजाम श्रयाम ॥ ७८ ॥

लुलितागमिकच्छटोपदेशं ललितार्चाश्रितहस्तमस्तपाशम् ।
कलिताखिलवेदशास्त्रकोशं कलये प्रत्यगितं महःप्रकाशम् ॥७९॥

लुलितेति । लुलिताः श्लथिताः आगमिकानां शैवभैरवपाञ्चरात्रादितन्त्राजीवसम्बन्धिनीनां छटानां समूहानामुपदेशाः अनुशासनविशेषाः येन तं निर्लुठिताशेषतान्त्रिकनीरसजल्पितमिति यावत् । ललितार्चादेव्याराधनां श्रितौ अविरतं प्राप्तौ हस्तौ बाहू यस्य तं अस्तपाशं अमायानुषङ्गं । कलितस्समुच्चितः अखिलवेदशास्त्राणां समस्तवेदवेदाङ्गानां कोशः भाण्डारं येन तं तथोक्तम । प्रत्यगितं प्रत्यक्छन्दयुतं महः प्रकाशं प्रत्यग्ज्योतिःप्रकाशनामानमाचार्यं कलये ध्यायामि । आचार्याणामभिवादने यथा सुरेश्वरपद्मपादादीनामन्ते वसतामप्यनन्यस्थानीयता अविशेषेण ‘श्रीशङ्कराचार्यमथास्य पद्मपादञ्च हस्तामलकञ्च शिष्यम् ।’ इत्यादिना प्रतिपादिता तद्वदेवात्र श्रीविद्यातीर्थश्रीचरणानभिष्टुवन्ननन्यस्थानीयानिमानष्टावन्तेवसतोऽप्यभिपस्मरुमूलकाराः । यदनुरुध्यैव पठन्ति श्रीकाञ्चीजगद्गुरुपरम्परायामप्यविशेषमिमानतत्त्वज्ञाः केचित् । पीठाचार्यता तु विद्यातीर्थमहेश्वरात्परमाचार्यशङ्करानन्देन्द्राणामेवेति सर्वमवदातम् । तदैवैताञ्श्रीदानहरभिपुण्यश्लोकमञ्जरीप्रबन्धमष्टावपि सर्वज्ञसदाशिवबोधेन्द्रसरस्वतीश्रीचरणाः किन्त्वनववादिपुरन्तेवास्यष्टकपरिवृततां परमसीपामित्यलम् । सच्चिदानन्दाद्याधिकतरमहिमत्वेऽपि माधवाचार्यस्यात्र नाम्नाऽपि नाम्नानमपारमहत्त्वमात्रेणेत्यवगन्तव्यम् । इति एकपञ्चाशमाचार्यरत्नम् ॥७९॥



खलवैष्णवतैन्त्रिडीककोलाहलहेलाहितगालिरुक्तिजालैः ।
शिवयन् वरदं चिरेण सौम्यः शिवकृन्मेऽस्तु सशङ्करः प्रणम्यः ॥८०

अथ द्वापञ्चाशमाचार्यमादृतशङ्करानन्देन्द्रनामानं अन्तेवसत्सच्चिदानन्दसायणमाधवादिभिः यथाविद्यातीर्थश्रीचरणमाराधितं अभिनवशङ्करापरपर्यायमभिष्टौति— खलेति । खलानां दुर्जनानां महात्मनामवहेलकत्वात्तथोक्तानां वैष्णवानां पाञ्चरात्रिणां तैन्त्रिणीकाय चिञ्चोदनाय दध्योदनादीनामपीदमुपलक्षणम् । यः कोलाहलः कलकलारवः तस्मिन् हेलया लीलया न त्वैदंपर्येणेति यावत् । आहितः रचितः गालिरवहेलः कदर्थनं वा यस्य स तथोक्तः प्रत्यन्धःकोलाहलमबहुमानितागमनइत्यर्थः । उक्तिजालैः स्तुतिप्रपञ्चैः शिवाभेदेन विष्णोरिति ध्येयम् । वरदं हस्तिगिरीश्वरं शिवयन् शिवलिङ्गाकारं कुर्वन् चिराय बहोः कालात् तत्कृतप्रणिपतनादिभिरिति बोध्यम् । सौम्यः प्रसन्नस्सन् शिवकृत अभीष्टदायी वैष्णवानामित्यर्थः । स शङ्करः शङ्करानन्दगुरुरिति यावत् । प्रणम्यः अभिवन्द्यः अस्माकमिति शेषः । अस्तु भवतु सर्वोत्कर्षेण वर्ततामिति भावः । यस्येमे पुण्यश्लोकाः—“आदिश्याष्ट यमीश्वरान् समवितुं कर्णाटदेशेऽद्वयं रोद्धुं सायणमाधवोक्तविधया वृद्धिञ्च मध्वाध्वनाम् । विद्यातीर्थगुरोरसोढविरहोऽप्यावृत्य शीताचलात्तस्स्योक्तैर्विभराम्बभूव सधुरां श्रीकामकोटीमठे ॥ श्रीमध्यार्जुनबालचन्द्रमखिराट्सूनुर्महेशाह्वयः विद्यातीर्थपदान्नियम्य समयेष्वद्वैतमुद्योतयन् । अध्यास्त प्रतिकामकोटि शरदो द्वात्रिंशतं देहिनां द्वैतध्वान्तनिवारणो नवमठीनाथोनवशङ्करः ॥ सद्दुर्मुखिनि सन्मुखो मधुरवाक्सौ मौनिराट्पदी प्रतिपदि प्रगे प्रसितधीस्सिते पक्षके । समस्तभुवनार्चितस्सकृदुमेशयन्नच्युतं

महो तनुमनुत्तमामविशदाशु नैजं महः ॥' इति । इति त्रिपञ्चाशमाचार्यरत्नम् ॥ ८० ॥

निजनीवृदवग्रहेतिखेदत्यजनेपालनृपालपूज्यपादः ।
सपुरो मम साधु सन्निधत्तां विपुलानन्दसदाशिवोऽप्रमत्तः ॥८१॥

अथोत्तरमनुष्ठितनेपालभूमण्डलीयात्रमाचार्यपूर्णानन्दापरपर्यायं श्रीसदाशिवेन्द्रजगद्गुरुमुपवर्णयति—निजेति । निजनीवृतः स्वदेशस्य अवग्रहो दुर्भिक्षमेवेतिरुपद्रवः तया यः खेदः उपतापः तस्य त्यजः निवर्तकः सचासौ नेपालनृपालः तदभिधजनपदपरिवृढः तेन पूज्यौ पूजिताविल्यर्थः । पादावंघ्री यस्य तथोक्तः एतेनास्य सान्निध्यादेव नेपालदेशदुर्भिक्षनिवृत्तेर्जाततया नेपालनृपतिनापि सादरमाराधितत्वमूह्यम् । अप्रमत्तः प्रमादालस्यादिहीनइत्यर्थः । सः विपुलानन्दसदाशिवः पूर्णानन्दसदाशिवेन्द्रः मम पुरः मदग्रे साधु सन्निधत्तां सम्यगाविर्भवत्वित्यर्थः । अस्य चेमौ पुण्यश्लोकौ—'नागारण्यगनागनाथतनुजः प्राप्ताश्रमश्शङ्करानन्दादेष सदाशिवेन्द्रनियमी नेपालभूपार्चितः । पूर्णानन्दपदेन योभुवि पुनन् सर्वांश्च सानुग्रहं श्रीकाञ्च्यामधिकामपीठमवसत्सैकामशीतिं समाः ॥ पिङ्गले मङ्गलालोकः ज्येष्ठे ज्येष्ठशुचिश्शुचौ । दशम्यां दशमीमार्च्छद्दशां धाम्न्यपुनर्भवे॥' इति। इति त्रिपञ्चाशमाचार्यरत्नम् ॥ ८१ ॥

बहुधाहितसूत्रभाष्यशान्तिः बहुलामोदवहस्समग्रशान्तिः ।
शमलं समुदस्य शं ममालं समहादेवगुरुर्दिशेत्सलीलम् ॥८२॥

अथानन्तरमाह— बहुधेति । बहुधाबहुकृत्व इत्यर्थः। आहिता आरचिता सूत्रभाष्यशान्तिः ब्रह्मसूत्रशाङ्करभाष्यशान्तिपाठप्रवचनकथा येनसतथोक्तः बहुलेन प्रचुरेणामोदेन हर्षेण युतः सहितः सदानन्दीति भावः । समग्रा अविकला शान्तिरुपशमोयस्य तथोक्तस्समहादेवगुरुः महादेवेन्द्रनामाजगद्गुरुः मम मे शमलं दुरितं सलीलं हेलयैव न तु श्रमेण समुदस्य निरस्य शंसुखं अलं पर्याप्तं यथा दिशेत् दद्यादित्यर्थः ॥ अस्यायं पुण्यश्लोकः॥ काञ्चीकामेश्वरार्यात्समजनि कमलांबोदरात् कृष्णनाम्नो



यः पूर्णानन्दयोगिप्रवरपदरतः प्राप पीठीमपुष्य ॥ भाष्यं त्रिस्सत्कृत्वश्चतुलमचकलद्यो नवाब्द्यां प्रद्युम्नवत्सराषाढकृष्णप्रतिपदि समहादेवनामाऽऽप सिद्धिम् ॥' इति ॥ इति चतुष्पञ्चाशमाचार्यरत्नम् ॥ ८२ ॥

सततादृतचन्द्रमौलिसेवः श्रितकाञ्चीपुर एव शुद्धभावः ।
सृजतान्मम चन्द्रचूडमौनी सजयं सर्वत एव साधुमानी ॥८३॥

अनन्तरमाचार्यचन्द्रचूडेन्द्रमभिध्यायति ॥ सततेति ॥ श्रितकाञ्चीपुर एव अन्यतस्सञ्चारहैन्यमासूचयितुमिदं विशेषणम् । शुद्धभावः विमलाशयः सतताहिता अनवरतमाराधिता चन्द्रमौलिसेवा योगेश्वरार्चा येन सतथोक्तः साधूनां माननं सम्भावनं शीलमस्येति साधुमानी ताच्छील्ये णिनिः सचन्द्रचूडेन्द्रसरस्वतीति यावत् ॥ मम मे सर्वतः सर्वत्रजयमेव न त्वपजयमिति भावः । यद्वा सर्वतोजयमेव सर्वप्रपञ्चाभिभवमेव सृजतात् दद्यादित्यर्थः ॥ यद्यप्याचार्यतया स्वस्य पुण्यश्लोककारैर्बहुधाऽयमुपवर्णितः प्रबन्धान्तरेषु तथाप्यस्य चरितस्पृशौ द्वावेवेह दर्शिताविमौ पुण्यश्लोकौ । तौ यथा—'मधुरितमणिमुक्तानुग्रवतीरास्मशाज्ञपुरतिलकगुरारिश्रीमतीपुण्यपुञ्जम्। अरुणगिरिरभार्षीद्द्वयाचार्यमुद्रां चतुरुदधिपटायां चन्द्रचूडेन्द्रनामा ॥' 'इत्थं मामनुशिष्य शिष्यकणिशं तांस्तान् समस्तांस्ततस्सन्दर्श्य क्षणतस्ससिद्धिमसदद्वर्षान् षडेव स्थितः । काञ्च्यामाङ्गिरसे सहस्यनवमैकादश्यहे प्रत्युपस्थापत् सिद्धिमनापदि प्रतिपदं सच्चित्सुखे ज्योतिषि ॥' इति ॥ इति पञ्चपञ्चाशमाचार्यरत्नम् ॥ ८३ ॥

अथ मे ससदाशिवः कृपीट प्रथमं बोधपदेन तत्त्वदेष्टा ।
कुशलं कुशलाग्रणीः प्रकामप्रशमोऽप्युज्ज्वलमूर्तिराप्तकामः ॥८४॥

अथ षट्पञ्चाशमाचार्यं प्रस्तौति—अथेति । अथ प्रथममादौ बोधपदेन बोध इति नाम्ना तत्त्वदेष्टा परमार्थोपदेशकः प्रणतानामिति बोध्यम् । प्रभाविमर्शिन्यान्तु "बोधस्य तदाख्यस्यार्यामेयस्य वेदान्तप्रकरणस्य पथा मार्गेण बोधपथेन बोधार्याद्वारेनेत्यावत् । तत्त्वस्य परमार्थस्य देष्टा बोधकः । प्रवीरसेनुभूपालायेति शेषः । भक्तिदेष्टेत्यपि पाठान्तरम् ॥" इति दृश्यते ।

वस्तुतस्तु बोधार्यग्रन्थः स्वपरमगुरुनाम्ना प्रकाशितः सर्वज्ञसदाशिवब्रह्मेन्द्रैरेव निर्मित इति निर्विवादम् ॥ प्रकामप्रशमोऽपि अत्यन्तशान्तोऽपि उज्ज्वलमूर्तिस्सुन्दराकार इत्यर्थः आप्तकामः अकाम इति ज्ञेयम् । कुशलाग्रणीः निपुणाग्रेसरः स सदाशिवः तदाख्य आचार्यः श्रीसदाशिवेन्द्र इति यावत् । मे मम कुशलं कृपीष्ट क्षेममादध्यादित्यर्थः ॥ अस्यैवाशङ्कराद्या च निजगुरोः पुण्यश्लोककर्तृत्वात्समाप्ता सा पुण्यश्लोकमञ्जरी चन्द्रचूडान्तैव । अथाहमेवास्मादाच मम गुरोः पञ्चानामभिदधे पुण्यश्लोकान् यत्रास्येमौ पुण्यश्लोकौ —अथोत्तरपिनाकिनीतटभवस्सबोधेश्वरः सुतश्चिरुताम्बिकानाध्वरिवरस्य भक्तो हरेः । अभूत्किल जगद्गुरुर्नियमिचन्द्रचूडाज्ञया सदाशिवपदाव्हश्चरसमाः प्रवीरार्चितः ॥ ससेतुमधिजग्मिवानधिपवित्ररामेश्वरं श्रितः पदमनश्वरं प्रतिविलम्बिचैत्राष्टमि । दधत्परमयुग्मिकं निजपदे प्रतिष्ठापितं शिवाय बहुले नृणां मुक्तकुलायपक्षे मुनिम् ॥ इति षट्पञ्चाशमाचार्यरत्नम् ॥८४॥

हृदये सपदं सदा विधत्तां सदयो मे प्रणुदन् प्रमादवत्ताम् ।
निगमान्तगुरुः परःशिवात्मा सुगमस्साधुततेर्यमी महात्मा ॥८५॥

अथ सप्तपञ्चाशमात्मनो देशिकमभिष्टौति द्वाभ्यां —हृदय इति । साधुततेस्सज्जनसमुदायस्य सुगमः सुप्रापः एतेन दुर्जनदूर इति ज्ञेयम् । महाप्रशान्तः प्रचुरोपशमः मे मम प्रमादवत्तां प्रमत्तत्वं सदयं सानुकम्पं प्रणुदन् निरस्यन् निगमान्तगुरुः वेदान्तविद्याचार्यः ममेत्येव सम्बध्यम् । सः शिवान्तः शिवशब्दोपपदः परः परमशिवेन्द्रार्य इति यावत् । हृदये चेतसि ममेत्येव । पदं चरणं सदा विधत्तां सर्वदा करोतु ॥८५॥

यदुदीक्षणलेशतो जनानां विदुरद्वैतमतिं द्वितां धुनानाम् ।
तमहं परमार्चितं शिवेन्द्रं शमवन्तं शरणं श्रये यमीन्द्रम् ॥ ८६ ॥

यदिति ॥ यस्य श्रीपरमशिवेन्द्रार्यस्य उदीक्षणलेशतः कटाक्षमात्रेणेत्यर्थः । जनानां प्राकृतानामपि द्वितां द्वैतं धुन्वानां निर्हरन्तीं अद्वैतमतिं अभेदबुद्धिं आत्मैवेदं सर्वमिति सर्वतस्समरसतामुदितामिति शेषः । विदुः विदन्ति महात्मान इति शेषः । तं शमवन्तं शान्तं परमार्चितं पूज्य-



पदैरपि पूजितमिति व्यङ्ग्यं परमपूर्वपदमित्यर्थः । यमीन्द्रं शिवेन्द्रं श्रीपरमशिवेन्द्रमुनीन्द्रमिति निर्गलितोऽर्थः । अहं शरणं श्रये प्रपद्ये ॥ अस्यैव परमशिवेन्द्रार्यस्य प्रशंसारूपमात्मविद्याविलासाभिधं प्रकरणान्तरमभीभिरेव ब्रह्मेन्द्रैरारचितमद्यापि सुस्पष्टमधिगम्यते ॥ यत्रैषामिमौ श्लोकौ—'निरवधिसंसृतिनीरधिनिपतितजनतारणस्फुरन्नौकाम् । परमतभेदनपुटिकां परमशिवेन्द्रार्यपादुकां नौमि ॥ देशिकपरमशिवेन्द्रादेशवशात् बुद्धदिव्यमहिमाहम् । स्वात्मनि विश्रान्तिकृते सरसं प्रस्तौमि किञ्चिदिदम् ॥' इत्यादिना ॥ अस्यचेमे पुण्यश्लोकाः 'पंपासरस्तटभुवः परमेश्वरस्य पुत्रस्सदाशिवरतश्शिवरामकृष्णः । तस्मादवाप्य नियमं नियमी निरस्तसङ्गोऽध्युवास सदनं खलु कामनेभ्यः ॥ श्रीचक्रपूजनरतश्शिवयोगलम्बी श्रीदेशिकेन्द्रवचसा श्रितकामपीठः । आचार्यकं छविसमं विदधावकामः कामेश्वरीमनुपुरश्चरणैकदक्षः ॥ स पार्थिवे पार्थिवदेहदूरं नभोनभस्यच्छतमोऽच्छपक्षे । अवापदापद्विधुरो दशम्यां दशम्यमौ नीनशके शकाब्दे ॥' इति ॥ इति सप्तपञ्चाशमाचार्यरत्नम् ॥ ८६ ॥

इति नाथनयाऽऽत्मबोधनाम्नो यतिराजस्य सदाशिवेन्द्रभूम्ना ।
कलिता जयताद्वसन्तमालाषडशीत्या गुरुराजरत्नमाला ॥८७॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीसदाशिवब्रह्मेन्द्रकृतिषु
गुरुराजरत्नमालास्तवः संपूर्णः

अथ प्रतिज्ञातार्थनिर्वहणात् प्रकरणपरिसमाप्तिं दर्शयति—इतीति । आत्मबोधनाम्नः तदाख्यस्य यतिराजस्य आत्मबोधेन्द्रसरस्वत्याः परमशिवेन्द्रसमनन्तराचार्यमणेरिति यावत् । नाथनया प्रार्थनया सदाशिवेन्द्रभूम्ना सदाशिवब्रह्मेन्द्रेणेति यावत् । इति एवं वसन्तमालाषडशीत्या तत्सङ्ख्याकैस्तदभिधैरर्थसमवृत्तैः कलिता गुम्फितेति यावत् । गुरुराजानामेव रत्नानां मणीनां माला मालावत् क्रमेण वर्णनात्तद्रूप्येणारोपात् । द्वैके गुरुरत्नमालास्तव इति बोध्यम् । जयतात् सर्वोत्कर्षेण वर्तताम् अपि सहृदयहृद्

द्वयमिति सर्वमनवद्यम् । अयं किल आत्मबोधेन्द्रः श्रीपरमशिवेन्द्रार्यान्ते-
वासी सदाशिवब्रह्मेन्द्रसब्रह्मचारीति च सुविशदमवादि श्रूयते । अस्य त-
दनन्तरयोः श्रीमद्बोधेन्द्रयोगीन्द्रात्मप्रकाशेन्द्रयोश्च यथाश्रुतमाराचिताः पु-
ण्यश्लोकाः मयैव । यथा —'शुद्धानलनवविश्वमणीन्द्रसूनुः विश्वेश्वरः पर-
शिवार्यपदं प्रपन्नः । आसेतुशीतगिरि कलितनैजयात्रः आचार्यशङ्करगुरो-
रनुकृत्य आसीत् ॥ विश्वाधिकत्वधिषणात्वत एनमाहुर्विश्वाधिकेन्द्रमनघाः
नवशङ्करं च । श्रीरुद्रपादयुगलप्रीतिसम्पदन्वयसन्धानकौशलमपूर्वं किमप्य-
भयत् ॥ द्वापञ्चाशतमुद्वहन् गुरुपुराध्यानवाच्यां दिशि प्रस्थाने गरुडा-
पगातटभुवि प्रापत् पदं शाश्वतम् । बोधेन्द्रार्यनिसृष्टविश्वरगुरो विश्वाधिके-
न्द्रस्तुताङ्घ्र्यम्भोजं हयग्रीवेश्वरे हृदि दधत्सोमार्धचूडामणिम् ॥ श्रीमन्मण्डन-
नाम्नि काञ्चिनगरीविटे कृतावासतः कण्वान् केशवपाण्डुरङ्गविबुधात् जा-
तोऽभिजाताकृतिः । भक्तः श्रीपुरुषोत्तमः श्रितवतां भक्त्यध्वदर्शी महानध्या-
त्मानमवादि शङ्करगुरोरार्यात्मबोधाज्ञया ॥ आचार्यत्वमुदूह्य साधु सचतुष्प-
ञ्चाशदब्दं मठे पीठे कामदृशः स्थितः स्ववचनैरद्वैतमुद्योतयन् । अक्षिवह्नि-
रसचन्द्रसम्मितशके श्रीशालिवाहाह्वये सिद्धिं प्रापदपारधैर्यजलधिः स्वस्ये-
व धाम्न्यद्वये ॥ प्रमोदवति सौम्यवत्पूर्णिमायामुपार्जुनम् । भगवन्नामबोधे-
न्द्रो बोधसाम्राज्यमीयिवान् ॥ अथ वसिष्ठनदीतटसम्भवः परशुरामसुतः स्तु-
तिपण्डितः । अचकलद् गुरुराजपुरां गुरोर्वचनतो रचयन् परितोऽटनम् ॥
आत्मप्रकाशेन्द्रसमाह्वयश्चाऽऽसावाचार्यकं द्वादशवर्षमाचरत् । गोविन्दनामा
नियतः स्वभानुचैत्रद्वितीयानिशि सिद्धिमापत् ॥ इत्यष्टपञ्चाशदेकोनषष्टितमष-
ष्टितमान्याचार्यरत्नानि ॥ अत्रेदमनुसन्धेयम् । यदा सर्वज्ञात्मन आ चास्म-
द्गुरोर्महादेवेन्द्रात् आसन् षष्टिरेव गुरवः । अस्य ह्यनन्तरं श्रीविद्या-
तीर्थमहेश्वरात् अष्टावपि दिग्गजाभिधान् आश्रमिवरान् अभिनवपीठा-
ष्टकप्रतिष्ठितानपि अस्मदाचार्यपरंपरायामायोज्य तदसन्निधौ कलितक-
लिपञ्चकालकामकोटीमठाधनानमपूर्वं च आचार्यानाकलय्य ततः सच्चिदान-
न्दमुखान् प्रत्यक्ज्योतिःप्रकाशेन्द्रान्तांस्तानपि सङ्कलय्य अधिष्ठितका-



मकोटिपीठाः आचार्याः अष्टषष्टिरिति केचिदाजानिषुः । अस्माभिस्तु यथा
सर्वज्ञसदाशिवबोधेन्द्रश्रीचरणानुशासनमाचतुष्पञ्चश्लोकमञ्जरीबन्धमनुकीर्ति-
तपुण्यतिथीनामेव काञ्चीकामकोटिपीठाधिपता निरूपितेति सर्वमनवद्यम् ॥

अनन्तं श्रीविद्याचरणनलिनानन्दथमिलन्मिलिन्दात्मा योगेश्वरसततनि-
ष्ठानिरतः । महादेवः श्रीमान् भुवनगुरुरद्वैतपदवीं विपुष्यन्नुद्वेलां जयति
शिवकाञ्चीगुरुमठे ॥ महादेवपदाम्भोजमराळायितचेतसा । आत्मबोधेन जय-
ताद्दाहिता सुषुमा चिरम् ॥ नेत्राग्निरसचन्द्रेषु यातसु शालिशकस्य हो ।
श्वाहृयेऽयं रत्नमालायाः सुषुमाख्या मया हिता ॥ जयतु जयतु काञ्चीकाम-
कोट्याख्यपीठी जयतु जयतु लिङ्गं चन्द्रमौलीशसंज्ञम् । जयतु जयतु का-
मं शारदाश्रीमठोऽयं जयतु जयतु भूमा श्रीमहादेवनाम ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीमहादेवेन्द्रपादान्तेवासिशङ्करभगवत्पाद-
शिष्यश्रीमदात्मबोधेन्द्रसरस्वतीविनिर्मिता सुषमाख्या
गुरुरत्नमालिकाव्याख्या संपूर्णा ।

---

**पल्लवी**

खेलति ब्रह्माण्डे भगवान् खेल०

**चरणाः**

हंसः सोऽहं हंसः सोऽहं
हंसः सोऽहं हंसोऽहमिति खेलति० ॥ १ ॥
परमात्माहं परिपूर्णोऽहं
आनन्दोऽहं ब्रह्मैवाहं खेलति० ॥ २ ॥
शब्दस्पर्शरसादिकमात्रे
सात्त्विकराजसतामसचित्रे खेलति० ॥ ३ ॥
बुद्धिमनश्चित्ताहङ्कारे
भूजलतेजोगगनसमीरे खेलति० ॥ ४ ॥
त्वक्चक्षुश्श्रुतिजिह्वाघ्राणे
पञ्चविधप्राणोपस्थाने खेलति० ॥ ५ ॥
परमहंसरूपेण विहर्ता
ब्रह्मविष्णुरुद्रादिककर्ता खेलति० ॥ ६ ॥

---

**पल्लवी**

मानस सञ्चर रे - ब्रह्मणि - मानस०

**चरणाः**

श्रीरमणीकुचदुर्गविहारे
सेवकजनमन्दिरमन्दारे मानस० ॥ १ ॥
मदशिखिपिञ्छालंकृतचिकुरे
महनीयकपोलविजितमुकुरे मानस० ॥ २ ॥
परमहंसमुखचन्द्रचकोरे
परिपूरितमुरलीरवसारे मानस० ॥ ३ ॥

---



**पल्लवी**

तद्वज्जीवत्वं - ब्रह्मणि - तद्वज्जीवत्वं

**चरणाः**

यद्वत्तोये चन्द्रद्वित्वं
यद्वन्मुकुरे प्रतिबिम्बत्वं तद्व० ॥ १ ॥
शुक्तौ यद्वद्रजतमयत्वं
रज्जौ यद्वत्फणिदेहत्वं तद्व० ॥ २ ॥
स्थाणौ यद्वन्नररूपत्वं
भानुकरे यद्वत्तोयत्वं तद्व० ॥ ३ ॥
परमहंसगुरुणाऽद्वयविद्या
फणिता धिक्कृतमायाविद्या तद्व० ॥ ४ ॥

---

**पल्लवी**

ब्रूहि मुकुन्देति - रसने - ब्रूहि मुकुन्देति

**चरणाः**

केशव माधव गोविन्देति
कृष्णानन्त सदानन्देति ब्रूहि० ॥ १ ॥
गरुडध्वज पङ्कजहस्तेति
खण्डितदशकन्धरदर्पेति ब्रूहि० ॥ २ ॥
राधारमण हरे रामेति
राजीवाक्ष घनश्यामेति ब्रूहि० ॥ ३ ॥
अक्रूरप्रिय चक्रधरेति
हंस निरञ्जन कंसहरेति ब्रूहि० ॥ ४ ॥

---

**पल्लवी**

चिन्ता नास्ति किल - तेषां - चिन्ता नास्ति०

**चरणाः**

शमदमकरुणासम्पूर्णानां
साधुसमागमसङ्कीर्णानां  चिन्ता०  ॥१॥
कालत्रयजितकन्दर्पाणां
खण्डितसर्वेन्द्रियदर्पाणां  चिन्ता०  ॥२॥
परमहंसगुरुपदचित्तानां
ब्रह्मानन्दामृतमत्तानां  चिन्ता०  ॥३॥

---

**पल्लवी**

स्मर वारंवारं अयि चेतः स्मर नन्दकुमारं

**चरणाः**

घोषकुटीरपयोघृतचोरं
गोकुलबृन्दावनसञ्चारं  स्मर०  ॥१॥
वेणुरवामृतपानविहारं
विश्वस्थितिलयहेतुविहारं  स्मर०  ॥२॥
परमहंसहृत्पञ्जरकीरं
पातकधेनुकबकसंहारं  स्मर०  ॥३॥

इति श्रीसदाशिवब्रह्मेन्द्रकृता
गीति रत्नमाला संपूर्णा ॥

---

# जगद्गुरुपरम्परास्तवः ।

ॐ नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥
श्रीशङ्कराचार्यमथास्य पद्मपादञ्च हस्तामलकञ्च शिष्यम् ।
तन्त्रोटकं वार्तिककारमन्यानस्मद्गुरून् सन्ततमानतोऽस्मि ॥
ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो
वंशऋषिभ्यो नमो महद्भ्यो गुरुभ्यः ।
ॐ सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमस्मि ।
सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥१॥
ॐ सर्वतन्त्रस्वतन्त्राय सदात्माद्वैतवेदिने ।
श्रीमते शङ्करार्याय वेदान्तगुरवे नमः ॥२॥
अविप्लुतब्रह्मचर्यान् अन्वितेन्द्रसरस्वतीन् ।
आत्तमिथ्यावारपथानद्वैताचार्यसङ्कथान् ॥३॥
आसेतुहिमवच्छैलं सदाचारप्रवर्तकान् ।
जगद्गुरूंस्तमः काञ्चीशारदामठसंश्रयान् ॥४॥
पवित्रितेतराद्वैतमठपीठीशिरोभुवे ।
श्रीकाञ्चीशारदापीठगुरवे भवभीरवे ॥५॥
वार्तिकादिब्रह्मविद्याकर्त्रे ब्रह्मावतारिणे ।
सुरेश्वराचार्यनाम्ने योगीन्द्राय नमोनमः ॥६॥
अपोऽश्नन्नेव जैनान्यः आप्राग्ज्योतिषमाच्छिनत् ।
शिशुमाचार्यवाग्वेणीरयरोधिमहोपलम् ॥७॥
संक्षेपशारीरकमुखप्रबन्धविवृताद्वयम् ।
ब्रह्मस्वरूपार्यभाष्यशान्त्याचार्यकपण्डितम् ॥८॥
सर्वज्ञचन्द्रनाम्ना च सर्वतोभुवि विश्रुतम् ।
सर्वज्ञसद्गुरुं वन्दे सर्वज्ञमिव भूगतम् ॥९॥

मेधाविनं सत्यबोधं व्याधूतविमतोच्चयम् ।
भाष्यभाष्यत्रयव्याख्याप्रवीणं प्रभुमाश्रये ॥१०॥
ज्ञानानन्दमुनीन्द्रार्यं ज्ञानोत्तमवराभिधम् ।
चन्द्रचूडपदासक्तं चन्द्रिकाकृतमाश्रये ॥११॥
शुद्धानन्दमुनीन्द्राणां विद्धार्हतमतत्विषाम् ।
आनन्दज्ञानसेव्यानाम् आलम्बे चरणाम्बुजम् ॥१२॥
सर्वशाङ्करभाष्यौघभाष्यकर्तारमद्वयम् ।
सर्ववार्तिककृद्वृत्तिकृतं श्रीशैलगं भजे ॥१३॥
कैवल्यानन्दयोगीन्द्रान् केवलं राजयोगिनः ।
कैवल्यमात्रनिरतान् कलयेम जगद्गुरून् ॥१४॥
श्रीकृपाशङ्करार्याणां मर्यादातीततेजसाम् ।
षण्मताचार्यकजुषाम् अङ्घ्रिद्वन्द्वमहं श्रये ॥१५॥
महिष्ठाय नमस्तस्मै महादेवाय योगिने ।
सुरेश्वरापराख्याय गुरवे दोषभीरवे ॥१६॥
स्तुमस्सदाशिवानन्दचिद्घनेन्द्रसरस्वतीन् ।
कामाक्षीचन्द्रमौल्यर्चाकलनैकलसन्मतीन् ॥१७॥
सार्वभौमाभिधमहाव्रतचर्यापरायणान् ।
वन्दे जगद्गुरूंश्चन्द्रशेखरेन्द्रसरस्वतीन् ॥१८॥
समा द्वात्रिंशदत्युग्रकाष्ठमौनसमाश्रयान् ।
जितमृत्यून् महालिङ्गभूतान् सच्चिद्घनान्नुमः ॥१९॥
महाभैरवदुस्तन्त्रदुर्दान्तध्वान्तभास्करान् ।
विद्याघनान्नमस्यामि सर्वविद्याविचक्षणान् ॥२०॥
आचार्यपदपाथोजपरिचर्यापरायणम् ।
गङ्गाधरं नमस्यामस्सदा गङ्गाधरार्चकम् ॥२१॥
जगज्जायिमुसौराष्ट्रनरदृष्टिमदापहान् ।
शकसिल्हकदर्पघ्नानीडीमहि महायतीन् ॥२२॥



चतुस्समुद्रीक्रोडस्थवर्णाश्रमविचारकान् ।
श्रितविप्रव्रजस्कन्धसुवर्णान्दोलिकाचरान् ॥२३॥
प्रत्यहं ब्रह्मसाहस्रसन्तर्पणकृतव्रतान् ।
सदाशिवसमाह्वानान् स्मरामस्सद्गुरून् सदा ॥२४॥
मायालोकायतीभूतबृहस्पतिमदापहान् ।
वन्दे सुरेन्द्रवन्द्याङ्घ्रीन् श्रीसुरेन्द्रसरस्वतीन् ॥२५॥
श्रीविद्याकरुणालब्धब्रह्मविद्याद्वतामयान् ।
वन्दे वशंवदप्राणान् मुनीन् विद्याघनान्मुहुः ॥२६॥
विद्याघनकृपालब्धसर्ववेदान्तविस्तरम् ।
कौतस्कुतोत्पातकेतुं निश्शङ्कं नौमि शङ्करम् ॥२७॥
चन्द्रचूडपदध्यानप्राप्तानन्दमहोदधीन् ।
यतीन्द्रांश्चन्द्रचूडेन्द्रान् स्मरामि मनसा सदा ॥२८॥
नमामि परिपूर्णश्रीबोधान् ग्रावाभिलापकान् ।
यद्वीक्षणात् पलायन्त प्राणिनामामयाधयः ॥२९॥
सच्चित्सुखान् प्रपद्येऽहं सुखमाप्तगुहास्थितीन् ।
चित्सुखाचार्यमीडेऽहं सत्सुखं कोङ्कणाश्रयम् ॥३०॥
भजे श्रीसच्चिदानन्दघनेन्द्रान् रससाधनात् ।
लिङ्गात्मना परिणतान् प्रभासे योगसंश्रिते ॥३१॥
भगवत्पादपादाब्जासक्तिनिर्णिक्तमानसान् ।
प्रज्ञाघनं चिद्विलासं महादेवञ्च मैथिलम् ॥३२॥
पूर्णबोधञ्च बोधञ्च भक्तियोगप्रवर्तकम् ।
ब्रह्मानन्दघनेन्द्रञ्च नमामि नियतात्मना ॥३३॥
चिदानन्दघनेन्द्राणां लम्बिकायोगसेविनाम् ।
जीर्णपर्णाशिनां पादौ प्रपद्ये मनसा सदा ॥३४॥
सच्चिदानन्दनामानं शिवार्चनपरायणम् ।
भाषापञ्चदशीप्राज्ञं भावयामि सदा मुदा ॥३५॥

भूप्रदक्षिणकर्मैकसक्तं श्रीचन्द्रशेखरम् ।
त्रातंदावाग्निसन्दग्धकिशोरकमुपास्महे ॥३६॥

चित्सुखेन्द्रं सुखेनैव क्रान्तसह्यगुहागृहम् ।
कामरूपचरं नानारूपवन्तमुपास्महे ॥३७॥

निर्दोषसंयमभरान् चित्सुखानन्दतापसान् ।
विद्याघनेन्द्रान् श्रीविद्यावशीकृतजनान् स्तुमः ॥३८॥

शङ्करेन्द्रयतीन्द्राणां पादुके ब्रह्मसंभृते ।
नमामि शिरसा याभ्यां त्रीन् लोकान् व्यचरन्मुनिः ॥३९॥

सच्चिद्विलासयोगीन्द्रं महादेवेन्द्रमुज्ज्वलम् ।
गङ्गाधरेन्द्रमप्येतान् नौमि वादिशिरोमणीन् ॥४०॥

ब्रह्मानन्दघनेन्द्राख्यांस्तथानन्दघनानपि ।
पूर्णबोधमहर्षींश्च ब्रह्मनिष्ठानुपास्महे ॥४१॥

वृत्याजगर्या श्रीशैलगुहागृहकृतस्थितीन् ।
श्रीमत्परमशिवाख्यान् सर्वातीतान् श्रये हृदा ॥४२॥

अन्योन्यसदृशान्योन्यौ बोधश्रीचन्द्रशेखरौ ।
प्रणवोपासनासक्तमानसौ मनसा श्रये ॥४३॥

मुक्तिलिङ्गार्चनानन्दविस्मृताशेषवृत्तये ।
चिदम्बररहस्यान्तर्लीनदेहाय योगिने ॥४४॥

अद्वैतानन्दसाम्राज्यविद्रुताशेषपाप्मने ।
अद्वैतानन्दबोधाय नमो ब्रह्म समीयुषे ॥४५॥

श्रये महादेवचन्द्रशेखरेन्द्रमहामुनी ।
महाव्रतसमारब्धकोटिहोमान्तगामिनौ ॥४६॥

विद्यातीर्थसमाह्वानान् श्रीविद्यानाथयोगिनः ।
विद्यया शङ्करप्रख्यान् विद्यारण्यगुरून् भजे ॥४७॥

सच्चिद्घनेन्द्रानद्वैतब्रह्मानन्दमुनीनपि ।
सान्द्रानन्दयतीन्द्रांश्च तथाप्यद्वैतशेवधीन् ॥४८॥



महादेवशिवाद्वैतसुखानन्दयतीश्वरौ ।
मनसा भावये नित्यं महासंयमचारिणौ ॥४९॥

वीक्षणात्सर्वभूतानां विपव्याधिनिवर्हणम् ।
शिवयोगीश्वरं साक्षात् चिन्तयामि सदा मुदा ॥५०॥

प्रत्यग्ज्योतिःप्रकाशेन्द्रान् प्रत्यग्ज्योतिरुपासिनः ।
न्यक्कृताशेषदुस्तर्ककार्कश्यान् सततं स्तुमः ॥५१॥

शङ्करानन्दयोगीन्द्रपदपङ्कजगोयुगम् ।
बुक्कभूपशिरोरत्नं स्मरामि सततं हृदा ॥५२॥

श्रीपूर्णानन्दमौनीन्द्रं नेपालनृपदेशिकम् ।
अव्याहतस्वसञ्चारं संश्रयामि जगद्गुरुम् ॥५३॥

महादेवश्च तच्छिष्यश्चन्द्रशेखरयोग्यपि ।
स्तां मे हृदि सदा धीरावद्वैतमतदेशिकौ ॥५४॥

सदाशिवश्रीब्रह्मेन्द्रधृतस्वपदपादुकान् ।
धीरान् परशिवेन्द्रार्यान् ध्यायामि सततं हृदि ॥५५॥

आत्मबोधयतीन्द्राणाम् आशीताचलचारिणाम् ।
अन्यश्रीशङ्कराचार्यधीकृतामंघ्रिमाश्रये ॥५६॥

प्रवीरसेतुभूपालसेविताङ्घ्रिसरोरुहान् ।
योगीन्द्रशङ्करेन्द्रार्यापरपर्यायभागिनः ॥५७॥

भगवन्नामसाम्राज्यलक्ष्मीसर्वस्वविग्रहान् ।
श्रीमद्बोधेन्द्रयोगीन्द्रदेशिकेन्द्रानुपास्महे ॥५८॥

अद्वैतात्मप्रकाशाय सर्वशास्त्रार्थवादिने ।
विधूतसर्वखेदाय नमो विश्वातिशायिने ॥५९॥

आसप्तमाज्जीर्णपर्णजलवातारुणांशुभिः ।
कृतस्वप्राणयात्राय महादेवाय सन्नतिः ॥६०॥

चोलकेरलचेरौड्रपाण्ड्यकर्णाटकोङ्कणान् ।
महाराष्ट्रान्ध्रसौराष्ट्रमगधादींश्च भूभुजः ॥६१॥

शिष्यानासेतुशीताद्रि शासते पुण्यकर्मणे ।
श्रीचन्द्रशेखरेन्द्राय जगतो गुरवे नमः ॥६२॥

निष्पापवृत्तये नित्यनिर्धूतभवक्लृप्तये ।
महादेवाय सततं नमोऽस्तु नतरक्षिणे ॥६३॥
श्रीविद्योपासनादार्ढ्यवशीकृतचराचरान् ।
श्रीचन्द्रशेखरेन्द्रार्यान् शङ्करप्रतिमान्नुमः ॥६४॥
श्रीकाञ्चीशारदापीठसंस्थितानामिमां क्रमात् ।
स्तुतिं जगद्गुरूणां यः पठेत्स सुखभाग्भवेत् ॥६५॥

इति श्रीपरमहंसपरिव्राजकाचार्यवर्यश्रीमच्छङ्करभगवत्पादश्रीमज्जगद्गुरु-
श्रीकामकोटिपीठाधिपश्रीसुदर्शनेन्द्रापरपर्यायश्रीमहादेवेन्द्रसरस्वती-
कृतौ श्रीकाञ्चीशारदामठजगद्गुरुपरंपरास्तोत्रं संपूर्णम् ॥

---

# ॥ अथ जगद्गुरुपरम्परानाममाला ॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ॥१॥
गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥२॥
विष्णुर्विधिर्वसिष्ठश्च शक्तिः प्राज्ञपराशरः ।
व्यासश्शुको गौडपदः श्रीगोविन्दयतीश्वरः ॥३॥
श्रीशङ्कराचार्यवर्यश्चाद्वैतगुरवः स्मृताः ।
कार्या नमस्याचार्याणां पूर्वेषां प्रथमं बुधैः ॥४॥
श्रीशङ्कराचार्यशिष्याश्चत्वारः समुदीरिताः ।
सुरेश्वरः पद्मपादो हस्तामलकतोटकौ ॥५॥
सुरेश्वराचार्ययतीन्द्रशिष्यनामावलीमत्रलिखामि भक्त्या ।
यत्कीर्तनाद्यान्त्यचिरेण दोषाश्शरीरिणां जन्मसहस्रजुष्टाः ॥६॥
सेन्द्रासरस्वतीत्याख्या नाम्नामन्ते निवेश्यते ।
श्रीशङ्कराचार्यवर्यसम्प्रदायानुगामिनाम् ॥७॥
सर्वज्ञसत्यबोधश्च ज्ञानानन्दमुनीश्वरः ।
शुद्धानन्दस्तथानन्दज्ञानकैवल्ययोगिनौ ॥८॥



श्रीकृपाशङ्करार्यश्च महेश्वरसुरेश्वरः ।
श्रीचिद्घनश्चन्द्रचूडयतिः सच्चिद्घनोऽपि च ॥९॥
विद्याघनयतिश्रेष्ठो गङ्गाधरमहायती ।
सदाशिवसुरेन्द्रौ च विद्याघनयतीश्वरः ॥१०॥
श्रीशङ्करश्चन्द्रचूडः श्रीपरीपूर्णबोधकः ।
सच्चित्सुखश्चित्सुखश्च सच्चिदानन्दसद्घनः ॥११॥
प्रज्ञाघनश्चिद्विलासः श्रीमहादेव एव च ।
पूर्णबोधश्च बोधेन्द्रो ब्रह्मानन्दघनोऽपि च ॥१२॥
चिदानन्दघनस्सच्चिदानन्दश्चन्द्रशेखरः ।
चित्सुखश्चित्सुखानन्दो विद्याघनसुशङ्करौ ॥१३॥
सच्चिद्विलासोऽपि महादेवगङ्गाधरावपि ।
ब्रह्मानन्दघनानन्दघनौ मस्करिणां वरौ ॥१४॥
पूर्णबोधः परशिवो बोधश्श्रीचन्द्रशेखरः ।
अद्वैतानन्दबोधश्च महादेवश्च मस्करी ॥१५॥
चन्द्रशेखरयोगीन्द्रो विद्यानाथयतिर्महान् ।
सच्चिद्घनः पराद्वैतब्रह्मानन्दयतीश्वरः ॥१६॥
सान्द्रानन्दयतीन्द्रश्च पश्चादद्वैतशेवधिः ।
महादेवशिवाद्वैतसुखानन्दयतीश्वरौ ॥१७॥
शिवयोगी तथा प्रौढः प्रत्यग्ज्योतिःप्रकाशकः ।
इमे ह्यष्टस्मृताश्शिष्याः श्रीविद्यातीर्थयोगिनः ॥१८॥
शङ्करानन्दयोगीन्द्रः पूर्णानन्दस्तथैव च ।
महादेवश्च तच्छिष्यः चन्द्रशेखर एव च ॥१९॥
बोधः परशिवेन्द्रार्यः आत्मबोधस्ततः परम् ।
योगीचात्मप्रकाशश्च महादेवस्तथैव च ॥२०॥
चन्द्रशेखरयोगी च महादेवयतीश्वरः ।
श्रीचन्द्रशेखरश्चेति नामान्युक्तान्यनुक्रमात् ॥२१॥
जगद्गुरूणां पूर्वेषां नामान्येतान्यनुक्रमात् ।
यः पठेत् ज्ञानवैराग्ययोगान्मुक्तिं स विन्दति ॥२२॥

॥ इति गुरुपरम्परानाममाला सम्पूर्णा ॥

## श्रीसर्वज्ञसदाशिवब्रह्मेन्द्राः ॥

एषाञ्च नामधामभूमादि यद्यप्यध्यवसितुमुच्चावचमुदीर्यमाणतया न शक्यमेव तथाप्यमी कदा क्वाऽऽसन्निति निर्णेतुमस्तीव कश्चिदुपायः स यथा विस्तरेण ॥ इमे च ब्रह्मेन्द्राः श्रीमत्परमहंसाद्यनेकबिरुदभाजनश्रीजगद्गुरुश्रीकाञ्चीकामकोटिपीठाधिपपरंपरायां सप्तपञ्चाशदाचार्यश्रीपरमशिवेन्द्रार्यपादान्तेवासिनस्तदीयपादुकामतिचिरमात्मनश्शिरसि वहन्त एव नवसालतञ्जोरत्रिशिरःपुररत्नगिरिगर्भपुराद्युपशल्यकेषु विहरन्त आबाल्यमत्याश्रमिण एवासन्निति तदीयप्रबन्धैरेव ज्ञायते तद्यथा आत्मविद्याविलासे ॥ 'निरवधिसंसृतिनीरधिनिपतितजनतारणस्फुरन्नौकाम् । परमतभेदनकुठिकां परमशिवेन्द्रार्यपादुकां वन्दे ॥' देशिकपरमशिवेन्द्रादेशवशाद् बुद्धदिव्यमूर्तिमहम् । स्वात्मनि विश्रान्तिकृते सरसं प्रस्तौमि किञ्चिदिदम् ॥' श्रीसुदर्शनमहादेवेन्द्रसरस्वतीविरचितश्रीकाञ्चीशारदामठीयजगद्गुरुपरंपरास्तोत्रेऽपि 'सदाशिवश्रीब्रह्मेन्द्रधृतस्वपदपादुकान् । धीरान् परमशिवेन्द्रार्यान् ध्यायामि सततं हृदि ॥' गुरुरत्नमालिकायामपि 'हृदये स पदं सदा विधत्तां सदयो मे प्रणुदन् प्रमादवत्ताम् । निगमान्तगुरुः परशिवात्मा सुगमस्साधुततेर्यमी महात्मा ॥ यदुदीक्षणलेशतो जनानां विदुरद्वैतगतिं द्वितां धुनानाम् । तमहं परमाञ्चितं शिवेन्द्रं शमवन्तं शरणं श्रये यमीन्द्रम् ॥' इत्यादिना ॥ किं च श्रूयतेऽमी सहैवात्मबोधापरनाम्ना विश्वाधिकेन्द्रसरस्वत्या गुरोस्सविधे सूतभाष्यशान्तिमारचयन्तस्तदभ्यर्थनयैव सुचिरमध्युषितश्रीगुरुपरिसराः परमशिवेन्द्रार्यैरपि पीठमधिरुरोपयिषिताः कदाचन शिवार्चायां विनियुक्ताः शिवमानसिकपूजासपर्यापर्यागतत्वाम्नायामेव पूजामपदिश्य निर्दिश्य चात्मनो नैष्कर्म्यसिद्धिमात्मविद्याविलासेन समुपदिश्य च ब्रह्मविद्यामात्मबोधाय बोधार्यप्रकरणेन परममुष्य प्रार्थनया प्रणीय गुरुरत्नमालिकां प्रदाय श्रीमठीयेभ्यः प्रगृह्य पादुकां गुरोरपसस्रुराचार्यपादपरिसरादविदितमेवेति ॥ प्रकटितञ्चामीभिरेव प्रार्थनयाऽऽत्मबोधस्य प्रणयनं गुरुरत्नमालिकायास्तस्यामेवान्ति-



मेन पद्येन तद्यथा—'इति नामनयाऽऽत्मबोधनाम्नो यतिराजस्य सदाशिवेन्द्रभूम्ना । कलिता प्रयताद्वसन्तमालापडशीत्या गुरुराजरत्नमाला ॥' इति ॥' स्पष्टमिदमखिलमात्मनिर्वेदात्तत्त्वाद्वैतरसमञ्जरीस्तवाभ्यामस्यैव कृतिभ्यामित्यलमधिकेन ॥

अमीषां गुरवः परमशिवेन्द्रार्याश्च कलितसेतुयात्राः प्रतिनिवर्तनावसरे तत इतः कलितपुण्यस्थलाटनाः प्रतिश्वेतारण्यमायुरैश्वरं पदमिति तदधिष्ठानादिदानीमप्यधिगम्यते ॥ एषाञ्च सिद्धिकालः शाल्यब्दः १९०८ इति पुण्यश्लोकमञ्जरीपद्यैरधिगम्यते तद्यथा—पंपासरस्तटभुवः परमेश्वरस्य पुत्रस्सदाशिवरतश्शिवरामकृष्णः । तस्मादवाप्य नियमं नियमी निरस्तसङ्गोऽध्युवास सदनं खलु कामनेत्र्याः ॥ श्रीचक्रपूजनरतश्शिवयोगलम्बी श्रीदेशिकेन्द्रवचसा श्रितकामपीठः । आचार्यकं छाविसमं विदधावकामः कामेश्वरीमनुपुरश्चरणैकदक्षः ॥ सपार्थिवे पार्थिवदेहदूरं नभोनभस्यच्छतमेऽच्छपक्षे । अवापदापद्विधुरो दशम्यां दशाम्यसौ दूनशके शकाब्दे ॥' इति ॥ एषाञ्च गुरवः सदाशिवेन्द्रार्याः परमगुरवः चन्द्रचूडेन्द्राः परापरगुरवश्च श्रीमहादेवेन्द्राः तेषाञ्च विजयनगराधीशदत्ततत्ताम्रशासनवैखर्या निर्णीयत एव कालः तत्र प्रथमं पूर्णानन्दसदाशिवेन्द्रसरस्वतीशिष्यश्रीमहादेवेन्द्रसरस्वतीस्वामिने विजयनगरभूपालश्रीनृसिंहरायक्षितिपतिदत्तं कुडियांतण्डलग्रामशासनं यथा—(क)

---

॥ श्रीगणाधिपतयेनमः ॥

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥
हरेर्लीलावराहस्य दंष्ट्रादण्डस्स पातु वः ।
हेमाद्रिकलशा यत्र धात्री छत्रश्रियं दधौ ॥
कल्याणायास्तु तद्धाम प्रत्यूहतिमिरापहम् ।
यद्गजोऽप्यगजोद्भूतं हरिणाऽपि च पूज्यते ॥
अस्ति क्षीरमयाद्देवैर्मथ्यमानान्महाम्बुधेः ।
नवनीतमिवोद्भूतमपनीततमो महः ॥

तस्यासीत्तनयस्तपोभिरतुलैरन्वर्थनामा बुधः
पुत्रैरस्य पुरूरवा भुजबलैरायुर्दिवं निर्जितः ।
तस्यायुर्नहुषोऽस्य तस्य परमो युद्धे ययातिः क्षितौ
ख्यातस्तस्य तु तुर्वसुर्वसुनिभः श्रीदेवयानीपतेः ॥
तद्वंशे देवकीजानिर्दिदीपे तिम्मभूपतिः ।
यथाख्यौ तुलुवेन्द्रेषु यदोः कृष्ण इवान्वये ॥
ततोऽभूद्बुक्कमाजानिरीश्वरक्षितिपालकः ।
अभासमगुणश्रेणी मौलिरत्नं महीभुजाम् ॥
तस्मादुद्भूत्तस्मान्नरसावनिपालकः ।
देवकीनन्दनः कामो देवकीनन्दनादिव ॥
विविधसुकृतोद्दामे रामेश्वरप्रमुखे मुहु-
र्मुदितहृदयः स्थाने स्थाने व्यधत्त यथाविधि ।
बुधपरिवृते नानादानानि यो भुवि षोडश-
त्रिभुवनजनोद्गीतं स्फीतं यशः पुनरुक्तयन् ॥
कावेरीमाशु बद्ध्वा बहुलजलभरां यो विलङ्घ्यैव शत्रून्
जीवग्राहं गृहीत्वा प्रधिनभुजबलात्तं च राज्यं तदीयम् ।
[illegible] शा नामे
[illegible] न्नृपनानापराधः ॥
[illegible] मानभूपं
वीर्योदग्रं तुरुष्कं गजपतिनृपतिं चापि जित्वा तदन्यान् ।
आगङ्गातीरभूमिप्रथमधरमपूर्वतटान्तं नितान्तम् ।
ख्यातक्षोणीपतीनां स्रजमिव शिरसां शासनं यो व्यतानीत् ॥
तिप्पाजीनागलादेव्योः कौसल्याश्रीसुमित्रयोः ।
देव्योरिव नृसिंहेन्द्रात्तस्मात् पङ्क्तिरथादिव ॥
वीरौ विनयिनौ रामलक्ष्मणाविव नन्दनौ ।
जातौ वीरनृसिंहेन्द्रकृष्णरायमहीपतौ ॥
वीरश्रीनारसिंहः स विजयनगरे रत्नसिंहासनस्थः
कीर्त्या नीत्या निरस्यन् नृगनलनहुषानप्यनन्यामधन्यान् ।
आसेतोरासुमेरोरवनिसुरगुतः स्वैरमानोदयाद्रे-
रापाश्चात्याचलान्तादखिलहृदयमावर्ज्य राज्यं शशास ॥
नानादानान्यकार्षीत् कनकसदसि यः श्रीविरूपाक्षदेव-
स्थाने श्रीकालहस्तीशितुरपि नगरे वेङ्कटाद्रौ च काञ्च्याम् ।
श्रीशैले शोणशैले महति हरिहरेऽहोबिले सङ्गमे च
श्रीरङ्गे कुम्भघोणे हततमसि महानन्दितीर्थे निवृत्तौ ॥



गोकर्णे रामसेतौ जगति तदितरेष्वप्यशेषेषु पुण्य-
स्थानेष्वारब्ध नानाविधबहुलमहादानवारिप्रवाहैः ।
यस्योदञ्चतुरङ्गप्रकरखुररजःशुष्यदम्भोधिमग्न-
क्ष्माभृत्पक्षच्छिदोद्यत्करकुलिशधरोत्कण्ठिता कुण्ठिताऽभूत् ॥
ब्रह्माण्डं विश्वचक्रं घटमुदितमहाभूतकं रत्नधेनुं
सप्ताम्भोधीन् (चकल्पक्षितिरुहलतिके काञ्चनीं कामधेनुं
स्वर्णक्ष्मायो) हिरण्याश्वरथमपि तुलापूरुषं गोसहस्रम् ।
हेमाश्वं हेमगर्भं कनककरिरथं पञ्चलाङ्गल्यतानी-
द्धर्मैकस्वान्तवृत्तिः शितनृपतिशरैरात्तकीर्तिप्रतापः ॥
राजाधिराज इत्युक्तः यो राजपरमेश्वरः ।
मूरुरायरगण्डश्च वीररायभयङ्करः ॥
हिन्दुरायसुरत्राणो दुष्टशार्दूलमर्दनः ।
वीरप्रतापइत्यादिविशेषैरुचितैर्युतः ॥
वीरदेवमहाराय जय जीवेति वादिभिः ।
अङ्गवङ्गकलिङ्गाद्यैः राजभिस्सेव्यते च यः ॥
विजयनगरमध्ये रत्नसिंहासनस्थः
स जयति भुवि वीरः श्रीनृसिंहक्षितीन्द्रः ।
नृगनहुषययातीनत्ययन् भूसुराणां
सुरतरुरिव धीरः पुण्यकीर्तिप्रतापः ॥
शकाब्दे शालिवाहस्य सहस्रेण चतुःशतैः ।
एकोनत्रिंशतागण्ये (१४२९) शुक्रनामनि वत्सरे ॥
विख्याते मासि माघाख्ये पुण्यकाले महोदये ।
तुङ्गभद्रानदीतीरे श्रीविरूपाक्षसंनिधौ ॥
(श्रीमत्) पर(म)हंसपरिव्राजकाचार्याय मुमुक्षवे ।
भस्मोद्धूलितगात्राय रुद्राक्षावलिधारिणे ॥
शीतोष्णादिद्वन्द्वदुःखव्यतीताय महात्मने ।
समस्तशास्त्रकोशार्थपारगाय तपस्विने ॥
अष्टाङ्गयोगयुक्ताय दयाशीलाय धीमते ।
सदाशिवसरस्वत्यादिशिष्यायामिततेजसे ॥
महादेवसरस्वत्यै गुरवे शिवरूपिणे ।
मण्डले जयनोलस्य पडवीडुसुराज्यके ॥
काञ्चीनाडुसमायुक्तं वलकानूरसीमनि ।
... ... कालिगूरी कोऽसमन्वितम् ॥
कलकादूरु ग्रामात् दक्षिणस्यां दिशि स्थितम् ।
... ... महाग्रामात् प्रतीच्यां दिशमाश्रितम् ॥

शिसलप्पाकसुग्रामात् उत्तरस्यां दिशि स्थितम् ।
... गुनन्तागलाग्रामात् पूर्वां दिशमुपाश्रितम् ॥
नालिकेराम्रपनसतालहिन्तालशोभितम् ।
सर्वसस्यसमृद्ध्या च राजमान्यं शुभान्वितम् ॥
कुडियान्तण्डलाख्यानं ग्रामरत्नं प्रदत्तवान् ।
इदमहितनृपाणां मौलिराजत्किरीट-
स्फुरितमणिगणानां क्रान्तिनीराजितांघ्रिः ।
अलिखदनघपद्यैश्शासनं ताम्रपत्रं
जयतु भुवनसीम्नि श्रीनृसिंहक्षितीन्द्रः ॥
मल्लणाचारिपुत्रेण वीरणाचारिसंज्ञिना ।
लिखितं लाप्लविदितं तदिदं ताम्रशासनम् ॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् ।
दानात् स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥

श्रीविश्वरूपाक्ष-
(इत्यान्ध्र्यामस्ति)

तथैव तेनैव तस्माएव दत्तएलिच्चुविग्रामताम्रशासनएकदेशो यथा--- ख

.............. ..............(?)........
वीरदेवमहाराय जयजीवेति वादिभिः ।
अङ्गवङ्गकलिङ्गाद्यैः राजभिस्सेव्यते च यः ॥
विजयनगरमध्ये रत्नसिंहासनस्थः
जयति भुवनवीरः श्रीनृसिंहाक्षितीन्द्रः ।
नृगनहुषययातीनत्ययम् भूसुराणां
सुरतरुरिव धीरः पुण्यकीर्तिप्रतापः ॥
शकाब्दे शालिवाहस्य सहस्रेण चतुश्शतैः ।
एकोनत्रिंशता गण्ये शुक्लनामनि वत्सरे ॥
विख्याते मासि माघाख्ये पुण्यकाले महोदये ।
तुङ्गभद्रानदीतीरे (श्री)विश्वरूपाक्षसन्निधौ ॥
श्रीमत्परमहंसपरिव्राजकाचार्याय मुमुक्षवे ।
भस्मोद्धूलितगात्राय रुद्राक्षावलिधारिणे ॥
शीतोष्णादिद्वन्द्वदुःखव्यतीताय महात्मने ।
समस्तशास्त्रकोशार्थपारगाय तपस्विने ।
अष्टाङ्गयोगयुक्ताय दयाशीलाय धीमते ॥
सदाशिवसरस्वत्याश्शिष्यायामिततेजसे ।
महादेवसरस्वत्यै गुरवे शिवरूपिणे ॥



मण्डले जयचोलस्य चन्द्रगिर्याख्यराजके ।
चेङ्गाडुकोष्ठसंयुक्तं चङ्गलीपट्टुसीमनि ॥
निव्वलूरुपत्तनायुक्तं सर्वसस्यविराजितम् ।
पनयूरुमहाग्रामात् प्राचीं दिशमुपाश्रितम् ॥
वडक्कैपक्कनुग्रामात् प्रतीचीं दिशमाश्रितम् ।
उरणूरुमहाग्रामात् दक्षिणस्यां दिशि स्थितम् ॥
पट्टुनाममहाग्रामात् उदीचीं दिशमाश्रितम् ।
एलिच्चुवीतिविख्यातं ग्रामरत्नं प्रदत्तवान् ॥
एतद्ग्रामीणराज्यादिनाडुवन्तुसमन्वितम् ।
........महाग्रामाद्दक्षिणां दिशमाश्रितम् ।
तोल्लावूरुवरग्रामादुदीच्यां दिशि संस्थितम् ॥
वारणावाशिसुग्रामात् प्राच्यां दिशि समाश्रितम् ।
पनयूर्नामसुग्रामात् पश्चिमां दिशमाश्रितम् ॥
वेणुपाक्कपुरग्रामात् सर्वसस्यसमृद्धिदम् ।
सौष्ठवं प्रणमग्रामं ग्रामचिन्तामणिं शुभम् ॥
दत्तवान् विनयानम्रः धर्मशीलः प्रतापवान् ।
इदमहितनृपाणां मौलिराजत्किरीट-
स्फुरितमणिगणानां कान्तिनीराजितांघ्रिः ।
विदधदनघपद्यैः शासनं ताम्रपत्रं
जयतु भुवनसीम्नि श्रीनृसिंहक्षितीन्द्रः ॥
मल्लणाचारिपुत्रेण वीरणाचारिसंज्ञिना ।
लिखितं लाप्लविदितं तदिदं ताम्रशासनम् ॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् ।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥

श्रीविरूपाक्ष
(इत्यान्ध्र्यामस्ति)

द्वितीयं महादेवेन्द्रसरस्वतीशिष्यचन्द्रचूडेन्द्रसरस्वत्यै विजयनगराधीश श्रीकृष्णारायक्षितीन्द्रदत्तं कृष्णरायपुरताम्रशासनं यथा--- (ग).

श्रीगणाधिपतये नमः ।
नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥
हरेर्लीलावराहस्य दंष्ट्रादण्डस्स पातु वः ।
हेमाद्रिकलशा यत्र धात्री च्छत्रश्रियं दधौ ॥

कल्याणायास्तु तद्धाम प्रत्यूहतिमिरापहम् ।
यद्गजोप्यगजोद्भूतं हरिणाऽपि च पूज्यते ॥
अस्ति क्षीरमयाद्देवैर्मथ्यमानान्महाम्बुधेः ।
नवनीतमिवोद्भूतमपनीततमोमहः ॥
तस्यासीत्तनयस्तपोभिरतुलैरन्वर्थनामा बुधः
पुण्यैरस्य पुरूरवा भुजबलैरायुर्द्विषां निघ्नतः ।
तस्यायुर्नहुषोऽस्य तस्य पुरुषो युद्धे ययातिः क्षितौ
ख्यातस्तस्य तु तुर्वसुर्वसुनिभः श्रीदेवयानीपतेः ॥
तद्वंशे देवकीजानिर्दिदीपे तिम्मभूपतिः ।
यशस्वी तुलुवेन्द्रेषु यदोः कृष्ण इवान्वये ॥
ततोऽभूद्बुक्कमाजानिरीश्वरक्षितिपालकः ।
भत्रासमगुणभ्रंशं मौलिरत्नं महीभुजाम् ॥
सरसादुदभूत्तस्मात् नरसावनिपालकः ।
देवकीनन्दनः कामो देवकीनन्दनादिव ॥
कावेरीमाशु बद्ध्वा बहुलजलरयां यो विलङ्घ्यैव शत्रुं
जीवग्राहं गृहीत्वा समिति भुजबलात्तच्च राज्यं तदीयम् ।
कृत्वा श्रीरङ्गपूर्वं तदपि निजवशे पट्टणं यो बभासे
कीर्तिस्तम्भं निखाय त्रिभुवनभवनस्तूयमानापदानः ॥
चेरं चोलञ्च पाण्ड्यं तमपि च मधुरावल्लभं मानभूषं
वीर्योदग्रं तुरुष्कं गजपतिनृपतिञ्चापि जित्वा तदन्यान् ।
आगङ्गातीरलङ्काप्रथमचरमभूभृत्तटान्तं नितान्तं
ख्यातक्षोणीपतीनां स्रजमिव शिरसां शासनं यो व्यतानीत् ॥
विविधसुकृतोद्दामे रामेश्वरप्रमुखे मुहु-
र्मुदितहृदयः स्थाने स्थाने व्यधत्त यथाविधि ।
बुधपरिवृतो नानादानानि यो भुवि षोडश
त्रिभुवनजनोद्गीतः स्फीतं यशः पुनरुक्तयन् ॥
तिप्पाजीनागलादेव्योः कौसल्याश्रीसुमित्रयोः ।
देव्योरिव नृसिंहेन्द्रात् तस्मात् पङ्क्तिरथादिव ॥
वीरौ विनयिनौ रामलक्ष्मणाविव नन्दनौ ।
जातौ वीरनृसिंहेन्द्रकृष्णरायमहीपतौ ॥
वीरश्रीनारसिंहः स विजयनगरे रत्नसिंहासनस्थः
कीर्त्या नीत्या निरस्यन् नृगनलनहुषानप्यवन्यामधन्यान् ।
आ सेतोरा सुमेरोरवनिसुरनुतः स्वैरमा चोदयाद्रे-
रा पाश्चात्याचलान्तादखिलहृदयामावर्ज्य राज्यं शशास ॥



नानादानान्यकार्षीत् कनकसदसि यः श्रीविरूपाक्षदेव-
स्थाने श्रीकालहस्तीशितुरपि नगरे वेङ्कटाद्रौ च काञ्च्याम् ।
श्रीशैले शोणशैले महति हरिहरेऽहोबले सङ्गमे च
श्रीरङ्गे कुम्भघोणे हततमसि महानन्दितीर्थे निवृत्तौ ॥
गोकर्णे रामसेतौ जगति तदितरेष्वप्यशेषेषु पुण्य-
स्थानेष्वालब्धनानाविधबहुलमहादानवारिप्रवाहैः ।
यस्योदश्चत्तुरङ्गप्रकरखुररजश्शुष्यदम्भोधिमग्न-
क्ष्माभृत्पक्षाच्छिदोद्यत्करकुलिशधरोत्कण्ठिता कुण्ठनाऽभूत् ॥
ब्रह्माण्डादींश्च चक्रं घटमुदितमहाभूतकं रत्नधेनुं
सप्ताम्भोधींश्च कल्पक्षितिरुहलतिके काञ्चनीं कामधेनुम् ।
स्वर्णक्ष्मायोहिरण्याश्वरथमपि तुलापूरुषं गोसहस्रं
हेमाश्वं हेमगर्भं कनककरिरथं पञ्चलाङ्गल्यतानीत् ॥
प्राज्यं प्रशास्य निर्विघ्नं राज्यं द्यामिव शासितुम् ।
तस्मिन् गुणेन विख्याते क्षितेरिन्द्रे दिवं गते ॥
ततोऽप्यवार्यवीरश्रीकृष्णरायमहीपतिः ।
बिभर्ति मणिकेयूरनिर्विशेषं महीं भुजे ॥
कीर्त्या यस्य समन्ततः प्रसृतया विश्वं [illegible] भजे-
दित्याशङ्क्य पुरा पुरारिरभवत् फालेक्षणः प्रायशः ।
पद्माक्षोऽपि चतुर्भुजोऽजनि चतुर्वक्त्रोऽभवत्पद्मभूः
काली खड्गमधात् रमा च कमलं वीणाञ्च वाणी करे ॥
शत्रूणां वासमेते ददत इति रुषा किं नु सप्ताम्बुराशीन्
नानासेनातुरङ्गत्रुटितवसुमतीधूलिका(पालि)वल्लिकाभिः ।
संशोष्य स्वैरमेतत् प्रतिनिधिजलधिश्रेणिका यो विधत्ते
ब्रह्माण्डस्वर्णमेरुप्रमुखनिजमहादानतोयैरमेयैः ॥
महत्तामर्थिसार्थाः श्रियमिह सुचिरं भुञ्जतामित्यवेत्य
प्रायः प्रत्यूहहेतोस्तपनगगनेराऽऽलयं देवतानाम् ।
तत्तद्दिग्जैत्रवृत्त्यापि च विरुदपदैरङ्कितांस्तत्रतत्र
स्तम्भान् जातप्रतिष्ठान् व्यतनुत भुवि यो भूभृदभ्रङ्कषाग्रान् ॥
काञ्चीश्रीशैलशोणाचलकनकसभावेङ्कटाद्रीन्द्रमुख्ये-
ष्वावर्त्यावर्त्य सर्वेष्वतनुत विधिवत् भूयसे श्रेयसे यः ।
देवस्थानेषु तीर्थेष्वपि कनकतुलापूरुषादीनि नाना-
दानान्ययोपदानैरपि सममखिलैरागमोक्तानि तानि ॥
रोपकृतप्रतिपार्थिवदण्डः शेषभुजः क्षितिरक्षणशौण्डः ।
भाषिततप्पुवरायरगण्डः तोषकृदाधिषु यो रणचण्डः ॥

राजाधिराजइत्युक्तो यो राजपरमेश्वरः ।
मूरुरायरगण्डश्च परराथभयङ्करः ॥
हिन्दुरायसुरत्राणो दुष्टशार्दूलमर्दनः ।
वीरप्रतापइत्यादिविरुदैरुचितैर्युतः ॥
आलोकय महाराय जय जीवेति वादिभिः ।
अङ्गवङ्गकलिङ्गाद्यैराजभिः सेव्यते च यः ॥
स्तुत्यौदार्यस्सुधीभिस्स विजयनगरे रत्नसिंहासनस्थः
क्ष्मापालान् कृष्णरायक्षितिपतिरधरीकृत्य नीत्या नृगादीन् ।
आपूर्वाद्रेरथास्तक्षितिधरकटकाद्रा च हेमाचलान्तात्
आसेतोरर्थिसार्थश्रियमिह बहुलीकृत्य कीर्त्या समिन्धे ॥
शालीवाहननिर्णीते शकाब्दे गणिते क्रमात् ।
सहस्रेण चतुश्चत्वारिंशता च चतुश्शतैः (१४४४) ॥
स्वभानुवत्सरे मासि मार्गशीर्षकनामनि ।
कृष्णावेणीतटे शुद्धगोद्वादश्यां महातिथौ ॥
महादेवसरस्वत्याश्शिष्याय शिवचेतसे ।
व्याख्याताखिलशास्त्राय विख्याताय महात्मने ॥
काञ्चीपुरनिवासाय मायावादाम्बुधीयवे ? ।
चन्द्रचूडसरस्वत्यै यतिराजाय धीमते ॥
चन्द्रगिर्याख्यराज्यस्थं मूतुकावाख्यपत्तनम् ।
चेङ्गाडुकोटकांशस्थं निव्वलूरुनाडके स्थितम् ॥
चेङ्गाडे ग्रामकात् प्राच्यां कांचुरोस्यपि दक्षिणम् ।
ग्रामादकालिवेल्लूरुनामकादपि पश्चिमम् ॥
नेदमङ्गलकात् ग्रामात् उत्तरस्यां दिशि स्थितम् ।
कृष्णरायपुरश्चेति प्रतिनामसमाश्रितम् ॥
प्राक्तनीं पोडवूराख्यामाश्रितं ग्राममुत्तमम् ।
सर्वमान्यचतुस्सीमा संयुतञ्च समन्ततः ॥
निधिनिक्षेपपाषाणसिद्धसाध्यजलान्वितम् ।
अक्षिण्यागामिसंयुक्तमेकभोग्यं सभूरुहम् ॥
शिष्यप्रशिष्यैर्भोग्यञ्च क्रमादाचन्द्रतारकम् ।
दानस्याधमनस्यापि विक्रयस्यापि चोदितः ॥
परीतः प्रयतैः स्निग्धैः पुरोहितपुरोगमैः ।
विविधैर्विबुधैः श्रौतव्रतिकैरधिकैर्गिरा ॥
कृष्णदेवमहारायो माननीयो मनस्विनाम्
सहिरण्यपयोधारापूर्वकं दत्तवानिदम् ॥



एतत्सामिवराज्यादिनानाकोठसमन्वितम् । शिरुवाकमहाग्रामात् प्राच्यान्दिशि विराजितम् ॥
परूंदूरभिधात् ग्रामात् प्रतीचीन्दिशमाश्रितम् । कोट्टाकाङ्कयग्रामाद्दक्षिणस्यां दिशि स्थितम् ॥
शिरुवल्लूरुमुग्रामादुदीचीन्दिशमाश्रितम् । काट्टपट्टाभिधानञ्च ग्रामरत्नं प्रदत्तवान् ॥
तदिदमवनीवनीपकवितति धरायस्य कृष्णरायस्य ।
शासनमुरुकवित्वैभवनिवहानिदानस्य भूरिदानस्य ॥
कृष्णदेवमहारायशासनेन ... । बभाणमृदुसन्दर्भे तदिदं ताम्रशासनम् ॥
कृष्णदेवमहारायशासनान्मल्लणात्मजः । असौ श्रीवीरणाचार्यो ह्यलिखत् ताम्रशासनम् ॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् । दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥
स्वदत्तात् द्विगुणं पुण्यं परदत्तानुपालनम् । परदत्तापहारेण स्वदत्तं निष्फलं भवेत् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् । षष्टिर्वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
एकैवभगिनीलोके सर्वेषामेव भूभुजाम् । न भोज्या न करग्राह्या विप्रदत्ता वसुन्धरा ॥
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेतान् भाविनः पार्थिवेन्द्रान् भूयोभूयो याचते रामचन्द्रः ॥
श्रीविरूपाक्ष ( इत्यान्ध्रयामस्ति )

तृतीयञ्च चन्द्रचूडेन्द्रसरस्वतीशिष्यसदाशिवसरस्वत्यै श्रीकृष्णरायभूपतिदत्तमुदयंबाकंग्रामताम्रशासनम् — यथा — घ —

## ॥ श्रीगणाधिपतये नमः ॥

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे । त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥
हरेर्लीलावराहस्य दंष्ट्रादण्डस्स पातु वः । हेमाद्रिकलशा यत्र धात्रीच्छत्रश्रियं ददौ ॥
कल्याणायास्तु तद्धाम प्रत्यूहतिमिरापहम् । यद्गजोऽप्यगजोद्भूतं हरिणाऽपि च पूज्यते ॥
अस्ति क्षीरमयाद्देवैर्मथ्यमानात् महाम्बुधेः । नवनीतमिवोद्भूतमपनीततमोमहः ॥
तस्यासीत्तनयस्तपोभिरतुलैरन्वर्थनामा बुधः पुण्यैरस्य पुरूरवा भुजबलैरायुर्द्वियां निघ्नतः ।
तस्यायुर्नहुषोऽस्य तस्य परुषो युद्धे ययातिःक्षितौ ख्यातस्तस्य तु तुर्वसुर्वसुनिभः श्रीदेवयानीपतेः ॥
तद्वंशे देवकीजानिर्दिदीपे तिम्मभूपतिः । यशस्वी तुलुवेन्द्रेषु यदोः कृष्ण इवान्वये ॥
ततोऽभूदुबुक्कमाजानिरीश्वरक्षितिपालकः । अन्वासमगुणभ्रंशं मौलिरत्नं महीभुजाम् ॥
सरसादुद्भूतस्मान्नरसावनिपालकः । देवकीनन्दनः कामो देवकीनन्दनादिव ॥
विविधसुकृतोद्दामे रामेश्वरप्रमुखे मुहुर्मुदितहृदयः स्थाने स्थाने व्यधत्त यथाविधि ।
बुधपरिवृतो नानादानानि यो भुवि षोडश त्रिभुवनजनोद्गीतं स्फीतं यशः पुनरुक्तयन् ॥
कावेरीमाशु बध्वा बहुलजलभरां यो विलङ्घ्यैव शत्रून्
जीवग्राहं गृहीत्वा समिति भुजबलात्तञ्च राज्यं तदीयम् ।
कृत्वा श्रीरङ्गपूर्वं तदपि निजवशे पट्टणं यो बभासे
कीर्तिस्तम्भं निखाय त्रिभुवनभवनस्तूयमानापदानः ॥

चेरं चोलञ्च पाण्ड्यं तमपि च मधुरावल्लभं मानभूषं
वीर्योदग्रं तुरुष्कं गजपतिनृपतिं चापि जित्वा तदन्यान् ।
आगङ्गातीरलङ्काप्रथमचरमभूभृत्तटान्तं नितान्तं
ख्यातः क्षोणीपतीनां स्रजमिव शिरसां शासनं यो व्यतानीत् ॥
तिप्पाजीनागलादेव्योः कौसल्याश्रीसुमित्रयोः । देव्योरिव नृसिंहेन्द्रात् तस्मात् पङ्क्तिरथादिव ॥
वीरौ विनयिनौ रामलक्ष्मणाविव नन्दनौ । जातौ वीरनृसिंहेन्द्रकृष्णरायमहीपती ॥
वीरश्रीनारसिंहस्य विजयनगरे रत्नसिंहासनस्थः
कीर्त्या नीत्या निरस्यन्नृगनलनहुषानप्यवन्यामधन्यान् ।
आ सेतोरा सुमेरोरवनिसुरनुतः स्वैरमा चोदयाद्रे-
रापाश्चात्याचलान्तात् अखिलहृदयमावर्ज्य राज्यं शशास ॥
नानादानान्यकार्षीत् कनकसदसि यः श्रीविरूपाक्षदेव-
स्थाने श्रीकालहस्तीशितुरपि नगरे वेङ्कटाद्रौ च काञ्च्याम् ।
श्रीशैले शोणशैले महति हरिहरेऽहोबिले सङ्गमे च
श्रीरङ्गे कुम्भघोणे हततमसि महानन्दितीर्थे निवृत्तौ ॥
गोकर्णे रामसेतौ जगति तदितरेष्वप्यशेषेषु पुण्य-
स्थानेष्वालब्धनानाविधबहुलमहादानवारिप्रवाहैः ।
यस्योदञ्चत्तुरङ्गप्रकरखुररजश्शुष्यदम्भोधिमग्न-
क्ष्माभृत्पक्षच्छिदोद्यत्करकुलिशधरोत्कण्ठिता कुण्ठिताऽभूत् ॥
ब्रह्माण्डं विश्वचक्रं सममुदितमहाभूतकं रत्नधेनुं
सप्ताम्भोधीन् (श्च कल्पक्षितिरुहलतिके काञ्चनीं कामधेनुम्
स्वर्णक्ष्मायां) हिरण्याश्वरथमपि तुलापूरुषं गोसहस्रम् ।
हेमाश्वं हेमगर्भं कनककरिरथं पञ्चलाङ्गल्यतानी-
द्भूमैकस्वान्तवृत्तिः प्रतिनृपतिशतैरात्तकीर्तिप्रतापः ॥
प्राज्यं प्रशास्य निर्विघ्नं राज्यं यामिव शार्ङ्गिणम् । तस्मिन् गुणेन विख्याते क्षितीन्द्रे दिवं गते ॥
ततोऽप्यवार्यवीर्यश्रीकृष्णरायमहीपतिः । बिभर्ति मणिकेयूरनिर्विशेषं महीं भुजे ॥
कीर्त्या यस्य समन्ततः प्रसृतया विश्वं रुचैक्यं व्रजे-
दित्याशङ्क्य पुरा पुरारिरभवत्फालेक्षणः प्रायशः ।
पद्माक्षोऽपि चतुर्भुजोऽजनि चतुर्वक्त्रोऽभवत्पद्मभूः
काली खड्गमधादुमा च कमलं वीणाञ्च वाणी करे ॥
शत्रूणां वासमेते ददत इति रुषा किन्नु सप्ताम्बुराशीन्
नानासेनातुरङ्गत्रुटितवसुमतीधूलिकापालिकाभिः ।
संशोष्य स्वैरमेतत्प्रतिनिधिजलधिश्रेणिका यो विधत्ते
ब्रह्माण्डस्वर्णमेरुप्रमुखनिजमहादानतोयैरमेयैः ॥



महत्तामर्थिसार्थश्रियमिह सुचिरं भुञ्जतामित्यवेत्य
प्रायः प्रत्यूहहेतोस्तपनरथगतेरालय देवतानाम् ।
दत्तदिग्जैत्रतुल्याऽपि च विरुदपदैरङ्कितांस्तत्रतत्र
स्तम्भान् जातप्रतिष्ठान् व्यतनुत भुवि यो भूभृदभ्रङ्कषाग्रान् ॥
काञ्चीश्रीशैलशोणाचलकनकसभावेङ्कटाद्रीन्द्रमुख्ये-
ष्वावर्त्यावर्त्य सर्वेष्वतनुत विधिवत् भूयसे श्रेयसे यः ।
देवस्थानेषु तीर्थेष्वपि कनकतुलापूरुषादीनि नाना-
दानान्यन्येष्वशेषदानैरपि सममखिलैरागमोक्तानि तानि ॥
शेषकृतप्रतिपार्थिवदण्डः शेषभुजाकृतिरक्षणशौण्डः ।
भाषगतप्पुवरायरगण्डस्तोषकृदर्थिषु यो रणचण्डः ॥
राजाधिराज इत्युक्तो यो राजपरमेश्वरः । मूरुरायरगण्डश्च परगायभयङ्करः ॥
हिन्दुरायसुरत्राणो दुष्टशार्दूलमर्दनः । वीरप्रतापइत्यादिविरुदैरञ्चितैर्युतः ।
आलोकय महाराय जयजीवेति वादिभिः । अङ्गवङ्गकलिङ्गाद्यैर्गजाभिस्संव्यते च यः ॥
स्तुत्यौदार्यैस्सुधाभिस्स विजयनगरे रत्नसिंहासनस्थः
क्ष्मापालान् कृष्णरायक्षितिपतिरधरीकृत्य नीत्या नृगादीन् ।
आ पूर्वादेरथाहतक्षितिधरकटकादा च हेमाचलान्तात्
आ सेतोरर्थिसार्थश्रियमिह बहुलीकृत्य कीर्त्या समिन्धे ॥
शकाब्दे शालिवाहस्य सहस्रेण चतुश्शतैः । पञ्चाशता प्रसंख्याते विरोध्यब्दे विराजिते ॥
विख्याते मासि वैशाखे पूर्णिमायां महातिथौ । विशाखर्क्षसमायुक्ते दिनेशशुभवासरे ॥
परमहंसपरिव्राजकाचार्याय मुमुक्षवे । भस्मोद्धूलितगात्राय रुद्राक्षावलिधारिणे ॥
शीतोष्णादिद्वन्द्वदुःखातीताय च महात्मने । अष्टाङ्गयोगयुक्ताय दयाशीलाय धीमते ।
सर्वतन्त्रस्वतन्त्राय ज्ञानवैराग्यशालिने । चन्द्रचूडसरस्वत्याश्शिष्यायामिततेजसे ॥
सदाशिवसरस्वत्यै गुरवे शिवरूपिणे । पडवीडुमहाराज्ये जयचोलाख्यमण्डले ॥
तिरुकलेकुन्नचण्डारुवत्तनाचसमन्विते । कलत्तूरुकोट्टसंयुक्ते श्रीविलिमलेनाडके ॥
चेङ्गलिप्पट्टुसीमास्थे क्षीरनद्यास्तटे शुभे । प्रलयनूरिग्रामात् प्राचीं दिशमुपाश्रितम् ॥
......ग्रामात् प्रतीचीं दिशमाश्रितम् । मणप्पाकाभिधाद्ग्रामात् दक्षिणस्यां दिशि स्थितम् ॥
पुण्यपट्टुमहाग्रामादुत्तरस्यां दिशि स्थितम् । उदयंबाकनामानं सर्वसस्योपशोभितम् ॥
कृष्णरायपुरञ्चेति प्रतिनामसमन्वितम् । सर्वमान्यचतुस्सीमासंयुतञ्च समन्ततः ॥
निधिनिक्षेपपाषाणाद्यष्टभोग्यरथेतरैः । विविधैश्च फलैर्युक्तं सतटाकं सभूरुहम् ॥
आचन्द्रतारकं भोक्तुं दातुञ्चापि निजेच्छया । शिष्यैः प्रशिष्यैस्तच्छिष्यैः तच्छिष्यैस्तत उत्तरैः ॥
कृष्णदेवमहारायो माननीयो मनस्विनाम् । सहिरण्यपयोधारापूर्वकं दत्तवान्मुदा ॥
तदिदमवनीवनीपकविनुतधरायस्य कृष्णरायस्य । शासनमुरु कविवैभवनिवहानदानस्य भूरिदा-
कृष्णदेवमहारायशासनेन सभापतिः । बभाण मृदुसन्दर्भं तदिदं ताम्रशासनम् ॥ [नस्य ॥

कृष्णदेवमहारायशासनान्मल्लणात्मजः । स्वष्टा श्रीवीरणाचार्यो व्यलिखत्ताम्रशासनम् ॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् । दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥
स्वदत्तात् द्विगुणं पुण्यं परदत्तानुपालनम् । परदत्तापहारेण स्वदत्तं निष्फलं भवेत् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् । षष्टिर्वर्षसहस्राणि विष्ठायां जायते कृमिः ॥
एकैव भगिनी लोके सर्वेषामेव भूभुजाम् । न भोज्या न करग्राह्या विप्रदत्ता वसुन्धरा ॥

सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेतान् भाविनः पार्थिवेन्द्रान् भूयो भूयो याचते रामचन्द्रः ॥

**श्री विरूपाक्ष** ( इत्यान्ध्रभाषयास्ति )

इत्यमेभिरन्यैश्च कतिपयैः राजकीयलेखरूपैस्साधनैर्निर्धार्यते यदसौ परमशिवेन्द्रार्यस्समलङ्कार-कामकोटिपीठीं कल्यादि ४६४१ आरभ्य ४६८७ तमसंवत्सरं यावदिति तच्छिष्यश्चायं सदाशिवब्रह्मेन्द्रः प्रायेण कल्यादि ४६७५ तः आरभ्यास्तेत्यवसीयते । अपि चेमे समभवन् समाः परश्शतमिति तञ्जनगराधीशश्रीमदेकोजिसमनन्तरशाहजिमहाराजप्रार्थनाप्रत्युत्तरीभूतेन—"अशीमहि वयं भैक्षमाशावासोवसीमहि । शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥" इति तत्पद्यन ज्ञायते । एतत्कृताः प्रबन्धाः बोधार्या, गुरुरत्नमालिका, शिवमानसिकपूजा, सपर्यापर्यायस्तवः, आत्मविद्याविलासः, आत्मानिर्वेदस्तवः, अद्वैतरसमञ्जरी, योगपञ्चाशिका, ब्रह्मकीर्तनतरङ्गिणी नवमणिमालिका, नववर्णरत्नमाला, शिवयोगदीपिका, चेति द्वादशैवप्रबन्धाः ॥

## आत्मबोधेन्द्रशङ्करभगवत्पादाः—

गुरुरत्नमालिकास्तवव्याख्याकाराः इमे च श्रीशहजिराजपुरैकनिलयानां श्रीगोविन्दापरपर्यायाणां श्रीजगद्गुरुश्रीमदात्मप्रकाशेन्द्रसंयमीन्द्राणामन्तेवसन्तः एकषष्टितमाचार्यश्रीकाञ्चीकामकोटीपीठाधीश्वरश्रीमदन्ध्रमहादेवेन्द्रसरस्वतीमब्रह्मचारिणः श्रीधरवेङ्कटेशार्यादिप्रियसुहृदः इति तत्प्रबन्धैरेव ज्ञायते । तद्यथा—"आत्मप्रकाशेन्द्रयतीश्वराणामाराधकेनांघ्रियुगस्य नित्यम् । व्याख्याऽऽत्मबोधेन गुरुस्तवस्य वितन्यते विश्वविवेकहेतोः ॥" इति सुषुमायाम् ॥ पुण्यश्लोकमञ्जरीमकरन्देऽपि—"गोविन्दात्मप्रकाशाश्रमिपदकमलच्छायमासेव्य दीव्यत्तत्त्वालोकावधूतप्रसृमरतिमिरस्पष्टदृष्टाखिलार्थः । भक्तिस्फारादरश्रीधरकविकवितानन्दनिष्पन्दवृत्तिर्व्याख्यामाख्यत् स्वभिख्यां विमृशत मकरन्दाभिधामात्मबोधः ॥" इति ॥ एतेनायमनुकल्यादि ४८०५ संवत्सरमात्तसिद्धेराचार्यगोविन्दसद्गुरोरन्तेवासीति सुविद एवास्य समयः ॥ एतत्कृतयश्च पुण्यश्लोकमञ्जरीपरिशिष्ट-मकरन्द-सुषमा-भक्तिकल्पद्रुम-बोधसुधाकरचन्द्रिकाख्याः पञ्चैव समुपलभ्यन्ते—इति सर्वं शिवम् ॥

सज्जनचरणरेणुः
**ब्रह्मदेशं स्वामिनाथश्रौती**

श्रीरस्तु

# ॥ आत्मविद्याविलासः प्रारभ्यते ॥

वटतरुनिकटनिवासं पटतरविज्ञानमुद्रितकराब्जम् ।
कञ्चन देशिकमाद्यं कैवल्यानन्दकन्दलं वन्दे ॥ १ ॥
निरवधिसंसृतिनीराधिनिपतितजनतारणस्फुरन्नौकाम् ।
परमतभेदनकुठिकां परमशिवेन्द्रार्यपादुकां नौमि ॥ २ ॥
देशिकपरमशिवेन्द्रादेशवशात् बुद्धदिव्यमहिमाऽहम् ।
स्वात्मनि विश्रान्तिकृते सरसं प्रस्तौमि किञ्चिदिदम् ॥ ३ ॥
निरुपमनित्यनिरीहो निष्कलनिर्मायनिर्गुणाकारः ।
विगलितसर्वविकल्पश्शुद्धोबुद्धश्चकास्ति परमात्मा ॥ ४ ॥
स्वाविद्यैकनिबद्धः कुर्वन् कर्माणि मुह्यमानस्सन् ।
दैवाद्विधूतबन्धः स्वात्मज्ञानान्मुनिर्जयति ॥ ५ ॥
मायावशेन सुप्तो मध्ये पश्यन् सहस्रशः स्वप्नान् ।
देशिकवचःप्रबुद्धो दीव्यत्यानन्दवारिधौ कोऽपि ॥ ६ ॥
प्राकृतभावमपास्य स्वीकृतनिजरूपसच्चिदानन्दः ।
गुरुवरकरुणापाङ्गात् गौरवमासाद्य राजते प्राज्ञः ॥ ७ ॥
श्रीगुरुकृपया सच्चित्सुखनिजरूपे निमग्नधीर्मौनी ।
विहरति कश्चन विबुधश्शान्ताहन्तो नितान्तमुदितान्तः ॥ ८ ॥
गुरुवरकरुणालहरीव्यतिकरभरशीतलस्वान्तः ।
रमते यतिवरएको निरुपमसुखसीमनि स्वैरम् ॥ ९ ॥
श्रीदेशिकवरकरुणारविकरसमपोहितान्तरध्वान्तः ।
विहरन् मस्करिवर्यो निरवधिकानन्दनीरधावास्ते ॥ १० ॥
जनिविपरीतक्रमतो बुद्ध्या प्रविलाप्य पञ्चभूतानाम् ।
परिशिष्टमात्मतत्त्वं पश्यन्नास्ते मुनिश्शान्तः ॥ ११ ॥

जगदखिलमिदमसारं मायिकमेवेति मनसि मन्वानः ।
पर्यटति पाटिताशः प्रगलितमदमानमत्सरः कोऽपि ॥ १२ ॥
नात्मनि किञ्चिन्माया तत्कार्यं वाऽस्ति वस्तुतो विमले ।
इति निश्चयवानन्तर्दृष्यत्यानन्दनिर्भरो योगी ॥ १३ ॥
त्वमहमभिमानहीनो नोज्झितनानाजनाचारः ।
विहरति बालवदेको विमलसुखाम्भोनिधौ मग्नः ॥ १४ ॥
अवधूतकर्मजालो जडबधिरान्धोपमः कोऽपि ।
आत्मारामो यतिराडटवीकोणेष्वटन्नास्ते ॥ १५ ॥
शान्त्या दृढोपगूढश्शान्तसमस्तान्यवेदनोदारः ।
रमते रसज्ञएको रम्ये स्वानन्दपर्यङ्के ॥ १६ ॥
उन्मीलितविषयारिः स्वीकृतवैराग्यसर्वस्वः ।
स्वात्मानन्दमहिम्नि स्वाराज्येऽस्मिन् विराजते विहरन् ॥ १७ ॥
सवितर्यपि शीतरुचौ चन्द्रे तीक्ष्णेऽप्यधो वहत्यग्नौ ।
मायिकमिदमिति जानन् जीवन्मुक्तो न विस्मयी भवति ॥१८॥
अज्ञानवैरिविजयी प्रज्ञामातङ्गमस्तकारूढः ।
विहरति सहि यतिराजस्समरससुखधाम्नि सर्वतो राज्ये ॥१९॥
शान्ताहङ्कृतिदोषस्सुसमाहितमानसः कोऽपि ।
पूर्णेन्दुशिशिरभावो राजत्यानन्दसत्यचिद्रसिकः ॥२०॥
तिष्ठन् परत्र धाम्नि स्वीयसुखास्वादपरवशः कश्चित् ।
क्वापि ध्यायति कुहचिद्गायति कुत्रापि नृत्यति स्वैरम् ॥२१॥
अगृहीतार्तिकलङ्कः प्रशमितसङ्कल्पविभ्रमः प्राज्ञः ।
न्यक्कृतकार्यकलापस्तिष्ठत्यापूर्णसीमनि क्वापि ॥२२॥
चपलं मनःकुरङ्गं चारु गृहीत्वा विमर्शवागुरया ।
निगमारण्यविहारश्रान्तश्शेते स्वधाम्नि कोऽप्येकः ॥२३॥
दारुणचित्तव्याघ्रं धीरमनःखड्गधारया हत्वा ।
अभयारण्ये कोऽपि स्वैरविहारी जयत्येकः ॥२४॥



सज्जनहृदयसरोजोन्मीलनपटुदिनकरप्रसरः ।
एको यतिवरपूषा निर्दोषश्चरति चिद्गगने ॥२५॥
कुवलयविकासकारणमज्ञानध्वान्तकौमुदीमज्ञः ।
शुद्धो मुनीन्द्रचन्द्रः सुरसेव्यो लसति विष्णुपदे ॥२६॥
स्वानन्दामृतसेकैरान्तरसन्तापसन्ततिं शमयन् ।
चित्रमचञ्चलवृत्तिः चिद्व्योमनि भाति योगिवर्यघनः ॥२७॥
सुमनस्सौरभमंजुलसञ्चारनिवारिताखिलश्रान्तिः ।
संयमचारुसमीरे विहरत्यानन्दसंविदारामे ॥२८॥
निश्श्रेयससारफले निर्मलविज्ञानपल्लवमनोज्ञे ।
वीतभये विपिनतले यतिशितिकण्ठो विभाति कोऽप्येकः ॥२९॥
निस्सारभुवनमरुतलमुत्सार्यानन्दसारसम्पूर्णे ।
वरसरसि चिन्मयेऽस्मिन् परहंसः कोऽपि दीव्यति स्वैरम् ॥३०॥
निखिलागमपल्लविते निगमशिरस्तन्त्रशीतलोद्याने ।
मधुतरमंजुलवाचः कूजन्नास्ते यतीन्द्रकलकण्ठः ॥३१॥
दारितमोहमदेभो दूरीकृतसकलदुरितशार्दूलः ।
विबुधोत्तमसिंहवरो विहरत्यानन्दविततकान्तारे ॥३२॥
अज्ञानमृगवरोज्झितविज्ञानोत्तुंगशृङ्गशिखरितले ।
मतिसलिलशीतलाङ्गो यतिमदकलभो विराजते विहरन् ॥३३॥
नासाञ्चलनिहिताक्षो नामादिभ्यो निवर्तितस्वान्तः ।
तटिनीतटेषु तत्वं ध्यायन्नास्ते यतिः कोऽपि ॥ ३४ ॥
आशावसनो मौनी नैराश्यालंकृतश्शान्तः ।
करतलभिक्षापात्रस्तरुतलशय्यो मुनिर्जयति ॥ ३५ ॥
विजनावनिकुञ्जगृहे मंजुलपुलिनैकमंजुतरतल्पे ।
शेते कोऽपि यतीन्द्रः शमसमसुखबोधवस्तुनिस्तन्द्रः ॥ ३६ ॥
भूतलमृदुतरशय्याशीतलवातैकचामरश्रान्तः ।
राकाहिमकरदीपो राजति यतिराजशेखरः कोऽपि ॥ ३७ ॥

विपुलशिलातलफलके विमलसरिद्वारिपरिवृतोदारे ।
मन्दं मलयजपवने वाति प्रस्वपिति कोऽपि यतिराजः ॥ ३८ ॥
आन्तरमेकं किञ्चित् सन्ततमनुसन्दधन् महामौनी ।
करपुटभिक्षामश्नन्नटति हि वीथ्यां जडाकृतिः कोऽपि ॥ ३९ ॥
प्रविलाप्य जगदशेषं परिशिष्टाखण्डवस्तुपरतन्त्रः ।
प्राश्नाति कवलमास्ये प्राप्तं प्रारब्धकर्मणा कोऽपि ॥ ४० ॥
निन्दति किमपि न योगी नन्दति नैवापरं किमप्यन्तः ।
चन्दनशीतलहृदयः कन्दलितानन्दकन्धरस्वान्तः ॥ ४१ ॥
संत्यज्य शास्त्रजालं सव्यवहारं च सर्वतस्त्यक्त्वा ।
आश्रित्य पूर्णपदवीमास्ते निष्कम्पदीपवद्योगी ॥ ४२ ॥
तृणपङ्कचर्चिताङ्गः तृणमिव विश्वं विलोकयन् योगी ।
विहरति रहसि वनान्ते विजरामरभूम्नि विश्रान्तः ॥ ४३ ॥
पश्यति किमपि न रूपं न वदति न शृणोति किञ्चिदपि वचनम् ।
तिष्ठति निरुपमभूमनि निष्ठामवलम्ब्य काष्ठवद्योगी ॥ ४४ ॥
गात्राभिमानविहीनो जन्तुषु सर्वत्र पूर्णतां पश्यन् ।
मूढश्चरति यतीन्द्रो मूढवदखिलागमार्थतत्त्वज्ञः ॥ ४५ ॥
उपधाय बाहुमूलं परिधायाकाशमवनिमास्तीर्य ।
प्रस्वपिति विरतिवनितां परिरभ्यानन्दपरवशः कोऽपि ॥ ४६ ॥
गतभेदवासनाभिः स्वप्रज्ञोदारवारनारीभिः ।
रमते सह यतिराजस्त्वत्यन्तान्तःपुरे कोऽपि ॥ ४७ ॥
वैराग्यविपुलमार्गे विज्ञानोद्दामदीपिकोद्दीप्तम् ।
आरुह्य तत्त्वहर्म्यं मुक्त्या सह मोदते मुनिराट् ॥ ४८ ॥
विजनतलोत्पलमालावनितावैतृष्ण्यकल्पवल्लीश्च ।
अवमानामृतवटिकामात्मज्ञः कोऽपि गृह्णाति ॥ ४९ ॥
न निषेधति दोषधिया गुणबुध्या वा न किञ्चिदादत्ते ।
आविद्यकमखिलमिति ज्ञात्वोदास्ते मुनिः कोऽपि ॥ ५० ॥



भूतं किमपि न मनुते भावि च किञ्चिन्न चिन्तयत्यन्तः ।
पश्यति न पुरोवृत्त्या वस्तु समस्तार्थसमरसः कोऽपि ॥ ५१ ॥
निगृहीताखिलकरणो विनिमृष्टाशेषविषयेहः ।
तृप्तिमनुत्तमसीमां प्राप्तः पर्यटति कोऽपि यतिवर्यः ॥ ५२ ॥
सन्त्यजति नोपपन्नं नासम्पन्नं च वाञ्छति क्वापि ।
स्वस्थश्शेते यतिराडान्तरमानन्दमनुभवन्नेकः ॥ ५३ ॥
कामपि विमलां पदवीमासाद्यानन्दसंविदुन्निद्राम् ।
आस्ते भिक्षुक एको विहरति निर्मुक्तबन्धनः कोऽपि ॥ ५४ ॥
वस्तुन्यस्तमिताखिलविश्वविहारो विलीनमनाः ।
राजति परानपेक्षो राजा किल वीतरागाणाम् ॥ ५५ ॥
आचार्यापाङ्गदृशा समवाप्तापारसंविदाकारः ।
प्रशमितसकलविभेदः परहंसः कश्चिदाभाति ॥ ५६ ॥
वर्णाश्रमव्यवस्थामुत्तीर्य विधूय विद्यादीन् ।
परिशिष्यते यतीन्द्रः परिपूर्णानन्दबोधमात्रेण ॥ ५७ ॥
क्षयमुपनीय समस्तं कर्म प्रारब्धमुपभुज्य ।
प्रविगलितदेहबन्धः प्राज्ञो ब्रह्मैव केवलं भवति ॥ ५८ ॥
स्तिमितमनन्तमनाख्यं सन्ततमानन्दबोधघनम् ।
अविकल्पमाद्यमेकं सन्मात्रं दीप्यते किमपि ॥ ५९ ॥
अक्षरमजरमजातं सूक्ष्मतरापूर्वशुद्धविज्ञानम् ।
प्रगलितसर्वक्लेशं परतत्त्वं वर्तते किमपि ॥ ६० ॥
सुखतरमजरमदूरं सारं संसारवारिधेस्तरणे ।
समरसमभयमपारं सत् किञ्चन दीप्यते तत्त्वम् ॥ ६१ ॥
अरसमगन्धमरूपं विरजस्कमसत्त्वमतमस्कम् ।
निरुपमनिर्भयतत्त्वं तत्किमपि द्योतते नित्यम् ॥ ६२ ॥
इति गुरुकरुणाऽपाङ्गादार्याभिर्द्योतिकपटिसङ्ख्याभिः ।
निरवद्याभिरवोचं निगमशिरस्तन्त्रसारभूतार्थम् ॥ ६३ ॥

गदितमिममात्मविद्याविलासमनुवासरं स्मरन्विबुधः ।
परिणतपरात्मविद्यः प्रपद्यते सपदि परमार्थम् ॥६४॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्रार्यपूज्यपादशिष्य-
श्रीसदाशिवब्रह्मेन्द्रार्यविरचितः
आत्मविद्याविलासः
संपूर्णः ॥

---

शिवाभ्यांनमः ॥

# शिवमानसिकपूजा प्रारभ्यते ॥

अनुचितमनुलपितं मे त्वयि ननु शंभो, तदागसः शान्त्यै ।
अर्चां कथमपि विहितामङ्गीकुरु सर्वमङ्गलोपेत, ॥१॥
ध्यायामि कथमिव त्वां धीवर्त्मविदूरदिव्यमहिमानम् ।
आवाहनं विभोस्ते देवाग्र्य, भवेत् प्रभो, कुतः स्थानात् ॥२॥
कियदासनं प्रकल्प्यं कृतासनस्येह सर्वतोऽपि सह ।
पाद्यं कुतोऽर्घ्यमपि वाऽऽपाद्यं सर्वत्रपाणिपादस्य ॥३॥
आचमनन्ते स्यादथि भगवन्, भव, सर्वतोमुखस्य कथम् ।
मधुपर्कोवा कथमिह मधुवैरिणि दर्शितप्रसादस्य ॥४॥
स्नानेन किं विधेयं सलिलकृतेनेह नित्यशुद्धस्य ।
वस्त्रेणापि न कार्यं देवाधिप, ते दिगम्बरस्येह ॥५॥
स्फुरति हि सर्पाभरणं सर्वाङ्गं सर्वमङ्गलाकारम् ।
अतिवर्णाश्रमिणस्ते ऽस्त्युपवीतेनेह कः स्विदुत्कर्षः ॥६॥
गन्धवती हि तनुस्ते गन्धाः किंनेश, पौनरुक्त्याय ।
पुष्करफलदातारं पुष्करकुसुमेन पूजये किं त्वाम् ॥७॥



धामधनमूलधनं त्वं सकलेश्वर, भवसि धूपितः केन ।
दीपः कथं शिखावान् दीप्येत पुरः स्वयंप्रकाशस्य ॥८॥
अमृतात्मकमपि भगवन्नशनं किन्नाम नित्यतृप्तस्य ।
स्वच्छाम्रेडितमेतत् ताम्बूलं यदिह सुमुखरागेऽपि ॥९॥
उपहारीभूयादिदमुमेश, यन्मे विचेष्टितमशेषम् ।
नीराजयामि तमिमं नानात्मानं सहाखिलैः करणैः ॥१०॥
सुमनश्शेखर, भवते सुमनोऽञ्जलिरेष को भवेच्छम्भो, ।
छत्रं द्युमन्, द्युमूर्ध्नश्चामरमपि किं जितश्रमस्य तव ॥११॥
नृत्यं प्रथतां कथमिव नाथ, तवाग्रे महानटस्येह ।
गीतं किं पुरवैरिन्, गीतागममूलदेशिकस्य पुरः ॥१२॥
वाद्यं डमरुभृतस्ते वादयितुं वा परेऽस्ति का शक्तिः ।
अपरिच्छिन्नस्य भवेदखिलेश्वर, कः प्रदक्षिणविधिस्ते ॥१३॥
स्युस्ते नमांसि कथमिव शङ्कर, परितोऽपि विद्यमानस्य ।
वाचामगोचरे त्वयि वाक्प्रसरो मे कथन्नु सम्भवतु ॥१४॥
नित्यानन्दाय नमो निर्मलविज्ञानविग्रहाय नमः ।
निरवधिकरुणाय नमो निरवधिविभवाय तेजसेऽस्तु नमः ॥१५॥
सरसिजविपक्षचूडस्सगरतनूजन्मसुकृतमूर्धाऽसौ ।
दक्कूलङ्कषकरुणो दृष्टिपथे मेऽस्तु धवलिमा कोऽपि ॥ १६ ॥
जगदाधारशरासं जगदुत्पादप्रवीणयन्तारम् ।
जगदवनकर्मशूरं जगदुद्धारं श्रयामि चित्सारम् ॥ १७ ॥
कुवलयसहयुध्वगलैः कुलगिरिकूटस्थकवचितार्द्धाङ्गैः ।
कलुषविदूरैश्चेतः कवलितमेतत् कृपारसैः कैश्च ॥ १८ ॥
वसनवते करिकृत्त्या वासवते रजतशैलशिखरेण ।
वलयवते भोगभृता वनितार्द्धाङ्गाय वस्तुनेऽस्तु नमः ॥ १९ ॥
सरसिजकुवलयजागरसंवेशनजागरूकलोचनतः ।
सकृदपि नाहं जाने सुरभितरं भाग्यकारमञ्जीरात् ॥ २० ॥

आपाटलजाटानामानीलच्छायकन्धरासीम्नाम् ।
आपाण्डुविग्रहाणामाद्रुहिणं किङ्करा वयं महसाम् ॥ २१ ॥
मुषितस्मरावलेपे मुनितनयायुर्वदान्यपदपद्मे ।
महसि मनो रमतां मे महति दयापूरमेदुरापाङ्गे ॥ २२ ॥
शर्मणि जगतां गिरिजानर्मणि सप्रेमहृदयपरिपाके ।
ब्रह्मणि विनमद्रक्षणकर्मणि तस्मिन्नुदेतु भक्तिर्मे ॥ २३ ॥
अस्मिन्नपि समये मम कण्ठच्छायाविधूतकालाभ्रम् ।
अस्तु पुरो वस्तु किमप्यर्धाङ्गेदारमुन्मिषन्निटिलम् ॥ २४ ॥
जटिलाय मौलिभागे जलधरनीलाय कन्धराऽऽभोगे ।
धवलाय वपुषि निखिले धाम्ने स्यान्मामको नमोवाकः ॥ २५ ॥
अकरविराजत्सुमृगैरवृषतुरङ्गैरमौलिधृतगङ्गैः ।
अकृतमनोभवभङ्गैरलमन्यैर्जगति दैवतापशदैः ॥ २६ ॥
अस्मै वच्मि दशां मे कस्येदृग्घृदयमस्ति शक्तिर्वा ।
कस्य बलं चोद्धर्तुं क्लेशात् त्वामन्तरा दयासिन्धो, ॥२७॥
याचे ह्यनभिनवन्ते चन्द्रकलोत्तंस, किञ्चिदपि वस्तु ।
मह्यं प्रदेहि भगवन् मदीयमेव स्वरूपमानन्दम् ॥ २८ ॥
भगवन्, बालतया वा भक्त्या वाऽऽप्यापदाकुलतया वा ।
मोहाविष्टतया वा मास्तु च ते मनसि यद्दुरुक्तं मे ॥ २९ ॥
यदि विश्वाधिकता ते यदि निगमागमपुराणयाथार्थ्यम् ।
यदि वा भक्तेषु दया तदिह महेशाशु पूर्णकामः स्याम् ॥ ३० ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्रार्यपूज्यपादशिष्य-
श्रीसदाशिवब्रह्मेन्द्रकृतिषु शिवमानसिकपूजा
सम्पूर्णा ॥

---

शिवाभ्यां नमः ॥

## ॥ सपर्यापर्यायस्तवः ॥

भूयः श्रेयस्कामिभिरभ्यर्थनया ते
निध्यानाद्वा निर्व्रियतामत्र जगत्याम् ।
सत्तामात्रानन्दचिदात्मानमनन्तं
सोऽहं तन्त्वामर्चयितुं न प्रभवामि ॥ १ ॥
स ध्येयो यः संसृतिभूमिव्यवधानात्
आद्योऽनन्तस्त्वन्तु न साक्षादपरोक्षात् ।
ध्यायन्नानुध्यायति चेतः स्वयमन्तः
तं ध्यायामि त्वामिति वन्ध्या कुमनीषा ॥ २ ॥
सर्वानन्यस्सत्त्वमबाह्यान्तरभावः
बाह्यश्चास्यभ्यन्तरमस्यप्यखिलात्मा ।
नित्यमत्यासन्नवतस्तस्य तवात्मन्,
नाहं जाने किंविधमावाहनकर्म ॥ ३ ॥
ओतं प्रोतं यत्र समस्तं जगदेतत्
सर्वाधारे तिष्ठति सम्बाधविहीनम् ।
भूमन्, तस्य स्वे महिमन्येव सतस्ते
को नामासावासनसङ्कल्पविडम्बः ॥ ४ ॥
अक्षादिभ्यो यस्य परस्य प्रतिपत्त्या
संसाराध्वन्यत्यतिपन्नः सुखमति ।
सर्वात्मन्, तस्यागतिगत्योरतिभूमेः
मिथ्या नाहं केन कथं स्वागतिकः स्याम् ॥ ५ ॥
विश्वात्मैकोऽस्य तु पादो न विमेयः
पादाश्चान्ये पण्डितरूपैरपि मृग्याः ।

तस्यारूपस्यापदमूर्धादिविभक्तेः
आपाद्यं किं केन कथं वा तव पाद्यम् ॥ ६ ॥
इन्द्राद्याः स्युर्यस्य परस्यामरवर्याः
विद्यामात्रावेशवशेनापि सदर्घ्याः ।
तस्याद्यस्यापाणिपदादेः कथमर्घ्यं
दद्यामद्यानर्घ्यविभूतेरुदबिन्दुम् ॥ ७ ॥
सन्ध्यो नद्यो यस्य च वाऽऽस्तेऽयमुरन्वान्
मेघाः केशाः प्राकृतविश्वापघनस्य ।
तस्योपतप्राकृतसम्बोध्यतनोस्ते
कल्प्यं मन्ये नाचमनीयं कमनीयम् ॥ ८ ॥
अध्यात्मन्, यन्मध्वधिदैवं च विभक्तं
संपृच्छन्त्येकात्मकमाहोपनिषद्यम् ।
सत्त्वं सर्वस्यात्ममतस्सन्मधुपर्कः
सम्प्रीयेथाः किं मधुपर्केण कथं वा ॥ ९ ॥
यत्रैकस्थं विश्वपवित्राखिलतीर्थं
निष्णाताः स्युर्यत्र विगच्छद्भवपङ्काः ।
यद्व्योम्नोऽपि व्योम परं ज्योतिरपारं
तं त्वामात्मन्, केन विशुद्धं स्नपयामि ॥ १० ॥
लोकालेख्यं लोहितशुक्लासितरूपैः
स्यूतं सूक्ष्मैरम्बररूपं गुणभेदैः ।
सम्पर्याप्तं प्रावरितुं यत्नविभूमन्,
किं ते तत्स्यादम्बरमन्यत् कलयामि ॥ ११ ॥
अत्रैगुण्ये यत्र जगत् त्वय्युपवीते
सूत्रैः स्यूतं विश्वमदो विश्लथमास्ते ।
तस्यासव्यादक्षिणसम्पूर्णतनोस्ते
कल्प्यं सूत्रं किं त्रिगुणं स्यादुपवीतम् ॥ १२ ॥




यस्यैकांशावेशवशादानखकेशात्
भूतं भूतं रोचनमिन्धे रुचकाभम् ।
तस्यास्थूलानण्वथ सिद्धावयवात्मन्,
निर्मेयं किं तन्मनसाऽपि प्रतिकर्म ॥ १३ ॥
यस्याभिध्याविद्युति बाध्यातितमिस्रा
नालेप्यो यः कर्मभिरच्छोऽसि तमिस्रैः ।
आकाशादेरप्यतिसूक्ष्मस्य विमोऽस्ते
तस्यालेपस्येह कुतः स्यादनुलेपः ॥ १४ ॥
आतिष्ठन्ते केऽपि नयन्ते वनपुष्पं
चूडापीडं केचिदपांपुष्पमुशन्ति ।
भूमन्, जाने पुष्करपुष्पं त्वयि सर्वं
का का पुष्पैस्तेन मयाऽर्चा तव कार्या ॥ १५ ॥
यस्य प्राणो गन्धवहश्चन्द्रतनोस्ते
यस्त्वं गीतस्सर्वसुगन्धी श्रुतिमौलौ ।
तस्यामोदप्रीतिकृते ते कथमात्मन्,
धूपायेयं फल्गुतमैर्गुग्गुलुधूपैः ॥ १६ ॥
अक्षाण्यर्था बुद्धिमनोऽहंकृतयो वा
सन्दीप्यन्ते सञ्चितभासस्तव भासा ।
खद्योतावृत्या तव दीपः खलु कल्प्यः
तेजोवर्चोद्युम्नितेजस्त्रिनयस्य ॥ १७ ॥
मृत्युर्यस्याशेषभुजः स्यादुपदंशो
नाश्नीयात्किञ्चन नाकिञ्चनगम्यः ।
यं विज्ञायात्येति पिपासामशनायां
नैवेद्यं ते तस्य निवेद्यं किमिवात्मन् ॥ १८ ॥
पश्यत्यन्यद्यत्र न दृश्यं न शृणोति
श्राव्यं ज्ञेयं यत्र न जानाति न किञ्चित् ।

मूलस्तस्याशेषविशेषोपशमस्य
छत्राद्यैर्वा कैरुपचार्यं तवकेन ॥१९॥
सर्वात्मा सन्योसि पुरस्तादपि पश्चात्
ऊर्ध्वञ्चाधो दक्षिणतश्चोत्तरतश्च ।
तस्यापारानन्तमहिम्नः कथमात्मन्,
मादक्षिण्यक्रान्तिमहन्ते करवाणि ॥२०॥
नन्तव्योऽन्योऽसावहमन्योऽस्मि च नन्ता
नैवं भेदं वेदप मायामतियातः ।
योऽह सत्वं यस्त्वमहं सम्प्रतिबुद्धो
बुध्या दध्यां तस्य नमस्यां तव कोऽहम् ॥२१॥
स्तोत्रन्नाम स्याद्गुणिनो यो गुणवादः
त्वञ्चामेयोऽनन्तगुणो वाऽप्यगुणो वा ।
प्रावत्वं पारे वाङ्मनसां त्वं परमात्मन्
आनन्देथास्त्वं सकया नः स्तुतिभङ्ग्या ॥२२॥
यस्त्वं ब्रह्माक्षय्यमशेषाअपि लोकाः
वेदादेवास्सर्वमिदं चासि विभूमन्, ।
सोऽहंभूतो मानसशोकानतितीर्णो
न प्रार्थ्यं तत् प्रार्थनया ते विमृशामि ॥२३॥
गेहं, देहो देवइहात्मैव सपर्या
सोऽहं त्वं मे मोहकथाऽऽत्यन्तिकशान्तिः ।
कैवल्यञ्चातुल्यपरानन्दमवाप्यं
नान्यो देवो नापि सपर्या न फलं वा ॥ २४ ॥
चित्राकारा मत्तमयूरावलिरेषा
दृष्टिं कस्मिंश्चिद्घनरूपे कलयन्ती ।
हृद्यालापैरुज्ज्वलपूर्णश्रुतिसारैः
भूयो मौनं हंसकुलायादिशतीव ॥२५॥



यतीन्द्राणां राजा जयति भगवान् भाष्यकृदसौ
नमस्यः प्राज्ञानां सदसि य इमामुज्ज्वलपदाम् ।
सपर्यापर्यायस्तुतिमिति विधाय श्रुतिशिरः
प्रसिद्धन्यायार्थामलसमनुजग्राह सुजनम् ॥ २६ ॥
ज्ञानात्मना यथा जीवन्मुक्तिः सेयं श्रुतौ स्थिता ।
तथा पूजाऽऽत्मना वाऽपि श्रुताचार्यैरनुत्तमा ॥ २७ ॥

॥ इति सपर्यापर्यायस्तवः सम्पूर्णः ॥




अयं किल सपर्यापर्यायस्तवः श्रीशङ्कराचार्यविनिर्मित इति केचित् । कतिपु च न मातृकास्वन्ते "श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीमत्परमशिवेन्द्रार्यशिष्यश्रीमत्सदाशिव-ब्रह्मेन्द्रविनिर्मितस्सपर्यापर्यायस्तवस्सम्पूर्णः" इत्युपलभ्यते । तासु "यतीन्द्राणामित्यस्य पद्यस्य कतिपुचिदनुपलम्भोऽपीति विदन्तु विद्वांसः । अत्र प्रकटितायाः गुरुरत्नमा-लिकायाः प्रभाविमर्शिनीनाम व्याख्यानान्तरमप्युपलब्धमास्ते परिनमपि यावदतित्रुटित-मतिपरिस्फुटाक्षरमप्यान्ध्रलिपि ॥ तथापि दयालवः काप्युपलब्धमस्याः मातृकान्तरम-र्पयेयुः सुसंशोध्य तदपि प्रकटीचिकीर्षाम इत्यलम् ॥